नमो नमः श्री गुरु प्रेमसूरये.

श्रीमन्मुनिसुंदरसूरिकृतवृत्तियुतं

# देवेन्द्र - नरकेन्द्रप्रकरणम्।

-: प्रकाशक :-

श्री जिनशासन आराधना ट्रस्ट

७, त्रीजो भोईवाडो, भुलेश्वर, मुंबई - ४०० ००२

નમો નમઃ શ્રી ગુરુ પ્રેમસૂરયે.

श्रीमन्मुनिसुंदरसूरिकृतवृत्तियुतं

# देवेन्द्र-नरकेन्द्रप्रकरणम् ।

-: प्रकाशक :-

श्री जिनशासन आराधना ट्रस्ट

७, त्रीजो भोईवाडो, भुलेश्वर, मुंबई-४०० ००२.

विक्रम संवत २०४९

वीर संवत २५१९ मूल्य रु. ३२

## દ્રવ્ય સહાયક

પરમ પૂજ્ય વૈરાગ્યવારિધિ સ્વ.આચાર્યદેવ શ્રીમદ્ વિજય **યશોદેવસૂરિ મહારાજ** સાહેબના પટ્ટાલંકાર પ્રશાન્તમૂર્તિ આચાર્યદેવ શ્રીમદ્ વિજય **ધનપાળસૂરી** મહારાજ સાહેબના આજ્ઞાવર્તી સ્વ.પ્રવર્તિની શ્રી **રંજનશ્રીજી** મહારાજના સંયમ, તપ, સ્વપર કલ્યાણની દીર્ધકાલિન આરાધનાની અનુમોદનાર્થે તેઓશ્રીના શિષ્યાઓ પૂજ્ય સધ્વીજી શ્રી **ઈંદ્રશ્રીજી** મહારાજ, પૂજ્ય સાધ્વીજી શ્રી **વિનયપ્રભાશ્રીજી** મહારાજ, પૂજ્ય સાધ્વીજી શ્રી **વસંતપ્રભાશ્રીજી** મહારાજ, પૂજ્ય સાધ્વીજ **ગુણમાળાશ્રીજી** મહારાજ તથા પૂજ્ય સાધ્વીજી શ્રી **યશોધરાશ્રીજી** મહારાજ.

આદિની પ્રેરણાથી શ્રી કન્યાશાળા જૈન શ્રાવિકા ઉપાશ્રયમાં (રંજન વિહાર) સ્વ.પૂજ્યશ્રીની નિશ્રામાં થયેલા ચાતુર્માસોમાં થયેલ જ્ઞાનનિધિમાંથી આ ગ્રંથના પ્રકાશનનો સંપૂર્ણપણે લાભ લેવામાં આવેલ છે. એની અમે ભૂરી ભૂરી અનુમોદના કરીએ છીએ.

**લી.શ્રી જિનશાસન આરધના ટ્રસ્ટ**

## -: પ્રકાશકીય :-

**શ્રી મુનિસુંદરસૂરિ મહારાજ** કૃત ટીકા સહીત ''દેવેન્દ્ર નરકેન્દ્ર પ્રકરણ'' ને અમે સાનંદ પ્રકાશિત કરીએ છીએ.

મૂળ પ્રકરણ ''વિમાન પ્રજ્ઞપ્તિ-નરક વિભકિત વગેરે પ્રકીર્ણક (પયન્ના)ના આધારે કોઈ પૂર્વાચાર્ય ભગવંતે રચ્યું છે. રચયિતાના નામનો ઉલ્લેખ પ્રાપ્ત થઈ શકયો નથી.

નામને અનુસારે પ્રસ્તુત ગ્રંથમાં નરકાવાસોનું, દેવાવાસોનું વર્ણન છે, પણ સાથે સાથે નારકી અને દેવલોકની બીજી પણ અનેક વાતો પ્રસ્તુત ગ્રંથમાં સંગ્રહીત છે. આ ગ્રંથ અત્યંત પ્રાચિન છે.

તેના ઉપર પૂજયપાદ **મુનિસુંદરસૂરી** મહારાજે ટીકા પણ સંવત ૧૧૯૮ ની સાલમાં રચેલ છે. આમ આજથી લગભગ ૮૭૭ વર્ષ પૂર્વે રચાયેલ આ ટીકા સહીત પ્રસ્તુત ગ્રંથનું સંશોધન સંપાદન પૂજયપાદ **ચતુરવિજય મહારાજે** કરી, **શ્રી આત્માનંદ જૈન સભા** તરફથી સંવત ૧૯૭૬ માં પ્રકાશિત કરેલ છે. ૬૯ વર્ષ પૂર્વે પ્રકાશિત થયેલ આ ગ્રંથ પણ અતિજીર્ણ થઈ ગયો છે તેથી સંપાદક પૂજયશ્રીના ઉપકારને યાદ કરવા પૂર્વક તથા પ્રાચ્ય પ્રકાશક સંસ્થા પ્રત્યે કૃતજ્ઞતા ભાવ પ્રદર્શિત કરવા પૂર્વક અમે આનું પ્રકાશન કરી રહયા છીએ. પ્રકરણના અભ્યાસી સાધુ-સાધ્વીજીને આ ગ્રંથ ઘણોજ ઉપયોગી છે. પ્રાકૃત સંસ્કૃતના જ્ઞાતા શ્રાવક શ્રાવિકાઓને પણ લાભદાયી છે. આવા પ્રકરણના અભ્યાસથી વૈરાગ્ય દૃઢ બને છે અને અપૂર્વ કર્મનિર્જરાની પ્રાપ્તિ થાય છે.

પૂજ્યપાદ કલિકાલકલ્પતરુ સિધ્ધાંતમહોદધિ સ્વ. આચાર્યદેવ શ્રીમદ્ વિજયપ્રેમસૂરીશ્વરજી મહારાજની દિવ્ય કૃપાથી તેઓશ્રીના પટ્ટાલંકાર વર્ધમાન તપોનિધિ ન્યાય વિશારદ આચાર્યદેવ શ્રીમદ્ વિજય **ભુવનભાનુસૂરિશ્વરજી** મહારાજના શુભ આશીર્વાદથી તથા તેઓશ્રીના શિષ્યરત્ન, સમતાસાગર, ચારિત્રનિધિ પન્યાસજી શ્રીપદમવિજયજી ગણિવર્યના શિષ્યરત્ન પૂજ્ય આચાર્યદેવ શ્રીમદ્ વિજય હેમચંદ્રસુરિ મહારાજ સાહેબની પ્રેરણાથી ચાલતા શ્રુતભક્તિના કાર્યોમાં વિશેષ પ્રગતિ થતી રહે એજ શુભાભિલાષા.

**લી. જિનશાસન આરાધના ટ્રસ્ટ**

**ટ્રસ્ટીઓ**

ચંદ્રકુમાર બી. જરીવાળા  લલિતભાઈ આર. કોઠારી
નવિનચંદ્ર બી. શાહ  પુંડરીક એ. શાહ

**-: પ્રાપ્તિ સ્થાન :-**

(૧) પ્રકાશક
(૨) શ્રી જિનશાસન આરાધના ટ્રસ્ટ
  (i) C/o. સુમતિલાલ ઉત્તમચંદ
  મારફતીયા મહેતાનો પાડો, ગોળશેરી,
  પાટણ ૩૮૪ ૨૬૫ (ઉ.ગુ.)
  (ii) C/o દિપક અરવિંદલાલ ગાંધી
  ઘી કાંટા, વડફળીયા, રાવપુરા, વડોદરા
(3) મૂળીબેન અંબાલાલ રતનચંદ
જૈન ધર્મશાળા, સ્ટેશન રોડ, વીરમગામ.

# ઉપોદ્ઘાત.

જો કે સંસ્કૃત પ્રાકૃત આદિ શાસ્ત્રીય ભાષાના પ્રગટ થતા ગ્રંથોની પ્રસ્તાવના સંસ્કૃતમાં લખવાનો બહુધા પ્રઘાત છે. પરંતુ તે બદલવાનાં કેટલાંક કારણો અનુભવમાં આવતાં જાય છે જેમકે—

"૧ વિષયને જાણનાર પણ શાસ્ત્રીયભાષા ન જાણનાર લોકો તે તે ભાષાના ગ્રંથની હકીકત પ્રસ્તાવના દ્વારા પણ મેળવી શકતા નથી.

૨ બહુધા સંસ્કૃત ભાષામાં લખાતી પ્રસ્તાવનાઓ શબ્દાડંબરવાળી હોઇ વસ્તુજ્ઞાનમાં ઓછીજ મદદ કરે છે. ખાસ કરી જૈન સમાજના સાહિત્યમાં આ દોષ જણાયા સિવાય રહેતો નથી. એ વાત સત્યપ્રેમીને તો દીવા જેવી છે.

૩ ગમે તેવા મહત્વપૂર્ણ વિષયોના શાસ્ત્રીય ગ્રંથો તરફ લોકોને આકર્ષિત કરવાનું સાધન તેઓ સમક્ષ માતૃભાષામાં તે તે ગ્રંથોની માહિતી આપવી તેજ છે.

૪. આ સાહિત્ય–પ્રકાશનના પૂર જમાનામાં સાધારણ નિયમ પ્રસ્તાવના દ્વારા ગ્રંથની માહિતી મેળવવાનો થઇ પડયો છે. તેવે વખતે પ્રચલિત ભાષામાં લખાએલ પ્રસ્તાવનાદિ સંસ્કૃત ભાષાના ઓછામાં ઓછા અભ્યાસી કે સર્વથા અનઅભ્યાસી સુધાંની જિજ્ઞાસા તૃપ્ત કરવામાં સાહાયક થાય એ દેખિતું છે.

૫ પ્રસ્તુત ગ્રંથજેવા પ્રાકરણિક ગ્રંથોના અભ્યાસી મોટે ભાગે સાધુ સાધ્વી અગર જૈન માત્ર હોય છે. તેઓમાં પણ શાસ્ત્રીય ભાષાનું ઉંડું જ્ઞાન બહુજ થોડાને હોય છે. આવી પરિસ્થિતિમાં છપાએલ ગ્રંથો માત્ર ભંડારના અલંકારોજ બને છે. એટલે પ્રચ-

લિત ભાષામાં લખાએલ પ્રસ્તાવના આદિ હોય તો એકવાર પુસ્તક હાથમાં આવ્યા પછી બીલકુલ ઉપેક્ષાતો નજ થઇ શકે અને પરિણામે મૂળ ગ્રંથ તરફ રૂચિ આકર્ષાય." ઇત્યાદિ કારણ ઉપર વિચાર કરી અત્યાર સુધીની અમારી ચાલુ પદ્ધતિ બદલી માતૃભાષામાંજ પ્રસ્તાવના કે વિષયાનુક્રમણિકા આપવાનો અમે વિચાર કર્યો છે.

**મૂલગ્રન્થ**—પ્રસ્તુત પુસ્તક **દેવેન્દ્રનરકેન્દ્રક** નામનું પ્રકરણ છે. જે આર્યા--પદ્યમય છે. તેની કુલ ગાથાઓ ૩૭૮ છે. ભાષા પ્રાકૃત અને સરલ હોઇ સુબોધ છે. વિષય એનો દેવ અને નરકનાં મુખ્ય સ્થાનો જે કે અનુક્રમે વિમાન અને નરકાવાસના નામથી ઓળખાય છે તે છે. માત્ર મુખ્ય સ્થાનોનું જ નહીં પણ દેવ અને નારકી સાથે સંબંધ ધરાવતા બીજા અનેક વિષયો આ ગ્રંથમાં ચર્ચેલા છે. જે વિષયો બહુધા બીજા કોઇ પણ ગ્રંથમાં અદ્યાપિ જોવામાં આવ્યા નથી. વિષયની માહિતી માટે વાચકે વિષયાનુક્રમ તરફ દૃષ્ટિ ફેરવવી. વિષયની દૃષ્ટિએ આ ગ્રંથ તદ્દન અપૂર્વ છે. કારણ આ પ્રકરણમાં ચર્ચાએલ વિષય બહુધા અંગ કે ઉપાંગમાં દૃષ્ટિગોચર થતો નથી. એટલું જ નહીં પણ શ્રીમાન્ જિનભદ્રગણિ ક્ષમાશ્રમણ કૃત સંગ્રહણીની ટીકામાં શ્રીમાન્ મલયગિરિસૂરિએ અને શ્રીચન્દ્રીય સંગ્રહણીની ટીકામાં મલધારગચ્છીય શ્રીદેવભદ્રસૂરિએ પ્રસ્તુત પ્રકરણની અનેક ગાથાઓ પ્રસંગે પ્રસંગે વિષયપુષ્ટિઅર્થે ઉધ્ધૃત કરેલી છે. આ ગ્રંથ બે વિભાગમાં વિભક્ત થએલો છે તેમાં આદિથી ૧૨૭ ગાથામાં નરકેન્દ્ર અને ૧૨૮ થી ૩૭૮ સુધીમાં દેવેંદ્રક છે.

**આધાર**—પ્રસ્તુત ગ્રંથમાં વર્ણવેલ વિષય અંગ-ઉપાંગમાં બહુધા ઉપલબ્ધ નથી એ સાંભળતાં જ પ્રશ્ન થાય છે કે ત્યારે આ ગ્રંથ શાના આધારે રચાયો ? તેનો ઉત્તર ટીકાકાર પોતે જ આપે

છે. તે કહે છે કે-**વિમાનપ્રજ્ઞપ્તિ-નરકવિભક્તિ** આદિ પ્રકીર્ણ-કના ઉદ્ધાર રૂપે પ્રસ્તુત ગ્રંથની [1]રચના થઈ છે. જે ઉક્ત મહાન્ ગ્રંથોમાં પ્રવેશ કરવા માટે ઉપયોગી છે. આ સ્થલે પ્રશ્ન થાય છે કે તે આધારભૂત **વિમાનપ્રજ્ઞપ્તિ** અને **નરકવિભક્તિ** એ બે પ્રકીર્ણકો કયાં ? તે ઉપલબ્ધ છે અગર કયાંઈએ તેનો ઉલ્લેખ મળે છે ? આનો ઉત્તર એ છે કે-એ બે પ્રકીર્ણકોનું નામ પ્રસ્તુત પ્રકરણની ટીકા સિવાય અન્યત્ર જોવામાં આવ્યું નથી. શ્રીમાન્ **મલયગિરિસૂરિએ** અને **શ્રીદેવભદ્રસૂરિ** સુધાં પોતે પોતાની સંગ્રહણીની ટીકામાં **દેવેંદ્રનરકેંદ્ર** પ્રકરણ જોવાની જ ભલામણ કરે છે. કયાંઈએ ઉક્ત બે પ્રકીર્ણકોનો ઉલ્લેખ કરતા નથી. પ્રસ્તુત પ્રકરણના ટીકાકારે એના આધાર તરીકે ઉક્ત બે પ્રકીર્ણક આદિનો ઉલ્લેખ કર્યો છે. તે બાબતમાં તેમને કાંઈ પ્રમાણ મળેલું હોવું જોઈએ. ગમે તેમ હોય પણ અત્યારે તે પ્રકીર્ણકો ઉપલબ્ધ નથી. **નંદીસૂત્ર** અને **પાક્ષિકસૂત્રમાં** ચોરાસી ૮૪ આગમોનાં નામો છે જેમાં ક્ષુલ્લિકા **વિમાનપ્રવિભક્તિ** અને **મહતી વિમાનપ્રવિભક્તિ** એ બે નામો [2]મળે છે. સંભવ છે કે પ્રસ્તુત

---

१ "–बहुबुद्धिबोध्यविमानप्रज्ञप्ति–नरकविभक्तिप्रभृतिप्रकीर्णकश्रुतावधारणप्रवरान्तः करणानवलोक्यैदंयुगीनमानवांस्तदनुजिघृक्षयैव तदुद्धारभूतं देवेन्द्रनरकेन्द्रकाख्यं प्रकरणं–"

- इति देवेन्द्रनरकेन्द्रकप्रकरणवृत्ति पृष्ठ–१। पृष्ठ ६२।

२ "छव्विहमावस्सयं भगवंतं, तंजहा—सामाइयं १ चउवीसत्थओ २ वंदणयं ३ पडिक्कमणं ४ काउस्सग्गो ५ पच्चक्खाणं ६।

उक्कालिअं भगवंतं तंजहा—दसवेयालियं १ कप्पाकप्पियं २ चुल्लकप्पियं ३ महाकप्पसुयं ४ ओवाइयं ५ रायप्पसेणइयं ६ जीवाभिगमो ७ पन्नवणा ८ महापण्णवणा ९ नंदी १० अणुओगदाराइं

પ્રકરણના આધારભૂત ઉક્ત બે પ્રકીર્ણકો પૈકી **વિમાન પ્રજ્ઞપ્તિ** **નંદી** અને **પાક્ષિકસૂત્ર**માં ઉલ્લિખિત તે બે પ્રવિભક્તિઓમાંથી એકાદ હોય, પણ આશ્ચર્યની વાત છે કે આ બે સૂત્રોમાં ઉલ્લિખિત આગમનામાવલીમાં **નરકવિભક્તિ** નામ મળી આવતું નથી.

---

११ देविंदत्थओ १२ तंदुलवेयालियं १३ चंदाविज्झयं १४ पमायप्पमायं १५ पोरिसीमंडलं १६ मंडलप्पवेसो १७ गणिविज्जा १८ विज्जाचारणविणिच्छओ १९ झाणविभत्ती २० मरणविभत्ती २१ आयविसोही २२ संलेहणासुयं २३ वीयरागसुयं २४ विहारकप्पो २५ चरणविही २६ आउरपच्चक्खाणं २७ महापच्चक्खाणं २८...।

कालियं भगवंतं तंजहा—उत्तरज्झयणाइं १ दसाओ २ कप्पो ववहारो ४ इसिभासिआइं ५ निसीहं ६ महानिसीहं ७ जंबुद्दीवपन्नत्ती ८ सूरपन्नत्ती ९ चंदपन्नत्ती १० दीवसागरपन्नत्ती ११ खुड्डियाविमाणपविभत्ती १२ महल्लियाविमाणपविभत्ती १३ अंगचूलियाए १४ वग्गचूलियाए १५ विवाहचूलियाए १६ अरुणोववाए १७ वरुणोववाए १८ गरुलोववाए १९ धरणोववाए २० वेसमणोववाए २१ वेलंधरोववाए २२ देविंदोववाए २३ उट्ठाणसुए २४ समुट्ठाणसुए २५ नागपरियावणियाणं २६ निरयावलियाणं २७ कप्पियाणं २८ कप्पवडिंसियाणं २९ पुप्फियाणं ३० पुप्फचूलियाणं ३१ वण्हिआणं ३२ वण्हिदसाणं ३३ आसीविसभावणाणं ३४ दिट्ठीविसभावणाणं ३५ चारणसुमिणभावणाणं ३६ महासुमिणभावणाणं ३७ तेयगनिसग्गाणं ३८.......................................।

दुवालसंगं गणिपिडगं भगवंतं तंजहा—आयारो १ सूयगडो २ ठाणं ३ समवाओ ४ विवाहपन्नत्ती ५ नायाधम्मकहाओ ६ उवासगदसाओ ७ अंतगडदसाओ ८ अणुत्तरोववाइयदसाओ ९ पण्हावागरणं १० विवागसुयं ११ दिट्ठीवाओ १२ ॥"

इति मुद्रितसटीकपाक्षिकसूत्रे ।

**કર્ત્તા**—પ્રસ્તુત પ્રકરણના કર્તા કોણ હતા ? તે સંબંધમાં કોઇ પણ સ્થળે પ્રમાણ મળી આવતું નથી. આ પ્રકરણના ટીકાકાર સુધાં આને ચિરંતન આચાર્યની કૃતિ તરીકે ઓળખાવે છે. ચિરંતનાચાર્ય ગમે તે હોય પણ તે બહુ પ્રાચીન હોવા જોઇએ. અને તેઓ પૂર્વધર યા તો વિશેષ આગમજ્ઞ હોવા જોઈએ.

**ટીકા અને ટીકાકાર**—પ્રસ્તુત પ્રકરણ ઉપર બે ટીકાઓ લખાયાની સાબિતી મળી આવે છે. જેમાંની એક ટીકા શ્રીમાન્ **મલયગિરિસૂરિએ** કરેલી જે અત્યારે ઉપલબ્ધ થતી નથી. તેનો ઉલ્લેખ સ્વયં શ્રી **મલયગિરિ** મહારાજે શ્રીમાન્ **જિનભદ્રગણિ-ક્ષમાશ્રમણ**વિરચિત **સંગ્રહણી**ની ટીકામાં કરેલો છે.[1] બીજી ટીકા મૂળગ્રંથ સાથે જ મુદ્રિત કરવામાં આવી છે, જે અતિ-વિસ્તૃત કે અતિસંક્ષિપ્ત નથી. જો કે ગાથાઓની વ્યાખ્યા બહુધા છાયા રૂપે જણાય છે પણ તે સકારણ છે. પ્રસ્તુત પ્રકરણમાં અનેક વિષયો હોઈ એક વિષય ઉપર જ્યારે ઘણી ગાથાઓ હોય ત્યારે તે દરેક ગાથાનું સંક્ષિપ્ત અર્થ કથન કરી વિષય સમાપ્ત થતાં તેનો સઘળો ભાવાર્થ એક સાથે કહી દેવાની પ્રાચીન અને પુનરૂક્તિ વિનાની પદ્ધતિ સ્વીકારાએલી છે. ટીકાની ભાષા અને પદ્ધતિ સુંદર છે. આ ટીકાના કર્તા શ્રીમાન્ **મુનિચંદ્રસૂરિ** છે. જેમની ઓળખાણ નીચે પ્રમાણે છે.

(क) ભગવાન્ શ્રી **મહાવીરસ્વામિથી** ૬૨૦ વર્ષ પછી ૧૬ મી પાટે એટલે વિક્રમની બીજી સદીમાં દશપૂર્વધર શ્રી વજ્ર-

---

૧ " वृत्तादीनां च प्रतिपृथिवि परिमाणं देवेन्द्रनरकेन्द्रे प्रपञ्चितमिति नेह भूयः प्रपञ्चते, ग्रन्थगौरवभयात् । "

इति मुद्रितसंग्रहणीटीका २६३ तमगाथावृत्तौ पृष्ठ-१०६ ॥

સ્વામિના પ્રશિષ્ય શ્રી ચંદ્રસૂરિ દ્વારા પ્રસિદ્ધ થએલ ચંદ્રકુલમાં[1] અનુક્રમે ૩૪ મી પાટે શ્રી ઉદ્યોતનસૂરિ થયા. તેમના હાથે વિક્રમની દશમી સદીમાં વડગચ્છ (વૃહદ્‌ગચ્છ) ની સ્થાપના[2] થઈ. આ ગચ્છમાં પ્રસ્તુત પ્રકરણની ટીકાના પ્રણેતા શ્રીમાન્ મુનિચંદ્રસૂરિ થયા. જેમની જાતિ જન્મભૂમિ ઉમરનું પ્રમાણ આદિ અનેક બાબતમાં કાંઈ માહિતી મળતી નથી. પણ તેમનો સ્વર્ગવાસ વિક્રમ સંવત્ ૧૧૭૮માં થયાનું નિશ્ચિત પ્રમાણ[3] મળે છે. તેમની વિદ્વત્તા

---

१ "श्रीवज्रसेना१५च्च ततो बभूव कुलानि चत्वारि सुविस्तृतानि ।
नागेन्द्रचान्द्रे अथ नैर्वृतं च वैद्याधरं वादिजसूरिनाम्ना ॥२४॥
विचित्रशाखाकुलगच्छमूलं नैके बभूवुर्गुरवश्च तेषु ।
प्रणम्य तान् चन्द्रकुलेऽथ सूरीन्
स्तवीमि कांश्चित्क्रमतो गणेन्द्रान् ॥ २५ ॥
नखर्तुवर्षेऽथ ६२० जिनाद्दिवं स श्रीवज्रसेनोऽधिगतः श्रेयेऽस्तु ।
श्रीचन्द्रसूरिश्च १६ पदे तदीयेऽभवद्गुरुश्चन्द्रकुलस्य मूलम् ॥२६॥"
इति मुद्रितगुर्वाल्यां पृष्ट-३।

२ "उद्द्योतनः सूरि ३४ रवद्यहीनविद्यानदीविश्रमसिन्धुनाथः ॥४५॥
चतुर्नवत्याभ्यधिकैः शरच्छतैः श्रीविक्रमार्कान्नवभिः स सूरिराट् ।
पूर्वावनीतो विहरन्नथाऽऽगमद्यात्राकृते तस्य गिरेरुपत्यकाम् ॥५३॥
टेलीखेटकसीमसंस्थितवटस्याधः पृथोस्तत्र सः
प्राप्तः श्रेष्ठतमं मुहूर्तमतुलं ज्ञात्वा तदाऽतिष्ठिपत् ।
सूरीन् सौवकुलोदयाय भगवानष्टौ जगुस्त्वेककं
केचिद् वृद्धगणोऽभवद्वटगणाभिख्यस्तदादि ९९४ त्वयम् ॥५४॥"
इति मुद्रितगुर्वावल्यां पृष्ठ-५।

३ "अष्टहयेशमिते११७८ऽब्दे विक्रमकालाद्दिवं गतो भगवान् ।
श्रीमुनिचन्द्रमुनीन्द्रो ददातु भद्राणि संघाय ॥७२॥"
इति मुद्रितगुर्वावल्यां पृष्ठ-७।

પ્રૌઢતા શિષ્યપરિવાર આદિનો વિચાર કરતાં એમ અટકળ થાય છે કે-તેઓનું વય ૫૦-૬૦ વર્ષથી ઓછું ન હોવું જોઈએ. તેઓશ્રી ભગવાન્ શ્રી મહાવીરસ્વામિની ૩૯ મી પાટે થએલા શ્રી સર્વદેવસૂરિથી ધુરંધર આઠ [1]આચાર્યો થયા તેમાંથી ત્રીજા અને ૪૧ મી પાટે [2]આચાર્ય થયા.

(ख) શ્રી મુનિચન્દ્રસૂરિ શ્રી વિનયચંદ્ર વાચકના શિષ્ય હતા.[3] તેઓશ્રી નેમિચંદ્રસૂરિને હાથે આચાર્યપદ મેળવી તેમના

---

१ " तत्रोदियाय तमसामवसाय हेतु-
निस्तारकद्युतिधरो भुवनप्रकाशः ।
श्रीसर्वदेव इति साधुपतिर्न यस्य
पादो नवार्क इव सन्नतमीनकेतुः ॥ २ ॥
ततश्च श्रीयशोभद्रनेमिचन्द्रादयोऽभवन् ।
अष्टावाशागजाकाराः सूरयस्तुङ्गचेष्टिताः ॥ ३ ॥"
इति उपदेशपदवृत्तिप्रशस्तौ ॥

२ " शिष्यस्तत्र बभूव सद्गुणनिधिः श्रीसर्वदेवप्रभोः
रूपश्रीरिति भूपदत्तविरुदः श्रीदेवसूरिः ३८ प्रभुः ।
जज्ञेऽस्मान्महिमोदधिः पुनरपि श्रीसर्वदेवः ३९ गुरु-
स्तस्मादिग्द्विरदोपमाः समभवन्नष्टौ च सूरीश्वराः ॥६१॥
आद्यो यशोभद्रगुरुर्वितन्द्रः ४० सूरिर्द्वितीयः किल नेमिचन्द्रः ४० ।
ताभ्यामभूत् श्रीमुनिचन्द्रसूरिः ४१ स्वशेमुषीतर्जितनाकिसूरिः ॥६२॥
इति मुद्रितगुर्वावल्यां पृष्ठ-७ ॥

३ " उक्तं च—
गुरुबन्धुविनयचन्द्राध्यापकशिष्यं स नेमिचन्द्रगुरुः ।
यं गणनाथमकार्षीत् स जयति मुनिचन्द्रसूरिगुरुः ॥६३॥ "

પટધર થયા હતા. તેઓના અનેક શિષ્યો [1]હતા પણ તે બધામાં વધારે પ્રસિદ્ધ વાદિ દેવસૂરિ થયા જેઓએ બાળકાળમાં પણ ગુણચંદ્ર નામના વિદ્વાનનો મદ ઉતાર્યો હતો. આ વાદી દેવસૂરિ તે છે કે જેઓએ ચોરાસી હજાર શ્લોક પ્રમાણ [2]સ્યાદ્વાદરત્નાકર નામનો ગ્રંથ લખ્યો છે. વાદી દેવસૂરિ માત્ર ગ્રંથના જ લેખક ન હતા. તેઓશ્રી વાદમાં પણ પ્રવીણ હતા તેથીજ તેઓએ સિદ્ધરાજજયસિંહની [3]રાજસભામાં ચોરાસી વાદિઓને જીતનાર દિગંબરાચાર્ય શ્રી કુમુદચંદ્રને વિવાદમાં પરાજિત કરેલ એટલુંજ નહીં પણ તેઓએ આખા જીવનમાં [4]ચોરાસી

---

१ " तस्मादभूदजितदेवगुरु ४२ र्गरीयान्

प्राच्यस्तपःश्रुतनिधिर्जलधिर्गुणानाम् ।

श्रीदेवसूरिरपरश्च जगत्प्रसिद्धो

वादीश्वरोऽस्तगुणचन्द्रमदोऽपि बाल्ये ॥ ७३ ॥

" वेदमुनीशमितेऽब्दे ११७४ देवगुरुर्जगदनुत्तरोऽभ्युदितः ।

श्रीमुनिचन्द्रगुरोरिति शिष्या बहवोऽभवन् विदिताः ॥७६॥ "

२ " स्याद्वादरत्नाकरतर्कवेधा मुदे स केषां नहि देवसूरिः । "

इति मुद्रितगुर्वावल्यां पृष्ठ ७-८ ।

" ८४ हजार स्याद्वादरत्नाकर ग्रन्थ हुंतो "

इति महोपाध्यायश्रीयशोविजयजीपत्रे ।

३ " येनार्दितश्चतुरशीतिसुवादिलोला-

लब्धोल्लसज्जयरमामदकेलिशाली ।

वादाहवे कुमुदचन्द्रदिगम्बरेन्द्रः

श्रीसिद्धभूमिपतिसंसदि पत्तनेऽस्मिन् ॥७४॥ "

इति मुद्रितगुर्वावल्यां पृष्ठ ८

४ " विक्रमार्कात् वेदसप्तरुद्र ११७४ प्रमितवत्सरे ।

भूरिसूरिगुणैराढ्या अभूवन् देवसूरयः ॥ १ ॥

પ્રસિદ્ધ વાદોમાં વિજયશ્રી મેળવી હતી. આચાર્ય શ્રી હેમચંદ્રે પણ વાદી દેવસૂરિનું જ પડખું સેવેલું. વાદી દેવસૂરિ જેવા અસાધારણ વિદ્વાન્ શિષ્યના ગુરૂ હોઈ શ્રીમાન્ મુનિચંદ્રસૂરિ [1]તર્ક-વિદ્યા આદિ ગુણોમાં તેમજ વાદલબ્ધિમાં સવિશેષ યોગ્ય હોય તે સ્વભાવિક છે. તેઓશ્રી ફક્ત એક સૌવીરનુંજ પાણી પીતા તેથી તેઓનું સૌવીરપાયી એવું [2]બિરૂદ હતું. એટલું જ નહીં

---

चतुर्युताशीतिमितान् यो जिगाय प्रवादिनः ।
वादी कुमुचन्द्रोऽपि जितो यैः सोऽपि लीलया ॥२॥ ते चामी—
बंभ अट्ठ ८ नव बुद्ध १७ भगव अट्ठारस ३५ जित्तय ।
सिव संाल ५१ दह भट्ट ६१ सत्त गंधव्व ६८ विजित्तय ।
जित्तदिगम्बर सत्त ७५ च्यारि खत्तिय ७९ दुइ जोइअ ८१ ।
इक धीवर ८२ इक भिल्ल ८३ भूमिपाडिअ इक भोइअ ८४ ।'
ता कुमुदचंद इय जित्त सवि अणहिलपुरि जब आविओ ।
वडगच्छ तिलय पहू देवसूरि, कुमुदह मद उत्तारिओ ॥१॥'
इति मुद्रितोपदेशसप्ततौ पृष्ठ ३७ ।

१ "इति सकलतार्किकवैयाकरणसैद्धान्तिकसहृदयकविचक्रचक्रवर्तिचारित्रचूडामणिसुगृहीतनामधेयश्वेताम्वराधिपश्रीमन्मुनिचन्द्रसूरिचरणसरसीरुह........................।"
इति मुद्रितस्याद्वादरत्नाकरप्रथमपरिच्छेदप्रान्ते पृष्ठ १२७ ।
"षट्तर्कीपरितर्ककेलिरसिको यः शैववादीश्वरं
प्रज्ञाधःकृतवाक्पतिं नृपसभे जित्वोग्रहेत्वाशुगैः ।
प्रत्यक्षं विदुषां चकार विजयश्रीभाजनं शासनं
वन्द्योऽसौ मुनिचन्द्रसूरिसुगुरुः केषां न मेधाजुषाम् ॥७०॥"
इति मुद्रितगुर्वावल्यां पृष्ठ-७।

२ "नित्यं पपौ काञ्जिकमेकमम्भस्तत्याज सर्वा विकृतीश्च सम्यग् ।
जिगाय यो भावरिपूंश्च सोऽयं श्लाघ्यो न केषां मुनिचन्द्रसूरिः ॥"
इति क्रियारत्नसमुच्चयप्रशस्तौ पृष्ठ-३०४ ।

પણ તેઓ વિશુદ્ધ ચારિત્રી અને પ્રખર તપસ્વી હતા. કારણ કે તેઓએ આજીવન સઘળી વિકૃતિઓનો ત્યાગ કરેલો વિગેરે ગુણોથી તે સમયમાં તેઓ ગૌતમ તુલ્ય ગણાતા. વળી તેઓશ્રીએ પોતાના ઘણા ગુરૂ બંધવોને દીક્ષા આપી પઠન પાઠન કરાવી આચાર્યપદે સ્થાપિત કર્યા હતા.

(ग) શ્રી **મુનિચંદ્રસૂરિ**ની ર૭ કૃતિઓ તો ઉપલબ્ધ છે. એ ઉપરાંત બીજી કૃતિઓ હોવાનો ઘણો સંભવ છે. તેઓની કૃતિઓ સ્વતંત્ર અને ટીકાત્મક એમ બે ભાગમાં વહેંચાઈ જાય છે.

(૧) **સ્વતંત્ર**—૧ અંગુલસિત્તરી ર આવશ્યકસપ્તતિ ૩ વનસ્પતિસપ્તતિ ૪ ગાથાકોશ ૫ અનુશાસનાંકુશકુલક, ૬ ઉપદેશામૃતકુલક ૭ ઉપદેશામૃતકુલક બીજું ૮ ઉપદેશપંચાશિકા ૯ ધર્મોપદેશકુલક ૧૦ ધર્મોપદેશકુલક બીજું ૧૧ પ્રાભાતિકસ્તુતિ સંસ્કૃત ૧ર મોક્ષોપદેશપંચાશિકા ૧૩ રત્નત્રયકુલક ૧૪ શોકહરઉપદેશકુલક ૧૫ સમ્યક્ત્વોત્પાદ વિધિ ૧૬ સામાન્યગુણોપદેશકુલક ૧૭ હિતોપદેશકુલક ૧૮ કાલશતક ૧૯ મંડલવિચારકુલક ર૦ દ્વાદશવર્ગ.

(ર) **ટીકાત્મક**—૧ લલિતવિસ્તરાપંજિકા ર અનેકાન્તજ-

---

सौवीरपायीति तदेकवारिपानाद् विधिज्ञो बिरुदं बभार ।
जिनागमाम्भोनिधिधौतबुद्धिर्यः शुद्धचारित्रिषु लब्धरेखः ॥६६॥
संविग्नमौलिर्विकृतीः समस्तास्तत्याज देहेऽप्यममः सदा यः ।
विद्वद्विनेयालिवृतप्रभावः प्रभागुणौघैः किल गौतमाभः ॥६७॥
आनन्दसूरिप्रमुखा मुनीश्वराः
श्लाघ्या न केषामिह तस्य बन्धवः ।
ये दीक्षिताः श्रीमुनिचन्द्रसूरिणा
प्रतिष्ठिताः सूरिपदे च शिक्षिताः ॥ ७१ ॥"

इति मुद्रितगुर्वावल्यां पृष्ठ ७ ।

યપતાકાપંજિકા ૩ [1]ઉપદેશપદવૃત્તિ ૪ દેવેંદ્રનરકેન્દ્રવૃત્તિ ૫ ધર્મબીંદુવૃત્તિ ૬ કર્મપ્રકૃતિટિપ્પન ૭ [2]સાર્ધશતકચૂર્ણિ.

એમની સ્વતંત્ર કૃતિઓનો વિષય જૈનતત્ત્વ-આચાર અને ઉપદેશ વિગેરેનો છે. ટીકાત્મક કૃતિઓમાં જૈન તર્કનો પણ સમાવેશ થાય છે. કારણ કે **અનેકાંતવાદજયપતાકા** એ તર્કપદ્ધતિએ લખાએલ સ્યાદ્વાદ વિષયક ગ્રંથ છે. જેના ઉપર તેઓની ટીકા છે. તેઓશ્રીની કૃતિઓ સંસ્કૃત અને પ્રાકૃત ગદ્ય અને પદ્ય એમ ઉભય પ્રકારની છે.

પ્રસ્તુત પ્રકરણની ટીકા સરલ સંસ્કૃત અને ગદ્યમાં છે. આ ટીકા [3]શ્રીચક્રેશ્વરસૂરિ આદિ વિદ્વાનો દ્વારા પાટણમાં પ્રમાણ કરાવી છે. તેનું શ્લોક પરિમાણ ૨૬૦૯ જેટલું છે. અને તેની રચના સંવત્ ૧૧૬૮ માં સોઢક નામના ગૃહસ્થની વસતિમાં થઈ છે. ખરેખર ઈતિહાસ કહે છે કે મધ્યમ કાલીન જૈન સાહિત્ય અગર ગુર્જર સાહિત્યનું કેન્દ્ર પાટણ હતું.

ઉપયોગિતા—જો કે પ્રસ્તુત ગ્રંથનો વિષય આપણે માટે પરોક્ષ છે પણ આપણું જ્ઞાન અત્યંત પરિમિત અને વિશ્વના એક રજકણ પુરતું પણ ન હોવાથી આપણે પરોક્ષ વિષયની ઉપેક્ષા ન

---

૧ સંવત્ ૧૧૭૪ માં રચાએલી છે. ૨ સંવત્ ૧૧૭૦ માં રચાએલી છે,

૩ " श्रीमच्चक्रेश्वरसूरिपुङ्गवैरपरकाविद्सहायैः ।
अणहिलपाटकनगरे विशोध्य नीता प्रमाणमियम् ॥३॥
प्रत्यक्षरं निरूप्यास्य ग्रन्थमानं विनिश्चितम् ।
अनुष्टुभां सहस्रे द्वे षट्शती च नवाधिके २६०९ ॥४॥
निष्पत्तिमागतेयं वस्वङ्गहराख्यवत्सरे ११६८ षष्ठ्याम् ।
कृष्णायां तु सहस्ये सोहिकसोढकसत्कवसतौ ॥ ५ ॥
इति देवेन्द्रनरकेन्द्रवृत्तिप्रशस्तौ पृ-१७१."

કરી શકીએ. તેમ કરતાં આપણે અપૂર્ણતામાં પૂર્ણતા માનવાનો જ ડોળ કર્યો ગણાય. આ રીતે જોતાં ગમે તે વિષય હોય તેનું જ્ઞાન મેળવવું અને તે સંબંધી જુદી જુદી માન્યતાઓ જાણી લેવી તે વિશેષ જિજ્ઞાસુનું પ્રાથમિક લક્ષણ હોવું જોઈએ. સ્વર્ગ અને નરકની કલ્પના માત્ર જૈન શાસ્ત્રમાં નથી દુનીયા ઉપરના પુનર્જન્મવાદી દરેક સંપ્રદાયે સ્વર્ગ અને નરકનું સામાન્ય તત્ત્વ સ્વીકારેલું છે. તેથી તે સંબંધીની જૈન માન્યતા જોવા ઈચ્છનારને આ ગ્રંથ ખાસ ઉપયોગી છે. જૈનશાસ્ત્રના ખાસ અભ્યાસિઓને તો આ ગ્રંથમાંથી સ્વર્ગ નરકને લગતું જેટલું વર્ણન મળશે તેટલું બીજે ક્યાંઈથી મળવું કઠણ છે. જેઓ સ્વર્ગ નરકની પુરાણગત વૈદિક તથા બૌદ્ધ માહિતી ધરાવતા હોય તેઓનો પણ સરખામણી ખાતર તે વિષયના બધા જૈનગ્રંથો જોવાનો શ્રમ આ એકજ ગ્રંથથી બચી શકે છે. દિગંબર શાસ્ત્રના અભ્યાસીઓ પણ આ ગ્રંથથી ઘણું જાણી શકે છે. કારણ આ એકજ ગ્રંથના અવલોકનથી સ્વર્ગ નરક સંબંધી શ્વેતાંબરીય સકલ શાસ્ત્રનું મંતવ્ય અનાયાસે જાણી શકાય છે. જૈન શાસ્ત્રના અધ્યાપકોને તો આ ગ્રંથ ઘણીજ નવી બાબતો શિખવી શકે છે. તેથી આ ગ્રંથ કેટલો ઉપયોગી છે એ વાત દરેક વાચકને લક્ષમાં આવી શકશે. ઉપયોગીતાનો આધાર અધિકારી ઉપર છે. જે વસ્તુ અમુક માટે બહુ ઉપયોગી હોય તે બીજા માટે ઉપયોગી ન પણ હોય તેથી કાંઈ તેની સામાન્ય ઉપયોગીતા બાધિત થતી નથી.

આ રીતે જોતાં સ્વર્ગ અને નરકના વિશેષ જિજ્ઞાસુઓ માટે આ ગ્રંથ ખાસ ઉપયોગી જણાયાથી તેને પ્રકાશિત કરવા પ્રયાસ લીધેલો છે. સાથે સાથે એક પ્રાચીન અને અપૂર્વ ગ્રંથનો ઉદ્ધાર પણ થઈ જાય છે.

**પુસ્તકપ્રાપ્તિ**—પ્રસ્તુત ગ્રંથ તૈયાર કરવામાં ફક્ત એકજ હસ્ત લિખિત પ્રતિનો આશ્રય લીધેલો છે. કારણ કે અનેક સ્થળે શોધ કર્યા છતાં બીજી પ્રતિ મળી શકી નહી. જે પ્રતિ મળી હતી તે **પૂનાના ભાંડારકર ઇન્સ્ટટ્યુટની** છે. આ પ્રતિ **શ્રીયુત–જિનવિજયજી** મારફતે મેળવી છે તે બદલ તે સંસ્થા અને **શ્રીયુત–જિનવિજયજી** એ બન્નેનો આભાર માનીએ છીએ.

**અંતિમ નિવેદન**—અમને જે પ્રતિ મળી છે તેનાં ૧૦૨ પત્ર છે. ૧૩ ઇંચ લાંબી અને પાંચ ઇંચ પહોળી છે. તેના દરેક પેજમાં સત્તર લાઇનો આવેલી છે. આ પ્રતિ સુંદર જૈન લિપિથી લખાએલ છે. આ પ્રતિમાં ત્રણ ગ્રંથો લખેલા છે. તેમાં પત્ર ૧ થી ૪૩ સુધી **શાસ્ત્રવાર્તાસમુચ્ચય સ્વોપજ્ઞ ટીકા** સાથે, ૪૩ થી ૬૪ સુધીમાં **શ્રાવકધર્મવિધિ પ્રકરણવૃત્તિ** અને ૬૪ થી ૧૦૨ સુધીમાં **દેવેન્દ્રનરકેંદ્રકપ્રકરણ સટીક** છે. આ પ્રતિની અંતિમ લાઇનનો કોઇએ નાશ કર્યો છે. નહીં તો પ્રતિ લખ્યાનો સંવત્ અને લેખકનું નામ ગામાદિ મળી આવવા સંભવ હતો. આ પ્રતિની સ્થિતિ અને લિપી જોતાં ૪૦૦ વર્ષ પહેલાની હોવાનો સંભવ છે. આ પ્રતિ ઘણીજ અશુદ્ધ હતી. તેમજ ઘણે ઠેકાણે પાઠો પરાવર્તિત થએલા અને પાઠો પડી ગએલા હતા. જેના ઉપરથી પ્રસ્તુત પુસ્તકને શુદ્ધરૂપમાં મૂકવાનું કામ મ્હારા માટે જો કે ઘણું કઠણ હતું તથાપિ સહયોગિ મુનિની ખાસ સહાય મળવાથી આ પુસ્તક ઘણે ભાગે શુદ્ધરૂપ થઇ ગયું છે.

પુસ્તકનું સંશોધન કરતી વખતે બનતી કાળજી રાખ્યા છતાં કોઇ ત્રુટિ નહીં રહી હોય તેમજ અક્ષર યોજક કે દૃષ્ટિદોષથી કોઇ સ્થળે ભૂલ નહી રહી હોય એમ કહી શકાય નહીં તેથી વિશેષ દર્શિઓ સંશોધન કરી લેશે એમ ઇચ્છી વિરમું છું. **લેખક—સંપાદક.**

# દેવેન્દ્ર-નરકેન્દ્રક પ્રકરણનો વિષયાનુક્રમ.


| ગાથા. | વિષય. |
| --- | --- |
| | **નરકેન્દ્ર પ્રકરણ.** |
| ૧ | મંગળ અને ગ્રંથનું વક્તવ્ય. |
| ૨–૧૩ | રત્નપ્રભાદિ નરકોમાં નરકેન્દ્રકોની સંખ્યા, તેનાં નામ અને એકંદર સંખ્યા. |
| ૧૪–૧૯ | દિશા અને વિદિશામાં રહેલ શ્રેણિગત નરકાવાસોનું ક્રમોત્ક્રમથી સંખ્યા પ્રમાણ. |
| ૨૦–૨૪ | સીમંતક આદિ નરકેન્દ્રકોની પૂર્વાદિ દિશામાં રહેલ શ્રેણિગત આદ્ય નરકાવાસનાં નામો. |
| ૨૫–૩૪ | સીમંતક આદિ નરકેન્દ્રકોની પૂર્વાદિ દિશામાં રહેલ શ્રેણિગત દ્વિતીયાદિ નરકાવાસનાં નામો. |
| ૩૫–૩૬ | પ્રકીર્ણક નરકાવાસનાં નામોનો નિર્દેશ. |
| ૩૭–૩૮ | નરકોના પ્રસ્તટોની એકંદર સંખ્યા અને પ્રથમ પ્રસ્તટમાં રહેલ શ્રેણિગત નરકાવાસોનું પ્રમાણ. |
| ૩૯–૪૨ | રત્નપ્રભાદિ નરકોના દ્વિતીયાદિ પ્રસ્તટોમાં રહેલ શ્રેણિબદ્ધ નરકાવાસોની સંખ્યા જાણવાની રીત. |
| ૪૩ | પંક્તિબદ્ધ નરકાવાસની સંખ્યા ઉપરથી તેટલા નરકાવાસો કઈ નરકના કયા પ્રસ્તટમાં છે એ જાણવાની રીત. |
| ૪૪–૪૮ | સાતમી નરકના અપ્રતિષ્ઠાન પ્રસ્તટથી નરકાવાસોની સંખ્યા જાણવાની રીત. |
| ૪૯–૫૫ | પ્રત્યેક તથા સમગ્ર નરકના પંક્તિબદ્ધ નરકાવાસો જાણવાની રીત. |
| ૫૭–૬૫ | રત્નપ્રભાદિ નરકમાં રહેલ પંક્તિબદ્ધ તથા પંક્તિબાહ્ય (પ્રકીર્ણક) નરકાવાસોની જુદી જુદી સંખ્યા. |
| ૬૬–૬૭ | પ્રકીર્ણક તથા શ્રેણિબદ્ધ નરકાવાસોનું સ્થાન. |

૬૮–૭૮ પ્રત્યેક નરકની એક દિશામાં રહેલ શ્રેણિગત નરકાવાસો પૈકી ગોળ ત્રિકોણ અને ચોખંડા કેટલા ? એ જાણવાની રીત.
૭૯–૮૪ પ્રત્યેક નરકમાં એક દિશાગત ગોળ ત્રિકોણ અને ચોખંડા પંક્તિબદ્ધ નરકવાસોની સંખ્યા.
૫–૮૯ પ્રત્યેક નરકમાં દિશા અને વિદિશાના પંક્તિબદ્ધ ગોળ આદિ નરકાવાસોની એકંદર સંખ્યા જાણવાની રીત.
૯૦–૯૫ પ્રત્યેક નરકમાં દિશા અને વિદિશાના પંક્તિબદ્ધ ગોળ આદિ નરકાવાસોની એકંદર સંખ્યા.
૯૬–૯૮ સાતે નરકના દિશા અને વિદિશાના પંક્તિબદ્ધ ગોળ આદિ નરકાવાસોની સંખ્યા જાણવાની રીત તથા તેની સંખ્યા.
૯૯–૧૦૧ સાતે નરકના દિશા–વિદિશા ઉભયના ગોળ આદિ નરકાવાસોની સંખ્યા જાણવાની રીત તથા તેની સંખ્યા.
૧૦૨ નરક પૃથ્વીની જાડાઇ.
૧૦૩–૧૦૯ નરક પૃથ્વીમાં પ્રસ્તટના આંતરા જાણવાની રીત અને તેના આંતરાનું પ્રમાણ.
૧૧૦ સાતે નરકના, એક દિશામાં રહેલ, ગોળ આદિ નરકાવાસોની એકંદર સંખ્યા જાણવાની રીત.
૧૧૧–૧૨૬ સાતે નરકમાં તથા પ્રત્યેક પ્રસ્તટમાં જઘન્ય ઉત્કૃષ્ટ આયુષ્ય અને તે જાણવાની રીત.
૧૨૭ નરકેન્દ્રક પ્રકરણનો ઉપસંહાર.

## દેવેન્દ્રક પ્રકરણ.

૧૨૮- મંગળ અને અભિધેય.
૧૨૯–૧૩૦ વૈમાનિકમાં દેવેંદ્રકોનુ ભિન્ન ભિન્ન પરિમાણ તથા તેની એકંદર સંખ્યા.
૧૩૧–૧૩૭ દેવેન્દ્રકનાં નામો.
૧૩૮ ઉડુનામક દેવેન્દ્રકની ચાર દિશામાં આવેલ પંક્તિબદ્ધ વિમાન પૈકી આદ્ય વિમાનનાં નામો

૧૩૯-૧૪૫ ઉડુનામક દેવેંદ્રકની પૂર્વ દિશાનાં પંક્તિબદ્ધ શેષ વિમાનનાં નામો.

૧૪૬ ઉડુનામક દેવેન્દ્રકની અન્ય દિશામાં રહેલ પંક્તિબદ્ધ શેષ વિમાનનાં નામો. ( ટીકામાં અન્ય દેવેંદ્રકોની પૂર્વાદિ દિશાગત નામોનો નિર્દેશ. )

૧૪૭ પ્રકીર્ણક વિમાનનાં નામોનો નિર્દેશ

૧૪૮-૧૬૧ ઉડુઆદિ પ્રસ્તટોમાં પૂર્વાનુપૂર્વી તથા પશ્ચાનુપૂર્વી ક્રમથી પંક્તિબદ્ધ વિમાનોનું પ્રમાણ જાણવાની રીત આદિ.

૧૬૨-૧૬૪ પ્રત્યેક દેવલોકમાં પંક્તિબદ્ધ-પંક્તિબાહ્ય વિમાનની એકંદર સંખ્યા.

૧૬૫-૧૬૬ પ્રત્યેક દેવલોકમાં આવલિકાપ્રવિષ્ટ તથા પ્રકીર્ણક વિમાનનું પ્રમાણ જાણવાની રીત.

૧૬૭-૧૮૦ પ્રત્યેક દેવલોકના આવલિકાપ્રવિષ્ટ તથા પ્રકીર્ણક વિમાનોની સંખ્યા.

૧૮૧-૧૮૩ સર્વ દેવલોકના આવલિકાપ્રવિષ્ટ, પ્રકીર્ણક અને ઉભયની એકંદર સંખ્યા.

૧૮૪-૧૯૬ પ્રત્યેક પ્રસ્તટમાં તથા પ્રત્યેક દેવલોકમાં પંક્તિબદ્ધ વિમાનો પૈકી વૃત્તઆદિનું પ્રમાણ જાણવાની રીત,

૧૯૭-૨૦૬ પ્રત્યેક દેવલોકના વૃત્તાદિ વિમાનનું પ્રમાણ.

૨૦૭-૨૦૮ સર્વ દેવલોકની એક દિશામાં રહેલ તેમજ ચારે દિશામાં રહેલ પંક્તિબદ્ધ વૃત્તાદિ વિમાનની એકંદર સંખ્યા જાણવાની રીત તથા તેની સંખ્યા.

૨૦૯-૨૧૪ સૌધર્મ ઈશાન સનત્કુમાર અને માહેન્દ્ર દેવલોકમાં જે વિમાનો જે ઇંદ્રનાં છે તેનો વિભાગ.

૨૧૫ બ્રહ્મ આદિ દેવલોકના ઇંદ્રોનાં વિમાનોનો વિભાગ.

૨૧૬ સૌધર્મ ઇશાન દેવલોકનાં વિમાનોનો વિભાગવાર નિર્દેશ.

૨૧૭-૨૨૬ સૌધર્મ ઇશાનનાં વૃત્તાદિ વિમાનોનું વિભાગવાર પ્રમાણ જાણવાની રીત અને તેની સંખ્યા.

૨૨૭-૨૩૧ સૌધર્મ ઇશાનનાં પંક્તિબદ્ધ સર્વ વિમાનોનું એકંદર પ્રમાણ જાણવાની રીત અને તેની સંખ્યા.

૨૩૨-૨૩૩ સૌધર્મ ઇશાનગત પ્રકીર્ણક વિમાનનું પ્રમાણ.

૨૩૪-૨૪૧ તૃતીય ચતુર્થ દેવલોકનાં પંક્તિબદ્ધ વિમાનોનું પ્રમાણ જાણવાની રીત.

૨૪૨-૨૪૪ તૃતીય ચતુર્થ દેવલોકનાં પંક્તિબદ્ધ વિમાનોનું તથા પ્રકીર્ણક વિમાનોનું પ્રમાણ.

૨૪૫-૨૪૬ વૃત્તાદિ વિમાનોનું તિર્યગ્ તથા ઉર્ધ્વ અવસ્થાનનું સ્વરૂપ.

૨૪૭ વૃત્તાદિનું સ્વરૂપ.

૨૪૮-૨૫૦ વૃત્તાદિમાં કેટલા દરવાજા ઇત્યાદિ.

૨૫૧ વિમાનોના આકાર.

૨૫૨ પુષ્પાવકીર્ણકો કઇ દિશામાં છે તે.

૨૫૩-૨૫૫ પંક્તિબદ્ધ વિમાનો જે દ્વીપાદિ ઉપર જેટલાં છે તેનાં નામો તથા તેની સંખ્યા અને તેનું અંતર.

૨૫૬-૨૫૯ ઉર્ધ્વલોકના પ્રસ્તટોનાં આંતરા ઇત્યાદિ.

૨૬૦-૨૬૨ ઇંદ્રક તથા પ્રકીર્ણક વિમાનોની લંબાઇ પહોળાઇ.

૨૬૩-૨૬૭ સૌધર્મ ઇશાનના ખાસ પોતાનાં પાંચ વિમાનોનાં નામ અને જે પ્રસ્તટમાં છે તેનો નિર્દેશ.

૨૬૮-૨૭૫ ત્રાયસ્ત્રિંશ સામાનિક લોકપાલ આદિનાં વિમાન.

૨૭૬-૨૭૯ ઉપરના દેવલોકમાં ત્રાયસ્ત્રિંશ આદિના નિવાસસ્થાનનું નિરૂપણ.

૨૮૦-૨૮૧ અગ્રમહીષીઓની સંખ્યા અને તેના ઉત્તરવૈક્રિય શરીરની સંખ્યા.

૨૮૨-૨૮૮ સૌધર્મની પોતાની જીંદગીમાં જઘન્યાયુષ્ક ઉત્કૃષ્ટાયુષ્ક દેવીઓ કેટલી થાય તેની સંખ્યા આદિ.

૨૮૯-૨૯૦ દેવીઓનું રહેઠાણ.

૨૯૧-૨૯૪ સૌધર્મ-ઇશાનેન્દ્રનાં ખાસ પોતાનાં પાંચ વિમાનોની લંબાઇ પહોળાઇ અને તેની પરિધિ.

૨૯૫-૨૯૬ સર્વ દેવજાતિનું દેહપ્રમાણ.

૨૯૭-૩૦૯ વૈમાનિક દેવોના આયુષ્ય ઉપરથી તેમના દેહપ્રમાણને જાણવાની રીત અને દેહપ્રમાણ આદિ.

૩૧૦-૩૨૦ કલ્પવિમાનોના આધાર ( ઘનોદધિ આદિ ), સંસ્થાન, શાશ્વતપણું, ઉંચાઇ, વિસ્તાર, વર્ણ, માન અને ગંધ આદિનું નિરૂપણ.

૩૨૧-૩૩૩ દેવતાઓના ઉપપાત ( આગતિ ), ઉપપાત, પરિમાણ, અંતર ઉંચાઇ, સંઘયણ, સંસ્થાન, ગંધ, સ્પર્શ, ઉચ્છ્વાસ, અને આહારનું સ્વરૂપ

૩૩૪-૩૪૪ દેવતાઓના લેસ્યા, દૃષ્ટિ, જ્ઞાન, ઉપયોગ, યોગ, સમુદ્ઘાત, ઇંદ્રિય, શાતા અને ઋદ્ધિનું નિરૂપણ.

૩૪૫-૩૫૧ દેવતાઓના વિભૂષા (શણગાર આદિ), પ્રવીચાર ( મૈથુન ), આયુષ્ય, ચ્યવન ( મરણ ), ઉપપાતનું સ્વરૂપ.

૩૫૨-૩૬૦ રત્નપ્રભાદિ સાત નરકોને કલ્પનાથી લોકાન્તમાં સ્થાપતાં કઇ નરકપૃથ્વી કયા દેવલોકમાં આવે ઇત્યાદિ.

૩૬૧-૩૭૭ સૌધર્મ આદિમાં દરેક પ્રસ્તટમાં જઘન્ય ઉત્કૃષ્ટ આયુષ્ય જાણવાની રીત તથા તેનાં આયુષ્યનું નિરૂપણ.

૩૭૮ ઉપસંહાર.

નમો નમઃ શ્રી ગુરુ પ્રેમસૂરયે

# देवेन्द्र-नरकेन्द्रप्रकरणम् ।

## ( तत्र नरकेन्द्रप्रकरणम् )

पुण्येतराचरणसञ्चितकर्मपाकस्थानप्रपञ्चनपरः प्रससार यस्य ।
आयोजनक्षितितलामृतवारिवाहो, वाग्विस्तरस्ततयशा जयतात्स वीरः ॥१॥

देवेन्द्रनरकेन्द्राख्यग्रन्थवृत्तिमुपक्रमे ।
किञ्चिदगुरूपदेशेन, स्वपरानुगृहीतये ॥ २ ॥

वाचनाया विशेषोऽस्मिन्, सूत्रे यः कश्चिदीक्ष्यते ।
प्रकृत( एतद् ) व्याख्यानुसारेण, स व्याख्येयो विचक्षणैः ॥३॥

इह चाचार्यः कलुषकालबलावलुप्ताद्भुतभूतमतिवैभवानत एव बहुबुद्धि-बोध्यविमानप्रज्ञप्ति—नरकविभक्तिप्रभृतिप्रकीर्णकश्रुतावधारणप्रवणान्तः-करणानवलोक्यैदंयुगीनमानवांस्तदनुजिघृक्षयैव तदुद्धारभूतं देवेन्द्रनर-केन्द्रकाख्यं प्रकरणं चिकीर्षुः साक्षादेव विघ्नोपशमकतया शिष्टसमाचार-

१ ग्रन्थेऽस्मिन् वृत्त ( ) कोष्ठान्तर्गतः पाठः मूलप्रतिगताशुद्धपाटस्थाने चतुःस्र [ ] कोष्ठान्तर्गतश्च पतित इति नव्यः संकलितो ज्ञेयः ।

तया च मङ्गलं प्रेक्षावत्प्रवृत्त्यर्थं चाभिधेयं सामर्थ्याक्षिप्तं प्रयोजनं संबन्धं चोपदिदर्शयिषुरादावेवेमां गाथामाह—

**सिद्धे निद्धंतरए, केवलवरनाणदंसणसमिद्धे ।**
**अभिवंदिऊण सिरसा, विमाणणरइंदए वोच्छं ॥ १ ॥**

'सिद्धान्' "षिधू शास्त्रे माङ्गल्ये च" इतिवचनाद् भवजलधिमध्यमज्जज्जनजातसमुत्तारणप्रवणप्रवरप्रवहणप्रतिमप्रवचनानुशासकान् ईतिदुर्भिक्षमारिप्रभृतिविविधविप्लववारनिवारकातिशायिशुभानुभाववशेन प्राप्तपरममङ्गलभावांश्चार्हत इति, यद्वा "षिधू संराद्धौ" इतिवचनात्सिध्यन्ति स्म—निष्ठितार्था अभूवन्निति सिद्धाः—शिवाचलारुजादिस्थानवर्तिनो जीवविशेषास्तान् । उभयानपि कीदृशान्? इत्याह—'निर्ध्मातरजसः' नितरामपुनर्भविष्णुतया ध्मातं—ज्वलज्ज्वलनज्वालाकल्पाविकल्पशुक्लध्यानतो भस्मभावमापादितम्, एकत्र जीववसनरञ्जकत्वाद्रजो—रागवेदनीयं कर्म तत्क्षयाक्षिप्तक्षयत्वेन शेषघातिकर्म च, अन्यत्र च जीवावगुण्डकत्वेन रजोरूपत्वाद्रजः—सर्वमपि कर्म यैस्ते तथा तान् । अथवा निर्गते—विनष्टे ध्वान्तरते—अज्ञानकामक्रीडालक्षणे सर्वदोषहेतू येषां ते तथा तान् । केवले—ज्ञानान्तरविरहितत्वादसहाये वरे—क्षायिकत्वात्प्रधाने ये ज्ञानदर्शने—विशेषसामान्यावबोधरूपे ताभ्यां समृद्धाः—सम्यग्वृद्धिमनुप्राप्ता ये ते तथा तान् । किम्? इत्याह—'अभिवन्द्य' प्रणत्य 'शिरसा' मस्तकेन विमाननरकेन्द्रकान् 'वक्ष्ये' अभिधास्ये । विमानेन्द्रका नाम—उडुविमानादयः सर्वार्थसिद्धिविमानपर्यवसाना आवलिकाप्रविष्टविमानमालागणनामूलभूतत्वेन विमानेषु मध्ये इन्द्रा इवेन्द्रका ऊर्ध्वलोकगता द्वाषष्टिः, तदेकश्रेणिप्रतिबद्धतया चोपचारादन्यान्यप्या-

चलिकाप्रविष्टानि विमानानि विमानेन्द्रका इत्युच्यन्ते । एवं नरकेन्द्रका अपि सीमन्तकादयोऽप्रतिष्ठानान्ता अधोलोकगता एकोनपञ्चाशत्, तन्मूलकाश्चान्येऽप्यावलिकागता नरकावासा नरकेन्द्रका वाच्या इति । अत्र "सिद्धानभिवन्द्य" इति मङ्गलमुक्तम्, सिद्धाभिवन्दनस्य सकलाकुशलकलापनिर्मूलोन्मूलनक्षमत्वेन भावमङ्गलत्वात् । "विमाननरकेन्द्रान् वक्ष्ये" इत्यनेन त्वभिधेयम्, तेषामेवात्राभिधातुमभिलषितत्वात् । संबन्धस्त्वभिधानाभिधेयलक्षणोऽभिधेयनिर्देशेनैवावगत इति न साक्षादुक्तः । प्रयोजनं पुनः शास्त्रप्रणयनस्य परार्थतया प्रवृत्तत्वेन कर्तुरनन्तरं सत्त्वानुग्रहः, श्रोतुश्च प्रकरणार्थाधिगमः; परम्परं तूभयोरपि समस्तातङ्कपङ्कविकलोऽपवर्गः, सकलस्यापि कुशलानुष्ठानस्य सिद्धिसौधरोहं प्रत्यवन्ध्यकारणत्वादिति ॥ १ ॥ सांप्रतं "यच्चार्चितं द्वयोः" इति न्यायाद्विमानेन्द्रकाणां प्रथममुपन्यासेऽपि गुणस्थानकानामिव हीनादिक्रमतः सर्वभावानां शास्त्रे प्रज्ञापनमिति नरकेन्द्रकानेव प्रथमतः प्रज्ञापयन्नाह—

दह तियअहिया एगाहिया य नव सत्त पंच तिय एगो ।
णरइंदए कमो खलु, ओसरमाणो उ रयणाई ॥ २ ॥

दश त्र्यधिका नरकेन्द्रकास्त्रयोदशेतिभावः, तथैकाधिका दशेत्यनुवर्तते एकादशेति, यावत् नव सप्त पञ्च त्रय एको नरकेन्द्रक उक्तरूपः, एकारान्तताऽत्र "ए होइ अयारंते" इति प्राकृतलक्षणवशात् । अयं च 'क्रमः' संख्यापरिपाटिलक्षणः 'खलु:' वाक्यालङ्कारे 'अपसरंश्च' द्विकहान्या हीयमान एव । कीदृशः ? इत्याह—'रत्नादिः' पदैकदेशेऽपि पदसमुदायोपचारात्प्रभापृथिवीप्रभृतिकः । इदमुक्तं भवति—रत्नप्रभापृथिव्यां त्रयोदश नरकेन्द्रकाः, शर्कराप्रभायामेकादश, एवं यावत्तमस्तमःप्रभाया-

मेको नरकेन्द्रक इति ॥२॥ साम्प्रतं प्रतिनरकपृथिवि त्रयोदशादीनन-
न्तरमेवोद्दिष्टान् क्रमेण नरकेन्द्रकान्नामग्राहमभिधित्सुर्गाथादशकमाह—

सीमंतउ त्थ पढमो, बीओ उण रोरुउ त्ति नायव्वो ।
भंतो उण त्थ तइओ, चउत्थओ होइ उब्भंतो ॥ ३ ॥
संभंतमसंभंतो, विब्भंतो चेव सत्तमो णरओ ।
अट्ठमओ तत्तो पुण, णवमो सीउ त्ति णायव्वो ॥ ४ ॥
वक्कंतमवक्कंतो, विक्कंतो चेव रोरुओ णरओ ।
पढमाए पुढवीए, तेरस नरइंदया एते ॥ ५ ॥

'सीमन्तकः' सीमन्तकनामा 'अत्र' नरकेन्द्रकेषु मध्ये 'प्रथमः'
आदिभूतः । 'द्वितीयः' द्वितीयसङ्ख्यास्थानवर्ती 'पुनः' विशेषणे
'रोरुकः' रोरुकनामा ज्ञातव्यः । भ्रान्तः पुनरत्र तृतीयः । चतुर्थकः
'भवति' सम्पद्यते उद्भ्रान्त इति ॥ ३ ॥

संभ्रान्तः पञ्चमः, लिङ्गव्यत्ययश्च प्राकृतत्वात्, ज्ञातव्य इत्युत्तरेण
योगः, एवं सर्वत्र। असंभ्रान्तः षष्ठः, विभ्रान्तश्चैव सप्तमः 'नरकः' इति
पदैकदेशेऽपि पदसमुदायोपचारान्नरकेन्द्रकः । अष्टमकस्ततः, पुनर्नवमः
शीत इति ज्ञातव्यः ॥ ४ ॥

वक्रान्तो दशमः, लिङ्गव्यत्ययः प्राग्वत् । अवक्रान्त एकादशः,
विक्रान्तो द्वादशः, चैवेति समुच्चये, रोरुकस्त्रयोदशः 'नरकः' नरके-
न्द्रकः । एते च प्रथमायां पृथिव्यां 'त्रयोदश' इति सङ्ख्या 'नरकेन्द्रकाः'
महानगराकाराः क्लिष्टसत्त्वावासाः, 'एते' पूर्वोक्ता भवन्तीति । एत
एव किञ्चिन्नामपरावृत्त्यान्यत्रैवं दृश्यन्ते, यथा—"सीमन्तको मतः १
पूर्वो, नरको २ रोरुकस्ततः ३। भ्रान्तो ४ द्भ्रान्तौ ५ च संभ्रान्तः ६,

स्यादसंभ्रान्त इन्द्रकः ७ ॥१॥ विभ्रान्तश्च ८ तथा त्रस्तो ९, घर्मायां त्रसितस्ततः १० । वभ्रान्तश्च ११ ए(वभ्रान्तश्चाथ)वक्रान्तो १२, विक्रान्तश्च १३ त्रयोदशः ॥ २ ॥ " ॥५॥ अथ शर्कराप्रभायाम्—

थणिए थंणए य तहा, मणए वणए य होइ णायव्वे ।
घट्टे तह संघट्टे, जिब्भे अवजिब्भए चेव ॥ ६ ॥
लोले लोलावत्ते, तहेव थणलोलुए य बोधव्वे ।
बीयाए पुढवीए, एक्कारस इंदया एते ॥ ७ ॥

स्तनितः १ स्तनकश्च २ तथा मनकः ३ वनकश्च ४ भवति ज्ञातव्यः । घट्टः ५ तथेति समुच्चये सङ्घट्टः ६ जिह्वः ७ अपजिह्वः ८ चैवेति ॥६॥

लोलः ९ लोलावर्तः १० तथैव स्तनलोलुपश्च ११ बोद्धव्यः । द्वितीयायां शर्कराप्रभायां पृथिव्यामेकादश 'इन्द्रकाः' नरकेन्द्रका एत इति । एतेऽप्यन्यत्र किञ्चिन्नामभेदेनेत्थमवलोक्यन्ते, यथा—" नरकः १ स्तनकश्चैव २, मनको ३ वनकस्तथा ४ । घाट ५ संघाटनामानौ ६, जिह्वाख्यो ७ जिह्विकाभिधः ८ ॥ १ ॥ लोलश्च ९ लोलुपश्चापि १०, तथान्त्यः स्तनलोलुपः ११ । वंशायामिन्द्रका ह्येते, जिनैरेकादशोदिताः ॥ २ ॥ " इति ॥ ७ ॥ अथ वालुकाप्रभायाम्—

तत्तो तविओ तवणो, य तावणो पंचमो णिदाहो य ।
छट्ठो उण पज्जलिओ, उज्जलिओ सत्तमो णरओ ॥ ८ ॥
संजलिओ अट्ठमओ, संपज्जलिओ य णवमओ णरओ ।
तइयाए पुढवीए, एते णव होंति णरइंदा ॥ ९ ॥

तप्तः प्रथमः १ तपितो द्वितीयः २ तपनस्तृतीयः ३, 'चः' समु-

त्रये, तापनश्चतुर्थः ४ पञ्चमो निदाघश्च ५ षष्ठः पुनः प्रज्वलितः ६ उज्ज्वलितः सप्तमः ७ ' नरकः ' इति नरकेन्द्रकः ॥ ८ ॥

संज्वलितोऽष्टमकः ८ संप्रज्वलितश्च नवमको नरकः ९ । तृतीयायां वालुकाप्रभायां पृथिव्यामेते नव भवन्ति नरकेन्द्रकाः । अन्यत्राप्यभ्यधायि—"तप्तश्च तपितश्चान्यस्तपनस्तापनः परः । पञ्चमश्च निदाघाख्यः, षष्ठः प्रज्वलितो मतः ॥ १ ॥ तथैवोज्ज्वलितो ज्ञेयस्ततः संज्वलितोऽष्टमः । संप्रज्वलित इत्यन्त्यस्तृतीयायां नवेन्द्रकाः ॥ २ ॥ " इति ॥ ९ ॥ अधुना पङ्कप्रभायाम्—

**आरे तारे मारे, वच्चे तमए य होति णायव्वे ।**
**खाडखडे य खडखडे, इंदयणरया चउत्थीए ॥ १० ॥**

आरः १ तारः २ मारः ३ वर्चः ४ तमकश्च ५ भवति ज्ञातव्यः, खाडखडश्च ६ खडखडः ७ 'इन्द्रकनरकाः' नरकेन्द्रकाश्चतुर्थ्यां नरकपृथिव्याम् । एतदेवान्यत्र किञ्चिद्विशेषेण प्रत्यपादि, तद्यथा—" आरस्तारश्च मारश्च, वर्चस्कस्तमकस्तथा । खण्डः खडखडः सप्त, स्युश्चतुर्थ्यामितीन्द्रकाः ॥ १ ॥ " इति ॥ १० ॥ धूमप्रभायां पुनः—

**खाए तमए य तहा, झसे य अंधे य तह य तिमिसे य ।**
**एते पंचमपुढवीएँ पंच णरइंदया होंति ॥ ११ ॥**

खादः १ तमकश्च २ तथा झषश्च ३ अन्धकश्च ४ तथा च तमिस्रः ५ 'चः' पूरणे । एते पञ्चमपृथिव्यां पञ्च नरकेन्द्रका भवन्ति । एतदेव सविशेषमन्यत्राप्यवाचि—" तमो भ्रमो झषोऽन्धश्च, तमिस्रश्चेत्यमी स्मृताः । इन्द्रका नगराकाराः, पञ्चम्यां पञ्चसंमिताः ॥१॥ " इति ॥ ११ ॥ तमःप्रभामहातमःप्रभयोस्तु—

हिमवद्दललल्लुके, तिरिण य ग्णरइंदया उ छट्टीए।
एको य सत्तमाए, बोधव्वो अप्पइट्ठाणो ॥ १२ ॥

हिम १ वार्दल २ लल्लुकाः ३, एकारः प्राकृतत्वेन। एते त्रयो नरकेन्द्रकास्तु षष्ठयाम्। एकश्च सप्तम्यां बोद्धव्योऽप्रतिष्ठानो नरकेन्द्रक इति। अन्यत्राप्युक्तम्—"हिम १ वार्दल २ लल्लुकास्त्रयः ३ षष्ठयामपीन्द्रकाः। सप्तम्यामप्रतिष्ठानमेकमेवेन्द्रकं विदुः ॥ १ ॥" इति ॥ १२ ॥ इत्थं प्रतिपृथिवि इन्द्रकाणां लब्धसीमन्तकाद्याख्यानां संख्यां नामानि चाभिधाय साम्प्रतं सर्वसंख्यां पश्चानुपूर्वीक्रमं चाभिधित्सुराह—

एवं पुव्वणुपुव्वीएँ इंदया होंति अउणपरणासं।
पच्छाणुपुव्विए उण, एगादि दुरुत्तरा णिरया ॥१३॥

'एवं' त्रयोदशभ्यो द्वाभ्यां द्वाभ्यां हीनतया यावदन्त एक इत्यनेन क्रमेण 'पूर्वानुपूर्व्या' रत्नप्रभाप्रभृतिलक्षणया 'इन्द्रकाः' सीमन्तकनरकेन्द्रकादयोऽप्रतिष्ठानावसानाः 'भवन्ति' वर्तन्ते, कियन्तः? इत्याह—'एकोनपञ्चाशत्' एकेन हीना पञ्चाशदिति। 'पश्चानुपूर्व्या पुनः' तमस्तमःप्रभापृथिवीप्रभृतिलक्षणया 'एकादयः' एकप्रभृतयः, कीदृशाः? इत्याह—'द्व्युत्तराः' द्वौ द्वावुत्तरौ—वृद्धौ येषु ते तथा, 'निरयाः' निर्गतं—अपोढं अयः—इष्टफलं कर्म येभ्यस्ते तथा नरकेन्द्रका इति भावः। तद्यथा—एकस्तमस्तमःप्रभायाम्, त्रयस्तमःप्रभायाम्, पञ्च धूमप्रभायाम्, एवं द्व्युत्तरवृद्धया यावत्त्रयोदश रत्नप्रभायाम्, एवमप्येकोनपञ्चाशत्। अत्र च सीमन्तकादिनरकेन्द्रकसंबन्धात्समश्रेणिव्यवस्थितनरकावासरूपाः प्रस्तटा अप्येतन्नामान एतत्संख्याश्चावगन्तव्या इति ॥ १३ ॥ इत्थमिन्द्रकप्ररूपणां प्रतिपाद्य क्रमेण दिक्षु

विदिक्षु चावलिकाप्रमाणं प्रमाणतो गणनाप्रमाणतश्च प्रतिपादयन् गाथा-द्वयमाह—

एगूणपन्नणिरया, सेढी सीमंतगस्स पुव्वेणं ।
उत्तरओ अवरेण य, दाहिणओ चेव बोधव्वा ॥ १४ ॥

एकोनपञ्चाशन्निरया 'श्रेणिः' पङ्क्तिः 'सीमन्तकस्य' इति विभक्तिव्यत्ययात् सीमन्तकात् नारकावासात् 'पूर्वेण' पूर्वस्यां दिशि 'उत्तरतः' उत्तरस्यां दिशि 'अपरेण च' अपरस्यां दिशि 'दक्षिणतश्चैव' दक्षिणस्यां च दिशि 'बोद्धव्याः' एकोनपञ्चाशन्निरया प्रत्येकं श्रेणिर्ज्ञातव्या इति ॥ १४ ॥

अडयालीसं णिरया, सेढी सीमंतगस्स बोधव्वा ।
पुव्वुत्तरेण णिरया, एवं सेसासु विदिसासु ॥ १५ ॥

अष्टचत्वारिंशत् 'निरयाः' नारकावासाः, किम्? इत्याह—'श्रेणिः' पङ्क्तिः 'सीमन्तकस्य' इति सीमन्तकाद् रत्नप्रभाप्रथमप्रस्तटप्रथमनरकावासान्तमवधीकृत्येत्यर्थः, विभक्तिव्यत्ययश्च प्राकृतत्वात्, 'बोद्धव्याः' विज्ञेयाः 'पूर्वोत्तरेण' पूर्वोत्तरस्यां दिशि १ ईशानकोणयित्यर्थः। अतिदेशमाह—'निरयाः' उक्तलक्षणाः 'एवं' अनेन प्रकारेणाष्टचत्वारिंशल्लक्षणेन 'शेषासु' उत्तरपश्चिमा २ पश्चिमदक्षिणा ३ दक्षिणपूर्वालक्षणासु ४ विदिक्षु श्रेणयो भवन्ति। अत्र चैकोनपञ्चाशदष्टचत्वारिंशल्लक्षणं प्रमाणप्रमाणम्, प्रत्येकं ताश्चतस्र इति गणनाप्रमाणमवगन्तव्यमिति ॥ १५ ॥ एवं दिक्षु विदिक्षु च प्रतिप्रस्तटं श्रेणीषु प्रवृत्तासु सर्वपर्यन्तवर्तिनि प्रस्तटे यत्संपन्नं तदाह—

एक्केक्को य दिसासुं, मज्झे निरओ य अप्पइट्ठाणो।
विदिसाणिरयविरहियं, तं पयरं पंचगं जाण॥ १६॥

'एकैकश्च' पृथक्पृथक् एक एव 'दिक्षु' पूर्वादिषु चतसृष्वपि 'मध्ये' चकारस्य वक्ष्यमाणस्येहाभिसंबन्धान्मध्यभागे पुनश्चतुर्णामपि दिग्वर्त्तिनरकाणां 'निरयः' उक्तरूप एव 'अप्रतिष्ठानः' अप्रतिष्ठाननामा 'विदिशानिरयविरहितम्' विदिग्वर्तिभिर्निरयैः परिहीणं 'तम्' पर्यन्तवर्तिनं 'प्रतरं' प्रस्तटम्, कीदृशम्? इत्याह—'पञ्चकं' कालमहाकालादिपञ्चकनरकावासनिष्पन्नं 'जानीहि' अवबुध्यस्वेति॥१६॥

ननु कथमयमनन्तरगाथोक्तो वृत्तः? इत्याशङ्क्याह—

पुव्वाणुपुव्विएवं, पढमाओ अट्ठगूणियं सेसं।
पच्छाणुपुव्विए उण, अट्ठगवुड्ढी मुणेयव्वा॥ १७॥

'पूर्वानुपूर्व्या' रत्नप्रभापृथिवीप्रथमप्रस्तटप्रभृतिरूपया 'एवं' "एक्केक्को य दिसासु" (गाथा १६) इत्यादिगाथोक्तलक्षणं वस्तु सम्पद्यते, यतः 'प्रथमात्' सीमन्तकाभिधानान्नरकप्रस्तटात्सकाशात् 'अट्ठकोनितं' वीप्साप्रधानत्वादस्य शब्दस्याष्टकेन [अष्टकेन] नरकावासानामूनितं—परिहीणं कृतं प्रतिप्रस्तटम्, चतसृषु दिक्षु विदिक्षु च पर्यन्तवर्तिन एकैकस्य नरकस्य पातादितिभावः। किम्? इत्याह—'शेषं' प्रस्तटजातं वर्तते। ततो दिक्ष्वेकोनपञ्चाशतो विदिक्षु चाष्टचत्वारिंशतः प्रतिप्रतरमेकैकहानौ पर्यन्तप्रतरे दिक्ष्वेकैको विदिक्षु च न किञ्चिदितीन्द्रकमीलनेन पञ्च नरकावासा भवन्ति। इत्थमष्टकहानिं प्रतिपाद्य संप्रति पश्चानुपूर्व्या तथैव वृद्धिमाह—'पश्चानुपूर्व्या पुनः' अप्रतिष्ठानप्रस्तटप्रभृतिरूपया, किम्? इत्याह—'अष्टकवृद्धिः' प्रतिप्रस्तटमूर्ध्वं पञ्चन-

रकावासप्रमाणात्प्रतिष्ठानप्रस्तटात्सीमन्तकं यावदष्टाष्टनरकावासवृद्धि-र्गुणितव्येति ॥ १७ ॥ ततः किं सिद्धम् ? इत्याह—

**दो दो दिसासु णिरया, एक्केको आवि चउसु विदिसासु ।**
**लहुके सेढीयं, बीयं पयरं तु तेरसगं ॥ १८ ॥**

द्वौ द्वौ 'दिक्षु' पूर्वादिकासु 'निरयाः' उक्तनिरुक्ताः 'एकैकश्चापि' एकैक एव चतसृषु विदिक्षु नरकावासा भवन्ति, कस्मिन् ? इत्याह—'लहुके' पूर्वानुपूर्व्या तमःप्रभातृतीयप्रस्तटे । ततोऽपि किं सिद्धम् ? इत्याह—'श्रेणिरियं' दिक्षु नरकावासद्वयरूपा विदिक्षु चैकैकनरकावासरूपा । एवं सति किं सिद्धम् ? इत्याह—'द्वितीयं' अप्रतिष्ठानाद्वितीयस्थानवर्तिनं 'प्रतरं तु' प्रतरं पुनः 'त्रयोदशकं' त्रयोदशनरकावासप्रमाणं जानीयात्, दिग्वर्तिनामष्टानां विदिग्वर्तिनां चतुर्णामिन्द्रकस्य च मीलने एतत्संख्यासंभवादिति ॥ १८ ॥ शेषप्रस्तटातिदेशमाह—

**एक्केको य दिसासुं, एक्केको यावि चउसु विदिसासु ।**
**एस गमो णेयव्वो, पयरे पयरे उवरिहुत्तो ॥ १९ ॥**

'एकैकश्च' एकैक एव दिक्षु 'एकैकश्चापि' एकैक एव च चतसृषु विदिक्षु नरकावासः, वर्धत इति सामर्थ्याद्गम्यते । 'एषः' अष्टाष्टवृद्धिरूपः 'गमः' अर्थमार्गः 'ज्ञातव्यः' ज्ञेयः 'प्रतरे प्रतरे' प्रतिप्रतरमिति योऽर्थः, कथम् ? इत्याह–'उवरिहुत्तो'त्ति ऊर्ध्वमुखः । ततः सीमन्तकप्रस्तटे प्रत्येकं दिक्ष्वेकोनपञ्चाशत् विदिक्षु चाष्टचत्वारिंशन्नरकावासा भवन्तीति ॥ १९ ॥ संप्रति प्रथमप्रस्तटे चतुर्णां नरका-

वासानां सीमन्तकाह्वनरकेन्द्रकासन्नवर्तिनां पूर्वादिदिग्गतानां नामानि गाथाद्वयेनाह—

सीमंतगप्पभो खलु, णिरओ सीमंतगस्स पुव्वेणं।
सीमंतगमज्झिमओ, उत्तरपासे मुणेयव्वो ॥ २० ॥
सीमंतावत्तो उण, णिरओ सीमंतगस्स अवरेण।
सीमंतयावसिट्ठो, दाहिणपासे मुणेयव्वो ॥ २१ ॥

'सीमन्तकप्रभः' सीमन्तकप्रभनामा 'खलुः' वाक्यालङ्कारे निरयो मुणितव्य इतीहापि संबध्यते, कथम्? इत्याह—'सीमन्तकस्य' सीमन्तकान्नरकावासात् 'पूर्वेण' पूर्वस्यां दिशि, तथा 'सीमन्तकमध्यमकः' सीमन्तकमध्यमकनामा, क? इत्याह—'उत्तरपार्श्वे' सीमन्तकादेवोत्तरस्यां दिशि मुणितव्य इति ॥ २० ॥

सीमन्तकावर्तः पुनः 'निरयः' नरकावासः 'सीमन्तकस्य' सीमन्तकात् 'अपरेण' अपरस्यां दिशि, तथा 'सीमन्तकावशिष्टः' सीमन्तकावशिष्टनामा 'दक्षिणपार्श्वे' दक्षिणस्यां दिशि मुणितव्यः। यदत्र प्रतीतं दिक्क्रमं परित्यज्यान्यथा नरकावासनिर्देशः कृतः स नरकावासानाममङ्गलरूपत्वादुत्क्रम एवोचित इत्यस्यार्थस्य ख्यापनार्थ इति ॥ २१ ॥ अन्येष्वपि प्रस्तटेषु ये इन्द्रकसमीपवर्त्तिनश्चत्वारश्चत्वारो नरकावासास्तेषां नामनिर्देशायाह—

एवं नामविभत्ता, चउद्दिसिं होंति इंदयविभागा।
सेढीचरिमेसु नियमा, णिरयावासा वि लहुके ॥ २२ ॥

'एवं' अनेन प्रथमप्रस्तटेन्द्रकासन्नवर्तिनारकावासनामक्रमेण यानि नामानि तैर्विभक्ताः—विभागवन्तः 'चउद्दिसिं' ति चतुर्दिशि चतसृषु

दिक्ष्वित्यर्थः 'भवन्ति' वर्तन्ते, के ? इत्याह—'इन्द्रकविभागाः' आवलिकाप्रविष्टनरकावासलक्षणेन्द्रकविशेषाः । केषु नामेन्द्रकेष्वयं प्रज्ञापनाक्रमो नेयः ? इत्याह—'श्रेणिचरमेषु' प्रतिप्रस्तटं श्रेणिगता ये चरमाः—पश्चानुपूर्व्या मध्यगतेन्द्रकासन्नवर्तिनश्चत्वारश्चत्वारस्तेषु विषये 'नियमात्' निश्चयेन । अस्य नामनिर्देशस्यावधिमाह—निरयावासा अपिशब्दो भिन्नक्रमे, ततो 'लह्वकेऽपि' षष्ठपृथ्वीचरमप्रस्तटे किं पुनः शेषेषु ? इत्यपि शब्दार्थः, एवं नामविभक्ता बोद्धव्याः । इदमुक्तं भवति—यथा सीमन्तके प्रथमप्रस्तटे सीमन्तकप्रभादिना प्रकारेण चतुर्दिशीन्द्रकविभागो भणितस्तथा यावल्लह्वकः प्रस्तटस्तावदसौ ज्ञेयः । ततो लह्वकप्रभः पूर्वेण, लह्वकमध्यमक उत्तरेण, लह्वकावर्तोऽपरेण, लह्वकावशिष्टो दक्षिणेन । सप्तमपृथिव्यां तु श्रेणिव्यवहार एव नास्ति इत्यादिलक्षणत्वा-[भावा]त्तस्याः, अतो न तत्रेत्थं नामनिर्देश इति ॥ २२ ॥

अमुमेवार्थं स्फुटयन्नाह—

सीमंतगादिणामं, अमुंचमाणेण होंति वत्तव्वा ।
पत्थारे पत्थारे, चउण्ह जा पत्त लह्वके ॥ २३ ॥

सीमन्तकादिनाम' सीमन्तकरोरुकभ्रान्तोद्भ्रान्तादीनामष्टचत्वारिंशतो नरकेन्द्रकाणां नाम—संज्ञां 'अमुञ्चता' अपरित्यजता प्रज्ञापकेन भवन्ति वक्तव्याः, क्व ? इत्याह—'प्रस्तारे प्रस्तारे' प्रतिप्रस्तटमित्यर्थः । केषाम् ? इत्याह—'चतुर्णां' अगृहीतवीप्सोऽप्ययं शब्दः प्रस्तावाद् गृहीतवीप्सो द्रष्टव्यः, ततश्चतुर्णां चतुर्णां नरकावासानाम् । नामविभागाः कियद्दूरम् ? इत्याह—यावत्प्राप्तः 'लह्वके' षष्ठपृथिवीप-

र्यन्तवर्तिनि लङ्कनामन्यष्टचत्वारिंशतमप्रस्तट इति ॥२३॥ संप्रत्यप्र- तिष्ठानगतनरकावासप्रतिपादनायाह—

पुव्वेण होति कालो, अवरेणं अप्पइट्ठ महकालो।
रोरू दाहिणपासे, उत्तरपासे महारोरू ॥ २४ ॥

'पूर्वेण' पूर्वस्यां दिशि भवति 'कालः' कालनामा नरकावासः, 'अपरेण' अपरस्यां दिशि 'अप्पइट्ठ' ति अप्रतिष्ठानान्नरकावासात् 'महाकालः' महाकालनामा, तथा 'रोरुः' रोरुकाख्यः 'दक्षिण- पार्श्वे' दक्षिणदिग्भागे 'उत्तरपार्श्वे' उत्तरस्यां दिशि 'महारोरुः' महारोरुकाह्वः, अप्रतिष्ठानादिति सर्वत्र संबध्यते। अप्रतिष्ठानश्च साम- र्थ्यान्मध्ये। यदत्र शेषप्रस्तटप्रसिद्धमपसव्यक्रमं परित्यज्येत्थं नामनि- र्देशः कृतस्तत्कालादीनां [पूर्वोक्तशेषसर्वप्रस्तटनरकावासेभ्योऽशुभतमत्व- स्यापनाय ॥२४॥ अथ] सर्वनरकावासनामाभिधानायाह—

पढमबितिआउ पुव्वक्कमेण सीमंतगस्स सेढीए।
विज्जा नामविहत्तिं, अडयालीसाए णिरयाणं ॥ २५ ॥

'प्रथमद्वितीयात्' प्रथमः—पूर्वस्यां दिशि श्रेणिगतनरकावासापेक्षया सीमन्तकप्रभः, तस्माद्वितीयो यो नरकस्तस्मात्, ततः प्रभृतीत्यर्थः, 'पूर्व- क्रमेण' पदैकदेशेऽपि पदसमुदायोपचारात्पूर्वानुपूर्वीक्रमेण 'सीमन्तकस्य' सीमन्तकाह्वरत्नप्रभाप्रथमप्रस्तटस्य संबन्धिन्यां श्रेणौ विषयभूतायाम्, किम्? इत्याह—'विद्यात्' जानीयात् 'नामविभक्तिं' संज्ञाविभागम्, केषाम्? इत्याह—'अष्टचत्वारिंशतः' अष्टचत्वारिंशत्संख्याप्रमाणानां 'निरयाणां' उक्तनिरुक्तानाम् ॥ २५ ॥ तामेव गाथापञ्चकेनाह—

विलए विलप्प थणिए, आघाए घायए य बोद्धव्वे ।
कलिकालकरिणविज्जू, असणी इंदासणी चेव ॥ २६ ॥

विलयः १ विलात्मा २ स्तनितः ३ आघातः ४ घातकश्च ५ बोद्धव्यः । कलि ६ काल ७ कर्णि ८ विद्युतः ९ अशनिः १० इन्द्राशनिः ११ चैवेति ॥ २६ ॥

सप्पविसप्पे मुच्छियपमुच्छिए तह य लोमहरिसे य ।
खरफरुसअग्गिवेविय, उद्दड्ढए चेव विद्धड्ढे (ड्डे) ॥ २७ ॥

सर्प १२ विसर्पौ १३ मूर्छित १४ प्रमूर्छितौ १५ तथा च लोमहर्षश्च १६ खरपरुष १७ अग्नि १८ वेपिताः १९ उद्दग्धः २० चैव विदग्धः २१ इति ॥ २७ ॥

उव्वेयणए विज्जलविमुहे तह विच्छवी विहंगणू य ।
ओलट्टणपब्भट्ठे, रुट्ठविरुट्ठे य नट्ठे य ॥२८॥

उद्वेजनकः २२ विजल २३ विमुखौ २४ तथा विच्छविः २५ व्यधङ्गः २६ च अवलटन २७ प्रभ्रष्टौ २८ रुष्ट २९ विरुष्टौ ३० च नष्टः ३१ चेति ॥ २८ ॥

विगए विणए मंडलजिब्भे जरए तहेव पज्जरए ।
अपइट्ठिए य खंडे, पप्फुडिए पावदंडे य ॥ २९ ॥

विगतः ३२ विनयः ३३ मण्डल ३४ जिह्वौ ३५ ज्वरकः ३६ तथैव प्रज्वरकः ३७ अप्रतिष्ठितः ३८ च खण्डः ३९ प्रस्फुटितः ४० पापदण्डः ४१ चेति ॥ २९ ॥

पप्पडगपायए घायए य फुडिए तहेव बोधव्वे ।
काले खारे य तहा, लोले तह लोलपच्छे य ॥ ३० ॥

पर्पटकपाचकः ४२ घातकः ४३ च तथैव स्फुटितः ४४ बोद्धव्यः। कालः ४५ क्षारश्च ४६ तथा लोलः ४७ तथा लोलपाक्षश्च ४८। अत्र च गाथापञ्चके चादयः शब्दाः क्वचिद्गाथापूरणफलाः क्वचित्समुच्चयार्थाश्च व्याख्येया इति ॥३०॥ एवं पूर्वदिक्श्रेणिनरकावासनामानि निर्दिश्य प्रस्तुते योजयन् शेषदिग्गतश्रेणिवृत्तान्ताभिधानायाह—

**एवं पुरच्छिमाए, दिसाए निरयाण नामनिद्देसो।**
**सीमंतगसेढीसु उ, सेसासु इमं कमं जाण ॥ ३१ ॥**

'एवम्' उक्तक्रमेण 'पौरस्त्यायां' पूर्वस्यां दिशि निरयाणां नामनिर्देश आवलिकाप्रविष्टानां कृतः। 'सीमन्तकश्रेणिषु तु'. सीमन्तकात्प्रवृत्तासु श्रेणीषु पुनः 'शेषासु' उत्तरपश्चिमदक्षिणदिग्भागव्यवस्थितासु 'इमं' वक्ष्यमाणं 'क्रमं' परिपाटिं जानीहीति ॥३१॥ यथा—

**मज्झा उत्तरपासे, आवत्ता अवरओ मुणेयव्वा।**
**सिट्ठा दाहिणपासे, पुव्विल्लाओ विभइयव्वा ॥ ३२ ॥**

'मध्याः' मध्यशब्दोपपदा उत्तरपार्श्वे विलयविलात्मप्रभृतयो नरकावासा आवलिकाप्रविष्टा विज्ञेयाः। त एव 'आवर्त्ताः' आवर्त्तोपपदाः 'अपरतः' अपरस्यां दिशि मुणितव्याः। तथा 'शिष्टाः' इति शिष्टशब्दोपपदा विलयप्रभृतय एव दक्षिणपार्श्वे, किमुक्तं भवति?—पौरस्त्यात् नरकावाससङ्घातात् इच्छन्ति ( इत्थं त्रिः ) 'विभक्तव्याः' नामान्यपेक्षा च ( क्ष्याव ) शेषदिग्वर्तिनो विभागवन्तो विधेया नरकावासाः। इदमुक्तं भवति—पूर्वस्यां विलयो विलात्मा स्तनितः, एवमवशिष्टनामानोऽष्टचत्वारिंशदपि नरका वाच्याः। उत्तरस्यां पुनर्मध्यविलयो मध्यविलात्मा मध्यस्तनित इत्यादि। अपरस्यामावर्त्तविलय आवर्तवि-

लात्मा आवर्तस्तनित इत्यादि । दक्षिणस्यां शिष्टविलयः शिष्टविलात्म शिष्टस्तनित इत्यादीति ॥ ३२ ॥ एतद्भावनार्थं स्वयमेवाह—

विलयाईया पुव्वावलीओ मज्झाइ उत्तरावलिया ।
आवत्ताई अवरा, सिट्ठाई दाहिणावलिया ॥ ३३ ॥

इयं च गाथा भावितार्थैवेति ॥ ३३ ॥ इत्थं प्रथमप्रस्तटे [चतसृषु] दिक्ष्वावलिकागतनरकावासनामान्यभिधाय शेषप्रस्तटेष्वपि तान्यभिधातुमाह—

सेसा ते चेव भवे, णामा पुव्वावलीए जे भणिया ।
णरगावासाण पुणो, णामाइं समासओ सुणसु ॥ ३४ ॥

'शेषाणि' रोरुकादिलङ्कपर्यन्तप्रस्तटावलिकागतद्वितीयादिनरकावाससंबन्धीनि तानि चैव भवेयुः 'नामानि' अभिधानानि, तानि कानि ? इत्याह–'पूर्वावलिकायां' सीमन्तकसबन्धिन्यामुपलक्षणत्वाच्छेषदिगावलिकासु च यानि भणितानि, तानि चैवम्–यथा पूर्वावलिकायां विलयो विलात्मा स्तनित इत्यादि, उत्तरस्यां मध्यविलयो मध्यविलात्मा मध्यस्तनित इत्यादि, अपरस्यामावर्तविलय आवर्त्तविलात्मा आवर्तस्तनित इत्यादि, दक्षिणस्यां पुनः शिष्टविलयः शिष्टविलात्मा शिष्टस्तनित इत्यादि । किन्तु सीमन्तकादधोऽधः प्रतिप्रस्तटं सर्वावलिकासु पर्यन्ते नरकावासहानिक्रमेण नामहानिर्वाच्या । ये च रोरुकादीन्द्रकासन्नवर्तिनश्चत्वारश्चत्वारो नरकावासास्तेषां "एवं नामविभत्ता" (गाथा २२) इत्याद्युक्तग्रन्थन्यायेन नामनिर्देशोऽभिधानीय इति । एवं तावत्प्रतिप्रस्तटं नामनिर्दिशो नेयो यावल्लङ्कके ऽष्टचत्वारिंशत्तमप्रस्तटे लङ्कप्रभः लङ्कमध्यमः लङ्कावर्तः लङ्कावशिष्टः इद्रकानन्तरवर्तिनश्चत्वारो

नरकावासाः, तदनन्तरवर्तिनश्चत्वार एव क्रमेण विलयो मध्यविलय आवर्तविलयः शिष्टविलय इति। सांप्रतं सर्वानेव नरकावासान् दिग्गतावलिकाबाह्यानधिकृत्य नामान्याह—'नरकावासानां' क्लिष्टसत्त्वोत्पत्तिस्थानविशेषलक्षणानां शेषाणामित्युपस्कारः, पुनः 'नामानि' अभिधानानि 'समासतः' संक्षेपतः 'शृणु' अवधारय। श्रोतुर्दृढोपयोगसंपादनार्थमेतदिति ॥ ३४ ॥ तान्येवाभिधातुमाह—

वाही सवहा असुहा, जे अत्थी केइ जीवलोगम्मि।
तन्नामगा उ णिरया, असरिसनामा य बोधव्वा ॥ ३५ ॥

'व्याधयः' ज्वरातीसारभगन्दरोदरशूलप्लीहप्रभृतयः 'शपथाः' भग्नदलितमृतादिशब्दरूपा आक्रोशाः 'अशुभाः' स्वभावतः एवामङ्गलभूताः कालकङ्कालबिडालशृगालवेतालादयः पदार्था ये 'अत्थि'त्ति सन्ति केचित्, क? इत्याह—'जीवलोके' स्वर्गमर्त्यपाताललक्षणे, 'तन्नामकास्तु' तत्तुल्यनामान एव 'निरयाः' इन्द्रकदिग्गतावलिकाबाह्या नरकावासाः अत एव 'असदृशनामानः' शिष्टजनव्यवहरणीयनामविलक्षणत्वेनासदृशानि–अनुचितानि नामानि–अभिधानानि येषां ते तथा, 'चः' पूरणे, स्वरूपविशेषणमेतत् 'बोद्धव्याः' ज्ञातव्या इति ॥ ३९ ॥ एतदेव किञ्चित्सविशेषमाह—

संखेज्जइभागो खलु, दुरुत्तरो सव्वमसुभनामाणं।
णरया उ मुणेयव्वा, बहुविह एक्केकनामम्मि ॥ ३६ ॥

'संख्येयभागः' कोटीकोट्यादिभागरूपः कश्चिन्नरकावासवाचकत्वेन भवति ज्ञातव्यः। 'खलुः' वाक्यालङ्कारे, कीदृशः? इत्याह—'दुरुत्तरः'

दुष्टमुत्तरं—पर्यवसानफलं यस्य स तथा, तथाविधप्रयोजनारम्भे तन्नामश्रवणेऽमङ्गलभावात् । केषां ? इत्याह—' सर्वाशुभनाम्नां ' विश्वेषां दुष्टाभिधानानाम् । संख्यातरूपाणि चैतानि सर्वाक्षरसंयोगानां संख्यातत्वेन सर्वशुभाशुभनाम्नामपि संख्येयरूपत्वात् । अत्रैव किञ्चिद्विशेषमाह—' नरकास्तु ' नरकावासाः पुनः ' मुणितव्याः ' बोद्धव्याः ' बहुविधाः ' नानाप्रकाराः ' एकैकनाम्नि ' एकैकस्मिन् व्याध्यादिनाम्नि, यदेकस्य नाम तद्बहूनां नामेत्यर्थः ॥ ३६ ॥ सांप्रतं सामान्यतः प्रस्तटप्रमाणं प्रथमप्रस्तटावलिकागतनरकावासप्रमाणं चाभिधित्सुराह—

**एवं तु पत्थडा खलु, अउणापराणं तु होंति निरयाणं ।**
**तिरिण सया णिरयाणं, अउणाणउई य पत्थारे ॥ ३७ ॥**

'एवं तु' "सीमंतओ त्थ पढमो" (गा० ३) इत्यादिना पूर्वक्रमेणैव 'प्रस्तटाः' प्रतराः 'खलुः' वाक्यालङ्कारे एकोनपञ्चाशदेव तुशब्दस्यैवकारार्थत्वात् 'भवन्ति' वर्तन्ते, केषां प्रस्तटाः ? इत्याह—'निरयाणां' नरकावासानाम् । तत्र त्रीणि शतानि निरयाणामेकान्ननवतिश्च प्रस्तारे प्रथमे इति गम्यते ॥३७॥ इदमेव प्रथमप्रस्तटप्रमाणं व्यक्ततरमभिधातुमाह—

**णरइंदयपयरम्मि, पढमे संखा उ होंति सीमंते ।**
**तिरिण सया णिरयाणं, अउणाणउया मुणेयव्वा ॥ ३८ ॥**

' नरकेन्द्रकप्रतरे ' नरकेन्द्रकसंबन्धान्नरकेन्द्रकः स चासौ प्रतरश्चेति तत्र ' प्रथमे ' सर्वादिमे ' संखा उ ' त्ति संख्या पुनर्भवतीति 'सीमन्ते' इति सीमन्तकनाम्नि त्रीणि शतानि निरयाणां प्रतीतार्थमेतत्, कीदृशानि ? इत्याह—' एकोननवतानि ' एकोननवतिसमन्वितानि 'मुणितव्यानि' बोद्धव्यानि, लिङ्गव्यत्ययश्च प्राकृतत्वात्, एवमन्यत्राप्यसौ वाच्य इति ।

अयमत्र भावः–किल दिक्षु पृथक्पृथगावलिकाप्रविष्टा नरकावासा एकोनपञ्चाशद्, विदिक्षु चाष्टचत्वारिंशत्, उभयेषां मीलने चतुर्गुणत्वे इन्द्रकप्रक्षेपे च प्रस्तुतसंख्या निष्पद्यते, सा चेयम्–३८९ ॥ ३८ ॥
अथ द्वितीयादिप्रस्तटेष्वावलिकागतनरकावाससंख्याऽऽनयनोपायभूतं गाथाद्वयमाह:—

णरइंदयम्मि जो जम्मि इच्छती णिरयसेढिपरिमाणं ।
रूवूणं अट्ठगुणं, तं चेव तओ विसोहेज्जा ॥ ३९ ॥
मूलपयररासीओ, अउणाणउएहिं तिहिं सएहिंतो ।
वोसट्ठे जं सेसं, तं पयरं तम्मि संखायं ॥ ४० ॥

'नरकेन्द्रके' नरकप्रस्तटे 'यः' कश्चिदावलिकागतनरकावासप्रमाणं जिज्ञासुः 'यस्मिन्' द्वितीयादौ 'इच्छति' अभिलषति ज्ञातुमिति गम्यते, किम्? इत्याह–'निरयश्रेणिपरिमाणं' आवलिकागतनरकावाससंख्यानम्, स किं कुर्याद्? इत्याह–'रूपोनं' एकेन रूपेण हीनं सन्तं 'अष्टगुणं' अष्टाभिर्गुणितं 'तं चैव' तमेवेष्टप्रतरं 'ततः' तदनन्तरं 'विशोधयेत्' अपनयेत् ॥३९॥ कुतः? इत्याह–'मूलप्रतरराशितः' प्रथमप्रस्तटराशेः, किं लक्षणात्? इत्याह–एकोननवतेभ्यः त्रिभ्यः शतेभ्यः प्रतीतरूपेभ्यः सकाशात्, ततः 'व्युत्सृष्टे' परिहृते रूपोनेऽष्टगुणराशौ यत् 'शेषं' अवशिष्टमवतिष्ठते 'तद्' यद्विवक्षितं 'प्रतरं' प्रतरप्रमाणं 'तस्मिन्' अवशिष्टराशौ 'संख्यातं' कृतसंख्यं वर्तते । यथा–रत्नप्रभायामेव द्वितीयप्रस्तटसंख्या द्विरूपा एकोना क्रियते जात एकः, तस्मिन्नष्टगुणे त्रिभ्य एकोननवतेभ्यः शतेभ्योऽपनीते शेषं त्रीणि शतान्येकाशीत्यधिकानि, अङ्कतोऽपि३८१,

तत्तत्रावलिकागतनरकावासप्रमाणं भवति। एवं तावन्नेयं यावदप्रतिष्ठान-प्रस्तटेऽवशिष्टाः पञ्च नरकावासा इति ॥४०॥ एवं सीमन्तकादधस्ता-दिष्टप्रतरगतावलिकानरकावासप्रमाणं प्रतिपाद्य संप्रत्यप्रतिष्ठानादूर्ध्वं तत्प्र-तिपादयन्नाह—

जइमं इच्छसि सेणिं, उवरिमहुत्तो उ ठावए तइमं।
सा सेढी रूवूणा, अट्ठगुणा सपंचगं पयरं ॥ ४१ ॥

'जइमं' ति यत्प्रमाणां 'इच्छसि' वाञ्छसि 'ज्ञातुम्, काम्? इत्याह—'श्रेणिं' श्रेणिगतनरकावासप्रमाणवत्तया प्रस्तटं 'उवरिमहु-त्तो उ' त्ति ऊर्ध्वाभिमुखं पुनः 'स्थापयेः' न्यसेः त्वं 'तइमं' ति तत्प्रमाणाम्, ततः सा 'श्रेणिः' प्रतरप्रमाणरूपा रूपोनाऽष्टगुणा 'स पञ्चगं' ति सपञ्चका 'प्रतरं' प्रतरगतावलिकानरकावासप्रमाणं जा-नीहि। यथा—अप्रतिष्ठानादुपरि द्वितीयप्रस्तटो द्विरूपः स्थाप्यते, स चैकोनः सञ्जात एककः, तस्मिन्नष्टगुणे सपञ्चके च जातं प्रकृतं प्रस्तट-नरकावासप्रमाणं त्रयोदश। एवं सर्वत्र, यावत्सीमन्तके त्रीणि शतान्ये-कोननवतानि नरकावासानामिति ॥ ४१ ॥ सांप्रतं "नरइंदयम्मि जो जम्मि" इत्यादि (३९-४०) गाथाद्वयोक्तमेवार्थं प्रत्येकं रत्नप्रभादि-पृथ्व्याश्रयेणाह—

रूवूणमिट्ठपयरं, अट्ठगुणं पढमपत्थडग्गाओ।
सोहेत्तु जमवसेसं, णिरयग्गं रयणमाईणं ॥ ४२ ॥

'रूपोनं' रूपहीनम् 'इष्टप्रतरं' इष्टप्रतरसंख्यां त्रयोदशैकादशन-वाद्यन्तर्गतम्, किम्? इत्याह—अष्टगुणं सन्तं 'प्रथमप्रस्तटाग्रात्' प्रथम-प्रस्तटगतावलिकाप्रविष्टनरकावासप्रमाणात् 'सोहेत्तु' त्ति अपनीय यद-

'अवशेषं' अवशिष्टं दृश्यते तत् 'निरयाग्रं' निरयप्रमाणं जानीहि, कासाम् ? इत्याह—रत्नप्रभादीनां नरकपृथ्वीनामिष्टप्रस्तटेष्विति । यथा—रत्नप्रभायामिष्टप्रस्तटसंख्या त्रयोदश, ते च रूपोना अष्टगुणाश्च प्रथमप्रस्तटाग्रादेकोननवतशतत्रयप्रमाणाच्छोध्यन्ते ततो जातमिदं २९३ त्रयोदशप्रस्तटे । एवं द्वितीयादिपृथ्वीष्वपि प्रथमप्रस्तटाग्रं स्वयमेवाभ्यूह्य एकादशाद्यन्तर्गताभीष्टप्रस्तटाश्रयेण भावना कार्येति ॥ ४२ ॥ इत्थं प्रस्तटप्रमाणान्निरयावासप्रमाणानयनं प्रतिपाद्य संप्रति निरयावासप्रमाणा-ज्जिज्ञासिततत्प्रस्तटप्रमाणानयनायाह—

दट्ठूण णिरयसंखं, सोहेज्जा पढमपत्थडग्गाओ ।
सेसे अट्ठविभत्ते, रूवऽहिते पत्थडं जाण ॥ ४३ ॥

'दृष्ट्वा' निभाल्य, काम् ? इत्याह—'निरयसंख्यां' आवलिकागतनिरयावासप्रमाणलक्षणां काञ्चित्, तां च 'शोधयेत्' अपनयेत् 'प्रथमप्रस्तटाग्रात्' उक्तरूपात् । ततोऽपि किम् ? इत्याह—'शेषे' अवशिष्टे राशौ 'अष्टविभक्ते' अष्टाभिर्भागे हृत इत्यर्थः, तत्र च यल्लब्धं तस्मिन् 'रूपाधिके' एकरूपाधिके 'प्रस्तटं' प्रस्तटप्रमाणम् 'जानीहि' अवबुध्यस्व । यथा किल दृष्टैकाशीत्यधिकत्रिशतप्रमाणा निरयसंख्या, शोधिता च रत्नप्रभाप्रथमप्रस्तटाग्रादेकोननवतशतत्रयप्रमाणात्, संजातं शेषमष्टौ, तस्मिन्नष्टाभिर्विभक्ते लब्ध एककः, तस्मिन् रूपाधिके कृते संजातौ द्वौ, द्वितीयः स प्रस्तटो भवतीत्यर्थः । एवं तावन्नेयं यावदेकोन-

१ "नविंशत्यादिनैकोऽञ्चान्तः" (सि. हे० ३-१-६९) एकशब्दस्तृतीयान्तो नविंशत्यादिना समासस्तत्पुरुषो भवति, एकस्य चाद्-न्तः । एकेन न विंशतिः एकान्नविंशतिः । एवं एकान्नत्रिंशत् एकान्नचत्वारिंशदादयः ॥

पञ्चाशत्तमः प्रस्तटः । तत्र किल पञ्च नरकावासाः, तेषु प्रथमप्रस्तटाग्राच्छोधितेषु शेषं त्रीणि शतानि चतुरशीत्यधिकानि, तेषु चाष्टाभिर्विभक्तेषु लब्धाऽष्टचत्वारिंशद्रूपाधिका कृता संजाता एकोनपञ्चाशत् ४९, सा चेष्टप्रतरप्रमाणं भवतीति ॥ ४३ ॥ संप्रत्यप्रतिष्ठानादूर्ध्वमुखं प्रस्तुतप्रस्तटप्रमाणानयनायैवाह—

णिरयग्गे पंचूणे, अट्ठविभत्तम्मि रूवसहियम्मि ।
हेट्ठा वियाण पयरं, तं पि य रूवूणयं सोहे ॥ ४४ ॥

'निरयाग्रे' नरकप्रमाणे कस्मिंश्चिद् दृष्टे ततः 'पञ्चोने' पञ्चभिरूने कृते 'अष्टविभक्ते' अष्टभिर्हृतभागे यल्लब्धं तस्मिन् रूपसहिते सति 'अधस्तात्' तलभागात् 'विजानीहि' अवबुध्यस्व 'प्रतरं' इष्टप्रतरसंख्यामूर्ध्वं सीमन्तकनरकावासं यावत् । इत्थमधस्तात्प्रतरप्रमाणानयनं प्रतिपाद्योपरिष्टादपि भङ्ग्यन्तरेण तत्प्रतिपादयन्नाह—'तदपि च' तदेव प्रतरप्रमाणं पूर्वप्रकारलब्धं 'रूपोनकं' रूपमात्रहीनं 'शोधयेत्' अपनयेत्, प्रतरप्रमाणादौघिकादेकोनपञ्चाशल्लक्षणादिति गम्यते । ततो यत्तत्रावशिष्टं तदुपरितनभागादधोभिमुखं प्रतरप्रमाणं भवति । यथा—नरकाग्रेऽप्रतिष्ठानप्रस्तटसंबन्धिनि पञ्चकलक्षणे पञ्चोने कृते स्थितं शून्यम्, तस्मिन्नष्टाभिर्विभक्ते "खस्य गुणनादिके खम्" इति वचनात् लब्धं शून्यमेव, तस्मिन् रूपसहिते जात एककः, अधस्तादूर्ध्वक्रमापेक्षयाऽप्रतिष्ठानः प्रथमः प्रस्तटो भवतीत्यर्थः । एवं तावन्नेयं यावन्नरकाग्रे सीमन्तकनरकप्रस्तटसंबन्धिनि पञ्चोने कृते सत्यष्टाभिर्विभक्ते लब्धाष्टचत्वारिंशत्, तस्यामेककसहितायां जातैकोनपञ्चाशत्, तावत्तिथोऽप्रतिष्ठानात्सीमन्तकप्रस्तटो भवति । यदा तदेव प्रस्तटप्रमाणमुपरिष्टादधोमुखं वि-

वक्ष्यते तदानन्तरकरणलब्धमेव प्रमाणं रूपोनं सच्छोधयेदेकोनपञ्चाशल्लक्षणात्सर्वप्रतरप्रमाणात्, ततो यत्तत्रावशिष्टं तत्प्रतरप्रमाणं भवति। यथा—अप्रतिष्ठानप्रस्तटप्रमाणमेककलक्षणम्, तच्च रूपोनं संजातं शून्यम्, तस्मिन्नेकोनपञ्चाशतः शोधिते "राशिरविकृतः खयोजनापगते" इति वचनात् स्थिता एकोनपञ्चाशदेव, ततश्च सीमन्तकादप्रतिष्ठानस्तावत्तिथो भवति। एवं तावन्नेयं यावदेकोनपञ्चाशद् रूपोना जाता अष्टचत्वारिंशत्, तस्यां सर्वप्रतरप्रमाणाच्छोधितायामवशिष्ट एकः, तत्प्रमाणः सीमन्तकः प्रतरो भवतीत्यर्थः ॥ ४४ ॥ अथैकोनपञ्चाशति नरकप्रस्तटेऽन्तिमधनसर्वधने येन करणेनागच्छतस्तत्सिद्धये परिभाषामाह—

पंचेव हवइ आई, अट्ठेव य उत्तरं मुणेयव्वं ।
अउणापएणं गच्छो, णरयावलि त(इ)त्तिया चेव ॥४५॥

पञ्चैव नरकावासाः 'भवन्ति' संपद्यन्ते 'आदिः' मूलम्। अप्रतिष्ठानादूर्ध्वं नरकावासवृद्धिचिन्तायां 'अष्टैव च' अष्टप्रमाणमेव 'उत्तरं' प्रतिप्रतरं नरकावासवृद्धिलक्षणं 'मुणितव्यं' ज्ञातव्यम्, तथैकोनपञ्चाशद् 'गच्छः' सर्वप्रतरप्रमाणलक्षण इहोच्यते। तथा 'नरकावलयः' नरकश्रेणय एकैकस्यां दिशि सप्तस्वपि नरकपृथ्वीषु 'इयत्यश्चैव' एकोनपञ्चाशत्प्रमाणा एव, स्वरूपज्ञापनमेतदासामिति ॥ ४५ ॥ इदानीं करणमुच्यते—

गच्छुत्तरसंवग्गे, उत्तरहीणम्मि पक्खिवेयाइं ।
अंतिमधनमाइजुयं, गच्छद्धगुणं तु सव्वधणं ॥ ४६ ॥

आदिः ५ उत्तरं ८ गच्छः ४९। ततः गच्छोत्तरयोः 'संवर्गे' अभ्यासे जातानि त्रीणि शतानि द्विनवत्यधिकानि ३९२, तत्र राशौ

'उत्तरहीने' उत्तरेण—अष्टरूपेण हीने सति 'प्रक्षिपेत्' न्यसेत् 'आदिं' पञ्चकरूपम्, ततो जातमिदम् ३८९, तदिदं 'अन्तिमधनं' सीमन्ताख्यपर्यन्तप्रस्तटनरकावासप्रमाणं संपद्यते । यदा त्वन्त्यधनमेव 'आदियुतं' मूलसमेतं चतुर्णवतित्रिशतप्रमाणं सत् 'गच्छार्द्धगुणं तु' गच्छस्यैकोनपञ्चाशल्लक्षणस्यार्द्धेन—दलेन संगुणितं पुनः क्रियते तदा 'सर्वधनं' सर्वप्रस्तटनरकावासप्रमाणं भवतीति ॥ ४६ ॥ "गच्छार्द्ध-संगुणं" इत्युक्तम्, अयं च गच्छो विषमपदव्यवस्थितत्वेनार्द्धेन विभक्तुं [न] शक्यते, अतः किं कर्त्तव्यम्? इत्याह—

**जो गच्छु न देअद्धं, तस्स उ रासीएँ गिण्हिऊणद्धं ।**
**गच्छगुणं सव्वधणं, एवं सत्तरह वि करेज्जा ॥ ४७ ॥**

यो 'गच्छः' एकोनपञ्चाशल्लक्षणः 'न' नैव 'दत्ते' प्रयच्छति 'अर्द्ध' द्विभागरूपं 'तस्य तु' गच्छस्य पुनः संबन्धिनः 'राशेः' गुण्यस्य 'गृहीत्वा' आदाय 'अर्द्ध' उक्तलक्षणं 'गच्छगुणं' कुर्यात् ततः सर्वधनं भवति । यथा—एकोनपञ्चाशल्लक्षणे गच्छेऽर्द्धमददाने तेन यो राशिर्गुणयितुमिष्टः चतुर्णवतशतत्रयमानः ३९४, तस्यार्द्ध सप्तनव-त्यधिकशतमानं १९७ गृहीत्वा गच्छेनैकोनपञ्चाशल्लक्षणेन गुण्यते जा-तानि षण्णवतिशतानि त्रिपञ्चाशदधिकानि ९६५३, एतच्च सर्वधन-प्रमाणमिति । एवमविभागेनावलिकाप्रविष्टनरकावासप्रमाणं प्रतिपाद्य सांप्रतं प्रतिपृथिवि तदेवातिदिशन्नाह—'एवं' सामान्यन्यायेन 'सप्ता-नामपि' रत्नप्रभादीनां पृथ्वीनां प्रत्येकं करणं 'कुर्याद्' विदधीत, ततश्चान्तिमधनं सर्वधनं चागच्छति । यथा—रत्नप्रभायां पर्यन्तप्रस्तटे आवलिकागतनरकावासप्रमाणं द्वे शते त्रिनवते २९३ एष किलादिः,

उत्तरं ८, त्रयोदश प्रस्तटा गच्छः १३, ततो गच्छोत्तरयोः संवर्गे जातं चतुरुत्तरं शतम् १०४, तस्मिन्नुत्तरहीने षण्णवतिप्रमाणे कृते आदिना त्रिनवत्यधिकद्विशतप्रमाणेन युक्ते सति लब्धं सीमन्तकधनमिदम्—३८९। यदा अत एव राशेः प्रथमपृथ्व्याः सर्वधनमानेतुमिष्यते तदासौ राशिरादियुक्तो विधीयते जातं ६८२, ततो गच्छस्य त्रयोदशलक्षणस्यार्द्धाभावादुक्त एव राशिरर्द्धीक्रियते जातं ३४१, तस्मिन् गच्छे गुणिते लब्धं सर्वधनं ४४३३। एवं शर्कराप्रभादिष्वपि आदिप्रमाणं गच्छप्रमाणं च विज्ञाय पूर्वक्रमेणान्तिमधनं च स्वयमेवाभ्यूह्य वाच्यमिति ॥ ४७ ॥ सांप्रतमाद्युत्तरगच्छक्रमेणैवान्त्यमध्यमसर्वधनानि यथा ज्ञायन्ते तथा करणमाह—

गच्छगुणमुत्तरं उत्तरूणियं आइसहियमंतधणं।
आदिजुयद्धं मज्झिमधणं तु गच्छाहयं सव्वं ॥४८॥

'गच्छगुणं' गच्छाभ्यस्तं 'उत्तरं' उक्तरूपमेव क्रियते, ततस्तदेव 'उत्तरोनितं' उत्तरप्रमाणराशिनोनीकृतं सद्यदा 'आदिसहितं' आदिराशिना युक्तं विधीयते तदा 'अन्त्यधनं' पर्यन्तवर्तिप्रतरनरकावासप्रमाणं भवति। तथा 'आदियुतार्द्धं' तस्यैवादियुक्तस्य यदर्द्धं दलम्, तत्किम्? इत्याह—'मध्यमधनं' मध्यवर्तिप्रतरनरकाग्रं भवति। तुशब्दो भिन्नक्रमे गच्छाहतमित्यस्यानन्तरं द्रष्टव्यः, ततश्च मध्यमधनमेव 'गच्छाहतं तु' गच्छाभ्यस्तं पुनः 'सर्वं' इति सर्वधनं भवति। यथा—गच्छेनैकोनपञ्चाशल्लक्षणेन गुणितमुत्तरमष्टलक्षणं जातं ३९२, यदैतदेवोत्तरहीनं पञ्चकलक्षणादिसहितं च क्रियते तदा जातमिदं ३८९, एतदेव चान्त्यधनम्। यदा अयमेव राशिरादियुतोऽर्द्धीकृतस्तदा जात-

मिदं १९७, एतदेव च मध्यप्रतरस्य पञ्चविंशतितमस्य नरकावासप्रमाणं भवति। पुनरस्मिन्नेव राशावेकोनपञ्चाशत्संख्यगच्छगुणिते संपन्नमदः ९६५३, एतत्तु सर्वधनमिति। एवं रत्नप्रभादिष्वपि षट्सु पृथिवीष्वन्त्यमध्यमसर्वधनान्यानेतव्यानि। यथा—षष्ठपृथिव्यां गच्छेन त्रिकलक्षणेन गुणितमुत्तरमष्टलक्षणं जाता चतुर्विंशतिः, ततोऽस्यामुत्तरोनायां त्रयोदशलक्षणेनादिना सहितायां च जातैकोनत्रिंशत् २९, एतत्तत्रान्त्यप्रस्तटधनं भवति। यदास्यैवादियुक्तस्यार्द्धमेकविंशतिलक्षणं क्रियते तदा तन्मध्यधनं भवति। एतदेव गच्छाहतं सर्वधनं भवति, तच्च त्रिषष्टिलक्षणम् ६३ इति ॥ ४८ ॥ संप्रति प्रतिपृथिवि आवलिकागतनरकावासप्रमाणं प्रतिपादयितुमिच्छुः सुज्ञानत्वान्मुखकरणमनादृत्य भूमिकरणं तावत्प्रतिपादयन्नाह—

सगपयरा रूवूणा, अट्ठगुणा सोहियाहि समुहाओ।
जं तत्थ सुद्धसेसं, इच्छियपयरस्स सा भूमी ॥ ४९ ॥

'स्वकप्रतरान्' प्रतिपृथिवि त्रयोदशैकादशनवादीन् 'रूपोनान्' एकेन हीनान् तथा 'अष्टगुणान्' अष्टभिर्गुणितान् सतः, किम्? इत्याह—'शोधय' अपनय त्वम्, कुतः सकाशात्? 'स्वमुखात्' आत्मीयप्रथमप्रतरनरकावासप्रमाणात्, ततः यत् 'तत्र' राशौ 'शुद्धशेषं' अवशिष्टमित्यर्थः, किम्? इत्याह—'ईप्सितप्रतरस्य' त्रयोदशादेः सा 'भूमिः' तलगतनरकावासप्रमाणं भवति। यथा—रत्नप्रभायां स्वकप्रतरास्त्रयोदश, ते रूपोना जाता द्वादश, एते चाष्टगुणा जाता षण्णवतिः ९६, तस्यां च स्वमुखाग्रादेकोननवत्यधिकशतत्रय ३८९—प्रमाणाच्छोधितायां जातं २९३, इयमेव तत्र भूमिः। एवं सर्वत्र

बोद्धव्यमिति ॥ ४९ ॥ इदानीं मुखभूमिप्रमाणानि षट्सु पृथ्वीषु स्वयमेव ग्रन्थकार आह—

तिरिण सय अउणनउया, दो तेणउया य होंति पढमाए।
दो सय पंचासीया, पंचोत्तर दोरिण वितियाए ॥ ५० ॥
सत्ताणउयं च सयं, तेत्तीस सयं सयं च पणुवीसं।
सत्तत्तरि अउणत्तरि, सत्तत्तीसा य उणतीसा ॥ ५१ ॥
तेरस मुहभूमिओ, दो दो रयणादिछट्ठिअंताणं।
सेढिंदयाण करणं, सेढिंदयवज्जिया सेसा ॥ ५२ ॥

त्रीणि शतान्येकान्ननवतानि ३८९ द्वे शते त्रिनवत्यधिके च २९३ भवतः 'प्रथमायां' रत्नप्रभायामित्यर्थः, यथाक्रमं मुखभूमिप्रमाणमेतत्। तथा द्वे शते पञ्चाशीते २८५ पञ्चोत्तरे द्वे शते २०५ 'द्वितीयायां' शर्कराप्रभायामित्यर्थः ॥ ५० ॥ तथा सप्तनवतं च शतं १९७ त्रयस्त्रिंशं शतम् १३३ एतत्तृतीयायामिति। तथा शतं च पञ्चविंशं १२५ सप्तसप्ततिः ७७ चतुर्थ्याम्। तथा एकान्नसप्ततिः ६९ सप्तत्रिंशच्च ३७ पञ्चम्याम्। तथा एकान्नत्रिंशत् २९ ॥ ५१ ॥ त्रयोदश १३ षष्ठ्याम्। किम्? इत्याह—'मुखभूमी' यथाक्रमं मुखभूमिप्रमाणे भवतः। कथम्? इत्याह—द्वे द्वे यथाक्रमम्, कासाम्? इत्याह—'रत्नादिषष्ठ्यन्तानां' रत्नप्रभादीनां षष्ठपृथ्वीपर्यन्तानां पृथ्वीनाम्। यच्च पूर्वं "प्रथमायां द्वितीयायां" इति भणनेऽपि पुनरिह तयोरुपादानं कृतं तत्समुदायधर्मानुवर्तनार्थम्। ततः किम्? इत्याह—'श्रेणीन्द्रकाणां' आवलिकागतनरकावासलक्षणानां प्रमाणानयनाय 'करणं' उपायविशेषः "मुहभूमिसमासद्धं" ( गा० ५४ ) इत्यादिलक्षणं

वर्तते। इत्थं षष्ठीं यावत्करणबीजमुक्तं सप्तम्यां का वार्त्ता ? इत्याह— ' श्रेणीन्द्रकवर्जिता ' आवलिकागतनरकावासविहीना ' शेषा ' सप्तम पृथ्वी, तस्यां दिक्ष्वेकैकस्यैव नरकावासस्य भावाद् द्विप्रभृतीनां च लोके शास्त्रे च श्रेणित्वेन रूढत्वादिति ॥ ५२ ॥ इत्थं प्रतिपृथिवि मुख-भूमिप्रमाणा [ नि ] प्रतिपाद्येदानीं सर्वपृथ्वीगतावलिकाप्रविष्टनरका-वासप्रमाणानयनायैतदेवाह—

पत्थडतेरे पढमिल्लुयम्मि भूमी उ सा भवे णियमा ।
माघवतीते पणगं, मुहं पुणो तं वियाणाहि ॥ ५३ ॥

' प्रत्थडतेरे ' त्ति प्रस्तटत्रयोदशके रत्नप्रभापृथ्वीसंबन्धिनि ' पढ-मिल्लुयम्मि ' त्ति यः प्रथमप्रस्तटस्तत्र याऽऽवलिकागतनरकावाससंख्या, किम् ? इत्याह–' भूमिस्तु ' भूमिरेव सा ' भवेत् ' स्यात् ' नियमात् ' निश्चयेन । तथा ' माघवत्यां ' सप्तमपृथिव्यां यत्पञ्चकं नरकावासानां ' मुखं ' आदिः पुनः ' तत् ' पञ्चकं ' विजानीहि ' अवबुध्यस्व । अत्राह रत्नप्रभादिपृथिवीष्वाद्यन्तप्रस्तटनरकावाससंख्ये मुखभूमितयोक्ते, इह तु किमिति तद्वैपरीत्येन मुखभूमिप्रज्ञापना कृता ? अत्रोच्यते, विचित्रविवक्षाप्रधानत्वाच्छास्त्रकाराणामित्थमपि न कश्चिद्दोषः, परमा-र्थतस्तुल्यफलत्वात् । एवमन्यत्रापि व्यत्ययनिर्देशहेतुर्वाच्य इति ॥ ५३ ॥

पृथक्पृथक् पृथ्व्याश्रयेण मुखभूमियन्त्रकमिदम्—

| नरकना० | रत्नप्र० | शर्करा० | वालुका० | पंकप्र० | धूमप्र० | तमःप्र० | [illegible] | | |
|---|---|---|---|---|---|---|---|---|---|
| मुखानि. | ३८९ | २८५ | १९७ | १२५ | ६९ | २९ | | भूमिः | ३८९ |
| भूमयः | २९३ | २०५ | १३३ | ७७ | ३७ | १३ | | मुखम्. | ५ |

इत्थं करणोपयोगिनीं परिभाषां प्रतिपाद्य करणमाह—

मुहभूमिसमासद्धं, अवलंबगसंगुणं तु सव्वग्गं ।
पुढवीए पुढवीए, णिरयाणं एस संखेवो ॥ ५४ ॥

'मुखभूम्योः' "पत्थडतेरे" (गा० ९३) इत्यादिना प्रतिपादितस्वरूपयोर्यः समासः—मीलकस्तस्यार्द्धं—दलम्, किम्? इत्याह—'अवलम्बकसंगुणं तु' अवलम्बकेन—सर्वपृथिवीप्रस्तटप्रमाणलक्षणेन सं—एकीभावेन गुणितं पुनः 'सर्वाग्रं' समस्तपृथ्वीगतावलिकाप्रविष्टनरकावासप्रमाणं भवति। यथा सामान्येन तथा विनाङ्केना(विशेषेणा)पि प्रमाणं मन्तव्यमित्याह—'पृथिव्यां पृथिव्यां' प्रतिपृथिवीत्यर्थः 'निरयाणां' नरकावासानां 'एषः' "मुखभूमिसमासार्द्धम्" इत्यादिक्रमगतः 'संक्षेपः' सर्वाग्रलक्षणो भवति। नवरं त्रयोदशैकादशादिलक्षणोऽवलम्बको दृश्य इति ॥९४॥ अस्या एव गाथायाः पूर्वार्द्धं व्याचष्टे—

भूमिमुहाणोतेसिं, समाससद्देण मेलओ होइ ।
मिलियस्सद्धं उणपण्णोलंबगुणं तु सव्वग्गं ॥ ५५ ॥

भूमिमुखयोः 'एतयोः' उक्तप्रमाणयोः समासशब्देन मीलको भवति भणितः। ततो मिलितस्य यदर्द्धं तदेकोनपञ्चाशदवलम्बकगुणं 'तुः' पुनरर्थः सर्वाग्रं भवति। यथा—रत्नप्रभाप्रथमप्रस्तटे नरकाग्रमेकान्ननवतशतत्रयप्रमाणं भूमिः, माघवतीसत्कनरकावासपञ्चकं च मुखम्, तयोर्मीलनेऽर्द्धे च कृते जातं १९७, तस्यैकोनपञ्चाशता ४९ अवलम्बकेन गुणने जातानि त्रिपञ्चाशदधिकानि षण्णवतिशतानि ९६९३। एवं प्रत्येकमपि रत्नप्रभादीनां स्वमुखभूमिसमासार्द्धस्य त्रयोदशाद्यवलम्बकगुणने श्रेणिगतनरकावाससर्वाग्रमुपयुज्य वाच्यमिति ॥९९॥ अथ सर्वपृथ्वीनां प्रत्येकमावलिकाप्रविष्टतदितरसर्वनरकावासप्रमाणं तावदाह—

तीसा य पणवीसा, पनरस दस चेव सयसहस्साइं ।
तिण्णेगं पंचूणं, पंचेव अणुत्तरा णिरया ॥ ५६ ॥

त्रिंशत् चकारो भिन्नक्रमे ततः पञ्चविंशतिश्च पञ्चदश दश चैव 'शतसहस्राणि' लक्षा इत्यर्थः, त्रीणि एकं शतसहस्रं, कीदृशम्? इत्याह—पञ्चोनम्, पञ्चैव 'अनुत्तराः' अत्यन्ताधमतया सर्वनरकावासप्रधाना निरयाः । अयमत्र भावः—रत्नप्रभायां त्रिंशन्नरकावासशतसहस्राणि भवन्ति । शर्कराप्रभायां पञ्चविंशतिः । वालुकाप्रभायां पञ्चदश । पङ्कप्रभायां दश । धूमप्रभायां त्रीणि । तमःप्रभायामेकं शतसहस्रं परं पञ्चभिर्नरकावासैरूनम् । महातमःप्रभायां पञ्चैव नरकावासा इति ॥ ५६ ॥

इत्थं सामान्येन रत्नप्रभादिषु पृथ्वीषु पृथक्पृथक्सर्वनरकावासप्रमाणं प्रतिपाद्य संप्रति तास्वेवावलिकाबाह्यांस्तदितरांश्च नरकावासान् प्रमाणतः प्रतिपादयन् गाथासप्तकमाह—

सत्तट्ठा पंच सया, पणणउइ सहस्स लक्ख उणतीसं ।
रयणाए सेढिगया, चोयाल सया उ तेत्तीसं ॥ ५७ ॥

'सप्तषष्टानि' सप्तषष्टयधिकानि पञ्च शतानि पञ्चनवतिः सहस्राणि लक्षा एकोनत्रिंशत् पदैकदेशेऽपि पदसमुदायोपचारात् 'रत्नायां' रत्नप्रभायां वक्ष्यमाणविशेषणान्यथानुपपत्तिवशेन श्रेणिबाह्या नरकावासा बोद्धव्याः, अङ्कतश्च २९९५५६७ । श्रेणिगता नरकावासाश्चतुश्चत्वारिंशच्छतानि, 'तुः' विशेषणार्थः, 'त्रयस्त्रिंशानि' त्रयस्त्रिंशत्समधिकानि भवन्ति, अङ्कतोऽपि ४४३३ ॥ ५७ ॥

सत्ताणउइ सहस्सा, चउवीसं लक्ख तिसय पंचहिया ।
बीयाए सेढिगया, छव्वीस सया उ पणणउया ॥ ५८ ॥

सप्तनवतिः सहस्राणि चतुर्विंशतिर्लक्षास्त्रीणि शतानि पञ्चाधिकानि 'द्वितीयायां' शर्कराप्रभायामावलिकाबाह्यनरकावासप्रमाणमेतत्, अङ्कतोऽपि [ २४९७३०५ । श्रेणिगता नरकावासा षड्विंशतिः शतानि पञ्चनवत्यधिकानि, 'तुः' पुनरर्थः, भवन्ति, अङ्कतश्च ] २६९५ ॥५८॥

पंच सया पण्णारा, अडणउति सहस्स लक्ख चोद्दस य ।
तइयाए सेढिगया, पणसीया चोद्दस सया उ ॥ ५९ ॥

पञ्च शतानि 'पण्णार' त्ति पञ्चदशाधिकान्यष्टानवतिः सहस्राणि लक्षाश्चतुर्दश च 'तृतीयायां' वालुकाप्रभापृथिव्यामावलिकाव्यतिरिक्तनरकावासप्रमाणं भवति, अङ्कापेक्षयापि १४९८५१५ । श्रेणिगता नरकावासाः पञ्चाशीतानि चतुर्दश शतानि, 'तुः' पुनरर्थः, भवन्ति बोद्धव्याः, अङ्कतोऽपि १४८५ ॥ ५९ ॥

तेणउया दोण्णि सया, णवणउति सहस्स णव य लक्खाइं ।
पंकाए सेढिगया, सत्त सया होंति सत्तहिया ॥ ६० ॥

त्रिनवते द्वे शते नवनवतिः सहस्राणि नव लक्षाणि 'पङ्कायां' पङ्कप्रभायां चतुर्थपृथिव्यां श्रेणिवर्जितनिरयावासप्रमाणमेतत्, अङ्कतोऽपि ९९९२९३ । श्रेणिगता निरयाः सप्त शतानि भवन्ति सप्ताधिकानि, अङ्कतोऽपि ७०७ ॥ ६० ॥

सत्त सया पणतीसा, णवणउति सहस्स दो य लक्खाइं ।
धूमाए सेढिगया, पणट्ठा दो सया होंति ॥ ६१ ॥

सप्त शतानि पञ्चत्रिंशानि नवनवतिः सहस्राणि द्वौ च लक्षौ 'धूमायां' धूमप्रभायां पञ्चमपृथिव्यामावलिकाविकलनिरयावासप्रमाण-

मिदम्, अङ्कतश्च २९९७३९ । श्रेणिगता नरकावासाः पञ्चषष्टे द्वे शते भवतः, अङ्कतोऽपि २६५ ॥ ६१ ॥

णवणउइं च सहस्सा, णव चेय सया हवंति बत्तीसा ।
पुढवीए छट्ठीए, पइरणगाणेस संखेवो ॥ ६२ ॥
सेढिंदयणरया णं, तेवट्ठी खलु हवंति छट्ठीए ।
पंचेव सत्तमीए, पइरणगा णत्थि बोधव्वा ॥ ६३ ॥

नवनवतिश्च सहस्राणि नव चैव शतानि भवन्ति द्वात्रिंशानि 'पृथिव्यां षष्ठ्यां' तमःप्रभाभिधानायां 'प्रकीर्णकानां' श्रेणिबाह्यनरकावासानां 'एषः' अनन्तरोक्तः 'संक्षेपः' संक्षिप्यते–वस्त्विवयत्तयाऽवध्रियतेऽनेनेति संक्षेपः–प्रमाणं भवतीति, अङ्कतोऽपि ९९९३२॥६२॥ 'श्रेणीन्द्रकनरकाः' आवलिकाप्रविष्टनरकावासाः 'णं' इति वाक्यालङ्कारे त्रिषष्टिः ६३ । 'खलु' इति निश्चये 'भवन्ति' संपद्यन्ते षष्ठ्याम्, पुनः षष्ठपृथ्वीग्रहणं विस्मरणशीलशिष्यावबोधार्थम् । तथा पञ्चैव सप्तम्यां दिग्गताः । 'प्रकीर्णकाः' विप्रकीर्णनरकावासा न सन्तीति बोद्धव्या इति ॥ ६३ ॥ इत्थं प्रत्येकं पृथ्वीष्वावलिकाबाह्यानां तदितरेषां च नरकावासानां प्रमाणं प्रतिपाद्य संप्रति सर्वावलिकाबाह्यनरकावासप्रमाणं तदितरप्रमाणमुभयप्रमाणं चाभिधित्सुर्गाथाद्वयमाह—

एवं पइरणगाणं, तेसीतिं होति सयसहस्साइं ।
णउई वावि सहस्सा, तिरिण सया चेव सीयाला ॥ ६४ ॥
णव चेव सहस्साइं, छ चेव सया हवंति तेवरणा ।
सेढिंदयणिरयाणं, एवं दुहओ वि चुलसीति ॥ ६५ ॥

'एवं' प्रत्येकगणितानां सर्वेषां मीलने 'प्रकीर्णकानां' आवलिकाबाह्यनरकावासानां त्र्यशीतिर्भवति शतसहस्राणि नवतिश्चापि सहस्राणि त्रीणि शतानि चैव 'सीयाल' त्ति सप्तचत्वारिंशानि, अङ्कतोऽपि ८३९०३४७ ॥ ६४ ॥ नव चैव सहस्राणि षट् चैव शतानि भवन्ति 'तेवण्ण' त्ति त्रिपञ्चाशदधिकानि 'श्रेणीन्द्रकनिरयाणां' आवलिकाप्रविष्टनरकावासलक्षणानां सर्वेषां मेलने सति, अङ्कतोऽपि ९६५३ । 'एवं' प्रत्येकगणितयोः 'उभयतोऽपि' उभयोरपि राश्योर्यदा समुदायेन गणना क्रियते तदा चतुरशीतिशतसहस्राणि भवन्तीति, अङ्कतोऽपि ८४०००० ॥ ६५ ॥ इदानीं प्रकीर्णकनामानो नरकावासा यत्राव-तिष्ठन्ते तत्स्थाननिरूपणायाह (ग्रंथाग्रं ५००)—

दिसि विदिसि अंतरगया, णरया उ पइण्णगा मुणेयव्वा ।
छसु वि पुढवीसु भणिया, जहाणुपुव्वीएँ पविभागा ॥ ६६ ॥

विभक्तिवचनव्यत्ययाद् दिशां विदिशां च 'अन्तरगताः' अन्तरालवर्तिनः 'नरकास्तु' निरयाः पुनः प्रकीर्णका मुणितव्याः । कासु पृथ्वीष्वयं व्यवहारः? इत्याह—'षट्स्वपि' षट्स्वेव पृथ्वीषु न तु सप्तम्यामपि । 'भणिताः' आगमज्ञैर्निरूपिताः 'यथानुपूर्व्या' यत्प्रकारयाऽऽनुपूर्व्या ते व्यवस्थितास्तथेत्यर्थः । ते च कथं भूताः? इत्याह—'प्रविभागाः' प्रविभज्यन्ते—नानासंस्थानरूपतया विकल्प्यन्ते ये ते तथेति ॥ ६६ ॥ संप्रत्यावलिकाप्रविष्टानां नरकावासानामवस्थानक्रमं प्रतिपादयितुमिच्छुराह—

सीमंतगो उ उवरिं, सव्वमहे होइ अप्पइट्ठाणो ।
सव्वेसिं णिरयाणं, एगुज्जू एक्कमेक्कस्स ॥ ६७ ॥

'सीमन्तकस्तु' सीमन्तकनामैव नरकेन्द्रकः 'उपरि' प्रथम इत्यर्थः, 'सर्वाधः' सर्वेषामिन्द्रकाणामधोभागवर्ती भवति 'अप्रतिष्ठानः' सप्तमपृथ्वीन्द्रकः । शेषाणां का वार्त्ता ? इत्याह—'सर्वेषां' निरयाणामावलिकागतानां मध्ये 'एकः' इति एकैको नरकावासः 'ऋजुः' समश्रेणिव्यवस्थिततयाऽभिमुखः, कस्य ? इत्याह—एकैकस्य नरकावासस्य । इदमुक्तं भवति—सर्वेऽपीन्द्रकनरकावासाः समश्रेणितया ऊर्ध्वाधोभावेन व्यवस्थिताः, ये च शेषा आवलिकाप्रविष्टा नरकावासास्तेऽप्येवमेवेति ॥ ६७ ॥ अथावलिकाप्रविष्टेष्वेव वृतत्र्यस्रचतुरस्रनरकावासप्रमाणप्रतिपादनायैकदिगपेक्षया प्रतिपृथिवि मुखभूमिप्रमाणानयनार्थं करणं तावदाह—

अउणापरणं पढमं, सेसा परपयररहिय होंति मुहा ।
सगपयरेहि विरहिया, रूवूणेहिं मुहा भूमी ॥ ६८ ॥

एकोनपञ्चाशत्प्रथमं मुखम् । 'शेषाणि' शर्कराप्रभादिपृथिवीसंबन्धीनि 'परप्रतररहितानि' उपरितनपृथ्वीप्रस्तटप्रमाणरहितानि उपरितनपृथ्वीमुखान्येव भवन्ति मुखानि । तथा 'स्वकप्रतरैः' त्रयोदशादिभिः 'विरहितानि' परित्यक्तानि, कीदृशैः ? इत्याह—'रूपोनैः' रूपरहितैर्द्वादशादिप्रमाणैरिति भावः, 'मुखानि' विवक्षितपृथ्वीगतान्येव 'भूमयः' तलानि भवन्ति । अयमत्र तात्पर्यार्थः—यथा रत्नप्रभायामेकान्नपञ्चाशन्मुखम्, एतदेव शर्कराप्रभायां रत्नप्रभाप्रतरहीनं संजातषट्त्रिंशत्संख्यं मुखम्, एतदेव वालुकाप्रभायामेकादशलक्षणशर्कराप्रभाप्रतररहितं पञ्चविंशतिलक्षणं मुखम् । एवं तावन्नेयं यावत्तमःप्रभायां चत्वारो मुखमिति । एवं त्रयोदशैकादशनवकादिलक्षणैः स्व-

प्रतरप्रमाणै रूपहीनैः परिहीणानि स्वमुखान्येवैकान्नपञ्चाशदादीनि भूमयो भवन्ति सप्तत्रिंशत्षड्विंशतिसप्तदशादिका इति ॥ ६८ ॥ एवं सति यानि प्रमाणानि मुखभूम्यो[ख]लम्बानि तानि दर्शयितुमाह—

**अउणापएणं छत्तीसा पणुवीसा दुअट्ठ नव चउरो ।**
**सत्ततीस छव्वीसा, सत्तर दस पंच दो य दिसिं ॥ ६९ ॥**

एकान्नपञ्चाशत् षट्त्रिंशत् पञ्चविंशतिः 'दुअट्ठ' त्ति अष्टद्वयः षोडश इत्यर्थः, नव चत्वार इति मुखानि। भूमयः पुनः सप्तत्रिंशत् षड्विंशतिः 'सत्तर' त्ति सप्तदश दश पञ्च द्वौ च दिक्ष्विति ॥६९॥ स्थापना—इत्थं दिक्षु मुखानि भूमीश्च प्रतिपाद्य विदिक्षु तथैव प्रतिपादयन् करणमाह—

| नरकनामा० | रत्न० | शर्करा० | वालु० | पंक० | धूम० | तमः० |
|---|---|---|---|---|---|---|
| मुखानि | ४९ | ३६ | २५ | १६ | ९ | ४ |
| भूमयः | ३७ | २६ | १७ | १० | ५ | २ |

**अडयालीसं पढमं, सेसा परपयररहिय होंति मुहा ।**
**सगपयरेहिं विरहिया, रूवूणेहिं मुहा भूमी ॥ ७० ॥**

अष्टचत्वारिंशन्नरकावासाः प्रथमं मुखमिति गम्यते। 'शेषाणि' शर्कराप्रभाप्रभृतिपृथ्वीसंवन्धीनि परप्रतररहितानि भवन्ति मुखानि। किंमुक्तं भवति? रत्नप्रभामुखमष्टचत्वारिंशत्संख्यम्, शर्कराप्रभायां पुनः परप्रतरै रत्नप्रभासंवन्धिभिस्त्रयोदशभिरूनीकृतं रत्नप्रभामुखमेव मुखं भवति, तच्च पञ्चत्रिंशद्रूपम्। एवं शर्कराप्रभामुखं स्वप्रतररहितं वालुकाप्रभाया मुखं भवति, एतच्च चतुर्विंशतिः। एवं तावन्नेयं यावत् षष्ठीति। इत्थं मुखान्यभिधाय भूमीः प्रतिपादयन्नाह—स्वकप्रतरैर्विर-

हितानि, कथंभूतैः? इत्याह–रूपोनैः मुखानि भूमयो भवन्ति। यथा–रत्नप्रभायामष्टचत्वारिंशन्मुखम्, तदेव स्वप्रतरै रूपोनैर्द्वादशप्रमाणैरूनीकृतं जाता षट्त्रिंशत्, इयमेव तत्र भूमिः। तथा शर्कराप्रभामुखं पञ्चत्रिंशद्रूपं स्वकप्रतरै रूपोनैरूनीकृतं [संजाता पञ्चविंशतिः, इयमेव तत्र भूमिः। तथा वालुकाप्रभामुखं चतुर्विंशतिरूपं स्वकप्रतरै रूपोनैरूनीकृतं] संजाताः षोडश, एत एव तत्र भूमिः। एवमन्यास्वपि पृथ्वीषु स्वमुखेभ्यो रूपोनस्वप्रतरहीनेभ्यो भूमयः साध्या इति ॥ ७० ॥ अथ पूर्वगाथोक्तोपायलब्धमेव मुखप्रमाणं भूमिप्रमाणं च क्रमेण प्रतिपादयन्नाह—

**अडयाला पणतीसा, चउवीसा पनरस ट्ठ तिरणेव।**
**छत्तीसा पणुवीसा, सोलस णव चउर एगं च ॥ ७१ ॥**

अष्टचत्वारिंशत् पञ्चत्रिंशत् चतुर्विंशतिः पञ्चदशाष्टौ त्रय एवेति रत्नप्रभादिषु षट्सु पृथ्वीषु विदिक्षु [मुखानि], भूमयस्तु षट्त्रिंशत् पञ्चविंशतिः षोडश नव चत्वार एकश्चेति विदिक्ष्वैशान्यादिषु। स्थापना–

| नरकनामा० | रत्न० | शर्क० | वालु० | पंक० | धूम० | तमः |
|---|---|---|---|---|---|---|
| मुखानि | ४८ | ३५ | २४ | १५ | ८ | ३ |
| भूमयः | ३६ | २५ | १६ | ९ | ४ | १ |

सप्तमपृथिव्यां तु एकत्वात्प्रतरस्य मुखभूमिकल्पनाया अभाव इति ॥७१॥
इत्थं करणोपयोगिनीर्मुखभूमीः प्रतिपाद्य गाथासप्तकेन करणमाह—

**मुहभूमिसमासद्धं, दिसाण विदिसाण होति रूवूणं।**
**सयपयरेहि गुणेयं(उं), सोहणयं सोहय इमं तु ॥ ७२ ॥**

मुखभूमिसमासार्द्धं 'दिशां विदिशां' इति दिग्वर्तिनां विदिग्व-

र्तिनां च नरकावासानां विधेयम्। परं दिग्वर्तिसमासार्द्धापेक्षया विदिग्नरकावाससमासार्द्धं भवति रूपोनम्। ततः किं कार्यम्? इत्याह— 'स्वकप्रतरैः' त्रयोदशादिभिर्गुणयित्वा 'शोधनकं' शोधनीयराशिं प्रतरगुणनागतराशेर्मध्यात् 'शोधय' अपनय 'इदं तु' वक्ष्यमाणं पुनः ॥ ७२ ॥ यथा—

पुढवीपत्थडतुल्लं, सोहणयं रयणमादिसु दिसासु।
बारस बारस नव छ च छ, च तिण्णेव विदिसासु ॥७३॥

'पृथ्वीप्रस्तटतुल्यं' पृथिव्यां पृथिव्यां ये त्रयोदशैकादशादयः प्रस्तटास्तत्प्रमाणं 'शोधनकं' शोधनं भवतीति। कासु? इत्याह—'रयणमाइसु' त्ति रत्नप्रभादिषु पृथ्वीषु 'दिक्षु' दिग्वर्तिनरकावासविषये। तथा द्वादश द्वादश नव षट् च षट् च त्रय एव 'विदिक्षु' विदिग्वर्तिनरकावासविषये इति ॥७३॥ इदमेव शोधनकं कथमुत्पद्यते? इत्याह—

सव्वेसिं पत्थडाणं, एगदिसाए उ पयरमाणेणं।
एक्केकूणे ठविय, तिभागसेसं तु सोहणयं ॥ ७४ ॥

'सर्वेषां प्रस्तटानां' त्रयोदशादीनां संबन्धिनो नरकावासान् एकस्यां दिशि 'तुः' पुनरर्थे उपलक्षणत्वाद्विदिशि च वर्तमानान् 'प्रतरमानेन' प्रतरप्रमाणा वारा इत्यर्थः 'एकैकोनान्' एकैकेन परिहीणान् स्थापयेत्, ततस्त्रिभिर्विभजेत्, तत्र 'त्रिभागशेषं तु' त्रिभागावशिष्टं पुनः शोधनकं जानीहीति शेषः ॥ ७४ ॥ एवं शोधनके द्विप्रकारे सिद्धे सति किं कार्यम्? इत्याह—

एयं बाहग्गाओऽवणेत्तु सेसं तिहा विभइऊणं।
तिहि ठाणेहि ठवेउं, सोहणगस्सावि हर भागं ॥ ७५ ॥

'एतत्' शोधनकं 'बाहाग्रात्' मुखभूमिसमासार्द्धस्य प्रतरगुणनेन लब्धनरकप्रमाणलक्षणात्सकाशात् 'अपनीय' त्यक्त्वा यच्छेषं तत्त्रिभिर्विभज्य यल्लब्धं तत्त्रिषु स्थानेषु स्थापयित्वा 'शोधनकस्यापि' द्विरूपस्य हर भागम् ॥ ७५ ॥ कैः ? इत्याह—

तिहि चेव सयाकालं, जं लद्धं तं तिहा उ काऊणं ।
दो भागा ऊ तंसे, पक्खेवो एग चउरंसे ॥ ७६ ॥

त्रिभिश्चैव 'सदाकालं' यदा यदा वृत्तादिसंख्याऽऽनेतुमिष्यते तदा तदेत्यर्थः । ततो यल्लब्धं तत् 'त्रिधा तु' त्रिधैव कृत्वा ततोऽपि 'द्वौ भागौ तु' त्रिभागलक्षणौ पुनः 'त्र्यस्रे' त्र्यस्रराशौ प्रक्षिप्यत इति प्रक्षेपः—न्यास्यो राशिर्विधेः, तथा एको भागश्चतुरस्रे प्रक्षेप इति ॥ ७६ ॥ आह यदा शोधनकं त्रिभिरपि विभक्तं न शुध्यति तदा का वार्ता ? इत्याह—

सोहण दो उद्धरिया, तत्थेगो तंसि एग चउरंसे ।
एगुद्धरियं तंसे, एगा बाहा हवति एसा ॥ ७७ ॥

'शोधनके' उक्तलक्षणे यदा द्वावुद्धरितौ लभ्येते तदा 'तत्र' तयोर्मध्ये एकोऽङ्कः 'त्र्यस्रे' त्र्यस्रराशौ एकः 'चतुरस्रे' चतुरस्रराशौ प्रक्षिप्यते । अथ 'एकं' एकरूपमङ्कस्थानमुद्धरितं वर्तते तदा तत्त्र्यस्रे प्रक्षेपणीयम् । एवं सति किं सिद्धम् ? इत्याह—एका दिग्गता विदिग्गता च 'बाहा' नरकावासश्रेणिलक्षणा 'भवति' संपद्यते 'एषा' पूर्वोक्ता ॥ ७७ ॥ ततोऽपि किं सपन्नम् ? इत्याह—

एयं एगदिसग्गं, चउसंगुणियं तु होइ सव्वग्गं ।
पुढवीए पुढवीए, वट्टा तंसा य चउरंसा ॥ ७८ ॥

'एतत्' पूर्वक्रमलब्धं 'एकदिगग्रं' पूर्वाद्येकदिग्गतनरकावासप्रमाणं भवति, उपलक्षणत्वाद्विदिगग्रं च। 'चतुःसंगुणितं तु' चतुर्भिर्गुणितं पुनरेतदेव 'भवति' जायते 'सर्वाग्रं' सर्वदिग्विदिग्वर्तिनरकावासप्रमाणम्, क? इत्याह—'पृथिव्यां पृथिव्यां' रत्नप्रभादिषु षष्ठपृथ्वीपर्यन्तास्विति भावः। किमुक्तं भवति? इत्याह—वृत्तास्त्र्यस्राः चकारो भिन्नक्रमे ततश्चतुरस्राश्च नरकावासा भवन्ति ॥ ७८ ॥

अयमस्य गाथासप्तकस्य भावः—

यथा रत्नप्रभायां पूर्वस्यां दिश्येकोनपञ्चाशन्नरकावासा मुखम्, सप्तत्रिंशद्भूमिः, ततो मुखभूमिसमासार्द्धे जाता त्रिचत्वारिंशत् ४३। अस्यां त्रयोदशभिर्गुणितायां जातानि पञ्चशतान्येकोनषष्टानि ५५९, एतदेव च बाह्याग्रम्। अस्माच्च त्रयोदशप्रस्तटप्रमाणं शोधनकं शोधनीयम्। ननु केऽमी त्रयोदश ये शोध्यन्ते? इत्युच्यते—सर्वप्रस्तटप्रमाणं रत्नप्रभायां त्रयोदश, तावतो वारांश्च प्रथमप्रस्तटप्रथमदिग्गतनरकावासप्रमाणमेकोनपञ्चाशत्संख्यमध येकैकोनतया संस्थाप्यते यावत्सप्तत्रिंशत्, तत एतेषु राशिषु प्रत्येकं त्रिभिर्विभक्तेषु यथाक्रमं शुद्धशेषम्—१—०—२—१—०—२—१—०—२—१—०—२—१। एवं पञ्चानामेककानां चतुर्णां च द्विकानां मीलने जातं प्रथमपृथ्वीप्रस्तटतुल्यं शोधनकम्। तच्च बाह्याग्राच्छोधितं ततो जातमिदं ५४६, अस्य च त्रिभिर्भागे लब्धं द्व्यशीतं शतम्, तच्च वृत्तत्र्यस्रचतुरस्रसंज्ञितेषु त्रिषु स्थानेषु स्थाप्यते, ततश्च शोधनकस्यापि त्रयोदशलक्षणस्य त्रिभिर्भागे

१ अत्र "रोर्यः" (सि० हे० १-३-२६) इति सूत्रप्रवृत्तिः। अधः+एके०=अध यू+एके०=अध येके०॥

दीयते, लब्धश्चतुष्कक एकश्चावशिष्टः, स च चतुष्ककस्त्रिषु स्थानेषु स्थाप्यते, तत्र च द्वौ चतुष्कौ त्र्यस्रेषु क्षिप्येते एकश्च चतुष्कश्चतुरस्रेषु, यश्चैकोऽवशिष्टः स त्र्यस्रेषु क्षिप्यते, ततो जातं रत्नप्रभायां पूर्वदिग्गतवृत्तादिराशित्रयम्, तच्चेदम्-१८२-१९१-१८६। यदा चतुर्दिगपेक्षया चिन्त्यते तदैतदेव राशित्रयं प्रत्येकं चतुर्भिर्गुण्यते, ततश्च वृत्तादीनां सर्वाग्रं भवति, तच्चाग्रे स्वयमेव शास्त्रकारः प्रतिपादयिष्यति। विदिक्षुः पुना रत्नप्रभाप्रथमप्रस्तटे ऐशान्यामष्टचत्वारिंशन्नरकावासाः, तेऽप्येकैकहान्या दिग्गतनरकावासक्रमेण स्थाप्यन्ते यावत् षट्त्रिंशत्, ततश्चैतेषु राशिषु प्रत्येकं त्रिभिर्भक्तेषु लब्धमवशिष्टं यथाक्रमम्— ०-२-१-०-२-१-०-२-१-०-२-१-०। एवं चतुर्णां द्विकानामेककानां च मीलने द्वादशरूपं शोधनकं भवति, शेषं सर्वं दिग्वद्बोद्धव्यम्। एवमन्यास्वपि पृथ्वीषु सर्वा करणभावना कार्येति॥

संप्रति प्राक्करणेन साधितान् वृत्तादिनरकावासान् प्रतिपृथिवि गाथाषट्केन कथयन्नाह—

**अडवीसा चोसट्ठा, चोयाला सत्त सत्त य सया उ।**
**बारस चोयालाया, अडवीसहिया उ विदिसासु॥ ७९॥**

अष्टाविंशानि चतुःषष्टानि चतुश्चत्वारिंशानि, कानि? इत्याह— सप्त सप्त शतानि चशब्दतुशब्दौ पूरणार्थौ। इदमुक्तं भवति—रत्नप्रभायामष्टाविंशानि सप्त शतानि वृत्तानाम्, चतुःषष्टानि सप्त शतानि त्र्यस्राणाम्, चतुश्चत्वारिंशानि सप्तैव शतानि चतुरस्राणां नरकावासानां दिक्षु सर्वाग्रं भवतीति। तथा 'बारस चोयालाया अडवीसहिय' त्ति द्वादशभिश्चतुश्चत्वारिंशताऽष्टाविंशत्या चाधिकानि सप्त सप्त शतानीति संबध्यते,

'तुः' पूर्ववत्। इदमत्र हृदयम्—द्वादशाधिकानि चतुश्चत्वारिंशदधिकान्यष्टाविंशत्यधिकानि च सप्त शतानि यथाक्रमं वृत्तत्र्यस्रचतुरस्रप्रमाणं भवति 'विदिक्षु' विदिग्विषये। एवं सर्वत्र। अङ्कतोऽपि दिक्षु वृ० ७२८, त्र्य० ७६४, च० ७४४। विदिक्षु वृ० ७१२, त्र्य० ७४४, च० ७२८ ॥७९॥ एतद्रत्नप्रभायाम्। शर्कराप्रभायां पुनः—

**चत्ता य अट्ठसट्ठा, छप्पन्नहिगा य चउ चउ सया उ।**
**चउवीसा छप्पण्णा, चत्तालहिगा य विदिसासु ॥ ८० ॥**

चत्वारिंशानि 'चः' पूर्ववत्, अष्टषष्टानि षट्पञ्चाशदधिकानि च चत्वारि [चत्वारि] शतानि 'तुः' पूर्ववत्, दिक्षु ४४०–४६८–४५६। तथा चतुर्विंशानि षट्पञ्चाशानि चत्वारिंशदधिकानि च चत्वारि चत्वारि शतानीति संबध्यते विदिक्ष्विति, ४२४–४५६–४४० ॥८०॥

अथ तृतीयायाम्—

**चत्ता चउसट्ठा या, बावण्णा दोण्णि दोण्णि उ सया उ।**
**अडवीसा बावण्णा, चत्तहिया चेव विदिसासु ॥ ८१ ॥**

चत्वारिंशे चतुःषष्टे चकारोः भिन्नक्रमे ततो द्वापञ्चाशे च 'द्वे द्वे तु शते तु' द्वे द्वे एव शते पुनर्भवतो दिक्षु, २४०–२६४–२५२। तथाष्टाविंशे द्वापञ्चाशे चत्वारिंशदधिके चैव द्वे द्वे शते इति योज्यते, २२८–२५२–२४० विदिक्ष्विति ॥ ८१ ॥

**बारहियं बत्तीसं, वीसहियं तह सयं चउत्थीए।**
**चउरहियं वीसहियं, बारहियं चेव विदिसासु ॥ ८२ ॥**

द्वादशाधिकं द्वात्रिंशं विंशत्यधिकं तथेति समुच्चये, शतमिति सर्वत्र संबध्यते, चतुर्थ्यां नरकपृथिव्यां ११२–१३२–१२० दिक्षु। तथा

चतुरधिकं विंशत्यधिकं द्वादशाधिकं चैव शतं १०४-१२०-११२ विदिक्ष्विति ॥ ८२ ॥

चत्ताला बावराणा, अडयाला पंचमीएँ पुढवीए ।
बत्तीसा अडयाला, चत्ताला चेव विदिसासु ॥ ८३ ॥

चत्वारिंशद्द्वापञ्चाशदष्टचत्वारिंशत्पञ्चम्यां पृथिव्याम् ४०-५२-४८, एतद्दिक्षु । द्वात्रिंशदष्टचत्वारिंशच्चत्वारिंशच्चैव ३२-४८-४० विदिक्ष्विति ॥ ८३ ॥

अट्ठ य सोलस बारस, वट्टाइ दिसासु छट्ठपुढवीए ।
चउ बारस ट्ठ य तहा, वट्टादी होंति विदिसासु ॥ ८४ ॥

अष्टौ 'चः' पूरणे षोडश द्वादश च ८-१६-१२ 'वृत्तादयः' वृत्तत्र्यस्रचतुरस्रा दिक्षु षष्ठपृथिव्याम् । चत्वारो द्वादशाष्टौ च ४-१२-८ तथेति पूर्ववत् 'वृत्तादयः' वृत्तत्र्यस्रचतुरस्राः 'भवन्ति' जायन्ते नरकावासा विदिक्ष्विति ॥ ८४ ॥ इत्थं रत्नप्रभादिपृथ्वीषु दिक्षु विदिक्षु च प्रत्येकं वृत्तत्र्यस्रचतुरस्रनरकावासप्रमाणं प्रतिपाद्य संप्रति तास्वेव समुदायेन वृत्तादिसंख्यानयनायोपायं वक्तुकामो मुखभूमिप्रमाणं शोधनकानि चाभिधातुं गाथात्रयमाह—

सत्तराउइ होइ मुहं, सत्तरि तिहि अहियया भवे भूमी ।
इगसत्तरि होइ मुहं, भूमी इगवन्न बीयाए ॥ ८५ ॥
एगूणपन्न तेत्तीसा मुह भूमी य तइयपुढवीए ।
इगतीसेगुणवीसा, मुहभूमीओ चउत्थीए ॥ ८६ ॥
पंचमपुढवी सत्तर, नव सत्त तियं च छट्ठपुढवीए ।
पणुवीस तिवीस ट्ठार तेर एक्कार छ य सोज्झं ॥ ८७ ॥

तत्र रत्नप्रभायां सप्तनवतिर्भवति मुखम्, एकान्नपञ्चाशतो दिक्संबन्धिनामष्टचत्वारिंशतश्च विदिक्संबन्धिनां नरकावासानां समासे एतत्संख्यासंभवात् । सप्ततिस्त्रिभिरधिकका भवेद्भूमिः, इयमपि सप्तत्रिंशतो दिग्वर्तिनां षट्त्रिंशतश्च विदिग्वर्तिनां मीलने संपद्यते । एवं शेषपृथ्वीष्वपि मुखभूमिप्रमाणभावना कार्या । तथैकसप्ततिर्भवति मुखम्, भूमिरेकपञ्चाशद्वितीयायामिति ॥ ८५ ॥ एकोनपञ्चाशत् त्रयस्त्रिंशत्, किम्? इत्याह—यथाक्रमं मुखं भूमी च भवतस्तृतीयायां पृथिव्याम् । तथैकत्रिंशदेकोनविंशतिर्यथाक्रमं मुखभूम्यौ भवतश्चतुर्थ्यां पृथिव्यामिति ॥ ८६ ॥ पञ्चमपृथिव्यां विभक्तिलोपश्च प्राकृतत्वात् सप्तदश नव मुखभूमी भवतः । तथा सप्त त्रिकं च मुखभूमी भवतः षष्ठपृथिव्याम् । तथा 'पणुवीस' त्ति पञ्चविंशतिः 'तिवीस' त्ति त्रयोविंशतिः 'ट्ठार' त्ति अष्टादश 'तेर' त्ति त्रयोदश एकादश षट् च 'शोध्यं' शोधनकं भवति यथाक्रमं रत्नप्रभादिपृथ्वीषु, प्रतिपृथिवि त्रयोदशद्वादशादिदिग्वर्तिशोधनकमीलने एतत्संख्यशोधनकसंभवादिति ॥ ८७ ॥ स्थापना—इत्थमुपायमुक्त्वा करणमाह—

| | | | | | | |
|---|---|---|---|---|---|---|
| नरकना० | रत्न० | शर्क० | वालु० | पंक० | धूम० | तमः० |
| मुखानि । | ९७ | ७१ | ४९ | ३१ | १७ | ७ |
| भूमयः । | ७३ | ५१ | ३३ | १९ | ९ | ३ |
| शोधनका० | २५ | २३ | १८ | १३ | ११ | ६ |

मुहभूमिसमासद्धं, वेहगुणं सोहणूण तिहि भइयं ।
सोहणयजुयं चउराहयं च वट्टाइ रयणाए ॥ ८८ ॥

मुखभूम्योः—प्रागुद्दिष्टस्वरूपयोः समासार्द्धं प्रतीतार्थमेव 'वेधगुणं' प्रतिपृथिवि स्वप्रतरप्रमाणगुणितं 'शोधनकोनं' शोधनकपरिहीणं पुन-

त्रिभिः 'भक्तं' अपहृतं शोधनकयुतं 'चतुराहतं च' चतुर्भिर्गुणितं पुनः 'वृत्तादि' वृत्तत्र्यस्रचतुरस्रनरकावासप्रमाणं स्यात् 'रत्नायां' रत्नप्रभायामिति ॥ ८८ ॥ एवमपि कृते यथा वृत्तनरकावासप्रमाणं परिपूर्णं संपद्यते तथाऽभिदधानः सर्वपृथ्वीष्वप्ययमेव क्रम इति प्रतिपादयन्नाह—

दिसि विदिसाण समासे, मज्झिमनरइंदएहिं सव्वग्गं।
पुढवीए पुढवीए, वट्टा तंसा य चउरंसा ॥ ८९ ॥

दिशां विदिशां च संबन्धिनो ये वृत्तादयो नरकावासास्तेषां समासे पूर्वोक्तक्रमेण कृते सति मध्यमनरकेन्द्रकैः सह सर्वाग्रं वृत्तनरकावासानां भवति। यथा रत्नप्रभायां तथा 'पृथ्व्यां पृथ्व्यां' शर्कराप्रभादिकायां वृत्तास्त्र्यस्राश्चकारो भिन्नक्रमे ततश्चतुरस्राश्च नरकावासा भवन्ति ॥ ८९ ॥ अयमस्य गाथाद्वयस्य भावार्थः—

यथा रत्नप्रभायां सप्तनवतिर्मुखं ९७ त्रिसप्ततिर्भूमिः ७३, ततो मुखभूमिसमासार्द्धे जाता पञ्चाशीतिः ८५, अस्यां च त्रयोदशलक्षणावलम्बकगुणितायां जातान्येकादशशतानि पञ्चाधिकानि ११०५, एतेभ्यश्च शोधनके पञ्चविंशतिलक्षणे शोधिते जातं १०८०, अस्य च त्रिभिर्भागे लब्धानि त्रीणि शतानि षष्टयधिकानि ३६०, एतच्च वृत्तत्र्यस्रचतुरस्रसंज्ञितेषु त्रिपु स्थानेषु स्थाप्यते, ततश्च शोधनकस्यापि पञ्चविंशतिलक्षणस्य त्रिभिर्भागो दीयते, लब्धोऽष्टक एकश्चात्रावशिष्टः, स चाष्टकस्त्रिषु स्थानेषु स्थाप्यते, तत्र च द्वावष्टकौ त्र्यस्रेषु क्षिप्येते, एकश्च चतुरस्रेषु, यश्चैककोऽवशिष्टः सोऽपि त्र्यस्रेषु क्षिप्यते, ततो राशित्रयं चतुष्ककेण गुण्यते, पश्चात्प्रथमराशौ त्रयोदशेन्द्रकाः

क्षिप्यन्ते, ततो जातं रत्नप्रभायां दिग्विदिग्वर्ति वृत्तादिराशित्रयम्, तच्चेदम्—वृ० १४९३, त्र्य० १९०८, च० १४७२। एवं शेषास्वपि पृथिवीषु स्वकीयमुखभूमिशोधनकान्यपेक्ष्य भावना कार्येति ॥ छ ॥

इदानीं "मुहभूमिसमासद्धं" ( गा० ८८ ) इत्यनेन करणेन दिग्विदिशां यौगपद्येन वृत्तादिनरकावासप्रमाणं यदागतं तद्रत्नप्रभादिपृथ्वीषु पृथक्पृथक्प्रदर्शयन् गाथाषट्कमाह—

**चोद्दस सय तेवरण्णा, परणरस सया उ अट्ठमहिगा उ।**
**चोद्दस सय बावत्तर, वट्टाई होंति रयणाए ॥ ९० ॥**

चतुर्दश शतानि त्रिपञ्चाशानि, पञ्चदश शतानि 'तुः' पुनरर्थः, अष्टभिरधिकानि, मकारोऽलाक्षणिकः, 'तुः' पूरणार्थः, चतुर्दश शतानि द्वासप्ततानि, किम्? इत्याह—'वृत्तादयः' यथाक्रमं वृत्त १४९३-त्र्यस्र १९०८ चतुरस्राः १४७२ नरकावासा भवन्ति 'रत्नायां' रत्नप्रभायामिति ॥ ९० ॥

**अट्ठ सय पंचहत्तर, नव चेव सया उ होंति चउवीसा।**
**छरणउया अट्ठ सया, वट्टादी होंति बीयाए ॥ ९१ ॥**

अष्ट शतानि पञ्चसप्ततानि, नव चैव शतानि 'तुः' पुनरर्थो भवन्ति चतुर्विंशानि, षण्णवतान्यष्टौ शतानि, किम्? इत्याह—'वृत्तादयः' वृत्त ८७९ त्र्यस्र ९२४ चतुरस्राः ८९६ भवन्ति द्वितीयायां पृथिव्यामिति ॥ ९१ ॥

**चउ सय सत्तत्तर पंच सोल चउरो सया उ बाणउया।**
**पढवीए तइयाए, वट्टा तंसा य चउरंसा ॥ ९२ ॥**

चत्वारि शतानि सप्तसप्तानि, पञ्चशतानि षोडशानि, चत्वारि

शतानि 'तुः' पुनरर्थः द्वानवतानि पृथिव्यां तृतीयायाम्, किम्? इत्याह—वृत्ताः ४७७ त्र्यस्राः ५१६ 'चः' समुच्चये चतुरस्राश्च ४९२ नरकावासा भवन्तीति ॥ ९२ ॥

तेवीसा बावण्णा, बत्तीसा दोण्णि दोण्णि य सया उ।
पुढवीइ चउत्थीए, वट्टादी होंति णायव्वा ॥ ९३ ॥

त्रयोविंशे द्वापञ्चाशे द्वात्रिंशे 'दोण्णि दोण्णि य' त्ति द्वे द्वे च शते 'तुः' पूर्ववत् पृथिव्यां चतुर्थ्याम्, किम्? इत्याह—'वृत्तादयः' वृत्त २२३ त्र्यस्र २५२ चतुरस्राः २३२ नरकावासा भवन्ति ज्ञातव्या इति ॥ ९३ ॥ ॥

सत्तत्तरी सयं चेव तह य णिरयाण अट्ठसीती य।
पुढवीए पंचमीए, वट्टादी होंति णायव्वा ॥ ९४ ॥

सप्तसप्ततिः शतं चैव 'तथा च' इति पूरणे निरयाणामष्टाशीतिश्च पृथिव्यां पञ्चम्यां 'वृत्तादयः' वृत्त ७७ त्र्यस्र १०० चतुरस्राः ८८ भवन्ति ज्ञातव्याः ॥ ९४ ॥

पण्णरस अट्ठवीसा, वीसा वट्टादि छट्ठपुढवीए।
एगो वट्टो तंसा, चउरो खलु सत्तमीए उ ॥ ९५ ॥

पञ्चदश अष्टाविंशतिर्विंशतिः 'वृत्तादयः' वृत्त १५ त्र्यस्र २८—चतुरस्राः २० षष्ठपृथिव्यां भवन्ति। तथा एकः 'वृत्तः' इन्द्रकरूपः १ त्र्यस्राश्चत्वारः ४ 'खलुः' वाक्यालङ्कारे सप्तम्यां तु पृथिव्यामिति ॥९५॥ इत्थं प्रत्येकं रत्नप्रभादिषु वृत्तादिपरिमाणं प्रतिपाद्य सप्तस्वपि यौगपद्येन तत्प्रतिपादयितुमुपायमाह—

मुहभूमीओ सव्वा, दिसिविदिसा सव्वमेलियाणद्धं ।
उणपन्नडयालगुणं, दिसिविदिसा चेव सव्वग्गं ॥ ९६ ॥

इह दिशां विदिशां च पृथक्पृथग्वृत्तादिपरिमाणमानेतुमिष्टमास्ते, ततो मुखभूमयः ' सर्वाः ' समस्ताः । सामस्त्यमेव भावयति–' दिसि-विदिस ' त्ति दिशां विदिशां च संबन्धिन्य एकोनपञ्चाशदेककाष्टचत्वारिंशदेककलक्षणाः स्वयमेव ज्ञातव्याः । ततः किम्? इत्याह—'सर्वमीलितानां ' सर्वासां मुखभूमीनां संश्लिष्टानां यदर्द्धम्, तत्किम् ? इत्याह–एकोनपञ्चाशदष्टचत्वारिंशद्गुणं क्रियते ततो यथासंख्यं दिशां विदिशां चैव ' सर्वाग्रं ' सर्ववृत्तादिनरकावासप्रमाणं भवति । शेषं शोधनकापनयनादि पूर्ववत् । यथा चैतत्समागच्छति तथोपरिष्टात्सविशेषं वक्ष्याम इति ॥ ९६ ॥ सर्वाग्रमेव प्रमाणतो गाथाद्वयेन प्रतिपादयन्नाह—

पणरस अट्ठसट्ठा, सया उ तह चेव सतरस सयाइं ।
सोलस बत्तीसाइं, दिसाण वट्टादिसव्वग्गं ॥ ९७ ॥
पणणार सया चउराहिया उ सोलस सया उ वत्तीसा ।
पणणारट्ठट्ठी वि य, वट्टादी विदिसि सव्वग्गं ॥ ९८ ॥

पञ्चदशाष्टषष्टानि शतानि ' तुः ' पुनरर्थः, ' तथा चैव ' इति समुच्चये, सप्तदश शतानि शुद्धान्येव, षोडश द्वात्रिंशानि शतानीत्यनुवर्तते, किम् ? इत्याह—' दिशां ' चतसृणामपि संबन्धि ' वृत्तादिसर्वाग्रं ' वृत्त १५६८ त्र्यस्र १७०० चतुरस्र १६३२ नरकावासप्रमाणं भवतीति ॥ ९७ ॥

पञ्चदश शतानि चतुरधिकानि तु षोडश शतानि तु द्वात्रिंशानि तुशब्दौ पूर्ववत्, पञ्चदश शतानि ' अष्टषष्टिरपि ' अष्टषष्ट्यधिका

नीत्यर्थः, किम्? इत्याह—विभक्तिव्यत्ययात् 'वृत्तादीनां' वृत्त १९०४-त्र्यस्र १६३२ चतुरस्राणां १९६८ विदिक्षु सर्वाग्रं भवति ॥ ९८ ॥ गाथात्रयस्यापि भावना—

रत्नप्रभाप्रथमप्रस्तटैकदिग्गतनरकावासप्रमाणं [मुखम् ४९, तमस्तमापृथिव्येकदिग्गतनरकावासः] पुनर्भूमिस्तच्चेदम्—१, अनयोः समासः ५०, तदर्द्धं च २५ एकोनपञ्चाशल्लक्षणावलम्बकगुणितं जातमिदं १२२५; अस्माच्छोधके एकोनपञ्चाशल्लक्षणे पातिते शेषराशौ त्रिभिर्विभक्ते लब्धमिदं ३९२, पुनरस्मिन्नेव राशौ त्रिषु स्थानेषु वृत्तत्र्यस्रचतुरस्रसंज्ञितेषु स्थापिते शोधनकमपि त्रिभिर्विभज्यते, लब्धः षोडशक एक एकश्चावशिष्टः, स च षोडशकः त्रिषु स्थानेषु स्थाप्यते, तत्र द्वौ षोडशकावेककश्च त्र्यस्रराशौ क्षिप्यन्ते, एकश्च षोडशकश्चतुरस्रराशौ निक्षिप्यते, ततस्त्रिष्वपि राशिषु दिक्चतुष्टयगुणनाल्लभ्यते यथानिर्दिष्टं वृत्तादिपरिमाणमिति। विदिक्षु पुनरष्टचत्वारिंशन्मुखम्, षष्ठपृथ्वीचरमप्रस्तटविदिग्नरकावासो भूमिः स चैकः, अनयोः समास एकोनपञ्चाशत्, ततोऽर्द्धदानाभावादवलम्बकराशिरष्टचत्वारिंशल्लक्षणोऽर्द्धीक्रियते जाता चतुर्विंशतिः, ततोऽनयो राश्योः परस्परगुणने जातमेकादश शतानि षट्सप्तत्यधिकानि, अङ्कतोऽपि ११७६, ततोऽस्मादष्टचत्वारिंशल्लक्षणे शोधनके शोधिते त्रिभिश्च भागे पातिते लब्धं ३७६, एतच्च वृत्तत्र्यस्रचतुरस्रलक्षणेषु त्रिषु स्थानेषु स्थाप्यते, शोधनकराशिरपि त्रिभिर्विभज्यते लब्धः षोडशकः, स च त्रिषु स्थानेषु स्थाप्यते, ततो द्वौ षोडशकौ त्र्यस्रस्थाने क्षिप्येते, एकश्च षोडशकश्चतुरस्रस्थान इति, ततस्त्रिष्वपि राशिषु विदिक्चतुष्टयगुणने वृत्तादिपरिमाणमुक्तलक्षणं लभ्यत

इति ॥ छ ॥ इत्थं दिक्षु विदिक्षु च पृथक्पृथग्वृत्तादिप्रमाणं प्रतिपाद्य संप्रति दिक्षु विदिक्षु च यौगपद्येनैव सर्वपृथिवीगतं वृत्तादिप्रमाणं प्रतिपिपादयिषुराह—

पणुवीसं पण्णगुणा, चउवीसगुणा तहेव गुणपण्णा।
बारस पणुवीसाइं, छहत्तरेगारससयाइं ॥ ९९ ॥

पञ्चविंशतिरेकोनपञ्चाशद्गुणा क्रियते इत्येको राशिः। चतुर्विंशतिगुणा तथैवैकोनपञ्चाशदिति द्वितीयः। यदनयोर्जातं तद्दर्शयति—द्वादश पञ्चविंशानि प्रथमे १२२५। द्वितीये पुनः षट्सप्तान्येकादशशतानीति ११७६॥ ९९ ॥ यदत्र विधेयं तद्दर्शयन्नाह—

एएसिं तु समासे, सत्ताणउइं च सोहणं पाडे।
सेसं तिहि भइऊणं, लद्धा अट्ठट्ठि सत्त सया ॥१००॥

'एतयोः' राश्योः 'तुः' पुनरर्थः 'समासे' मीलने कृते सति सप्तनवतिं च शोधनकं दिग्विदिक्शोधनकनिष्पन्नं पातयेत्, ततो जातमिदं २३०४। एवं शोधनके शोधिते 'शेषं' अमुमेव राशिं त्रिभिर्विभज्य लब्धान्यष्टषष्टानि सप्तशतानि ७६८। ततः प्रागुद्दिष्टन्यायेनैतेषु त्रिषु [स्थानेषु] स्थापितेषु शोधनकस्य सप्तनवतिलक्षणस्य त्रिभिर्भागो देयः, लब्धा द्वात्रिंशदेकश्चावशिष्टः, ततो द्वात्रिंशत्त्रिषु स्थानेषु स्थाप्यते, तत्र च द्वात्रिंशद्द्वयमेककश्च त्र्यस्रराशौ क्षिप्येते, एका च द्वात्रिंशच्चतुरस्रराशाविति ॥ १०० ॥ ततस्त्रिष्वपि राशिषु चतुर्गुणेषु वृत्तराशौ चैकोनपञ्चाशदिन्द्रकप्रक्षेपे यल्लब्धं तदाह—

---

१ "पणुवीसं गुणपण्णा"—"पणुवीसं पण्णिगुणा" इति वा गाथाद्यपादं स्यात्।

**इगतीसा इगवीसा, तेत्तीस सया य होंति बत्तीसा ।**
**बत्तीसं चेव सया, सत्तसु वट्टाइसव्वग्गं ॥ १०१ ॥**

एकत्रिंशच्छतान्येकविंशानि त्रयस्त्रिंशच्छतानि च भवन्ति द्वात्रिंशानि द्वात्रिंशच्चैव शतानि शुद्धानि सप्तसु नरकपृथ्वीषु 'वृत्तादिसर्वाग्रं' यथासंख्यं वृत्तत्र्यस्रचतुरस्रप्रमाणं भवतीति, अङ्कतोऽपि ३१२१–३३३२–३२०० । यदा पुनरेतदेव राशित्रयं मील्यते तदाऽऽवलिकागतनरकावासप्रमाणं त्रिपञ्चाशदधिकषण्णवतिशतरूपं ९६५३ संपद्यत इति ॥ १०१ ॥

इत्थमावलिकाप्रविष्टांस्तदितरानुभयरूपानावलिकाप्रविष्टेष्वपि वृत्तत्र्यस्रचतुरस्रान्प्रतिपृथिवि समुदायेन च नरकावासान्प्रतिपाद्य संप्रति पृथिवीनामेव बाहल्यप्रमाणं प्रतिपादयन्नाह—

**पढमासीतिसहस्सा बत्तीसा अट्ठवीस वीसा य ।**
**अट्ठार सोलसऽट्ठ य, सहस्स लक्खोवरिं कुज्जा ॥ १०२ ॥**

विभक्तिव्यत्ययात् 'प्रथमायां' रत्नप्रभाभिधानायां अशीतिसहस्राणि "लक्षोपरि कुर्यात्" इत्युत्तरेण योगः, अशीतिसहस्राधिकं लक्षं बाहल्यमस्या इति गर्भः । तदनु क्रमेण द्वितीयादिषु पृथ्वीषु द्वात्रिंशतं अष्टाविंशतिं विंशतिं च अष्टादश षोडश अष्टौ च सहस्राणि लक्षोपरि कुर्यात्, एवं च कृते आसामेतदेव बाहल्यप्रमाणं भवतीति । अङ्कतोऽपि प्रथमायां १८००००, द्वितीयायां १३२०००, तृतीयायां १२८०००, चतुर्थ्यां १२००००, पञ्चम्यां ११८०००, षष्ठ्यां ११६०००, सप्तम्यां १०८००० ॥ १०२ ॥ अथ सर्वपृथ्वीषु प्रस्तटान्तरप्रमाणानयनायोपायमाह—

**बिसहस्सूणा पुढवी, सगपयरेहिं तिसहस्सगुणिएहिं।**
**ऊणा रूवूणियपयरभाइया पत्थडंतरयं॥ १०३॥**

द्वाभ्यां सहस्राभ्यां बाहल्यमपेक्ष्येति गम्यते, ऊना 'पृथ्वी' रत्नप्रभादिका कृता सती 'स्वकप्रतरैः' निजप्रस्तटैः, कीदृशैः? इत्याह—त्रिसहस्रगुणैरूना, तथा रूपोनितप्रतरभाजिता, किम्? इत्याह—'प्रस्तटान्तरकं' प्रस्तटात्प्रस्तटस्यान्तरालं भवति। यथा—रत्नप्रभायां लक्षमशीतिसहस्राधिकं बाहल्यम्, तच्चाधस्तनेनोपरितनेन च सहस्रेणोनं कृतं जातमष्टसप्ततिसहस्राधिकं लक्षम्, तदनु त्रयोदशसु स्वप्रस्तटेषु त्रिसहस्रगुणितेष्वपनीतेषु योऽवशिष्टो राशिस्तस्य स्वप्रस्तटप्रमाणेन रूपोनेन भागे हृते लब्धं योजनानामेकादश सहस्राणि पञ्चशतानि त्र्यशीतानि, अङ्कतोऽपि ११५८३, अवशिष्टमिदं—$\frac{४}{१२}$ उभयस्यापि चतुर्भिरपवर्तने संपन्नो योजनत्रिभागः, स चायं $\frac{१}{३}$। एवमन्यास्वपि प्रस्तटान्तराण्यानेतव्यानीति॥ १०३॥ यदभिप्रायेण स्वप्रतरैस्त्रिसहस्रगुणितैरित्युक्तं तदभिप्रायप्रकाशनायाह—

**हेट्ठा घणा सहस्सं, उप्पिं संकुय सहस्समेगं तु।**
**मज्झे सुसिर सहस्सं, तिण्णि सहस्सूसिया णरया॥१०४॥**

'अधस्तात्' तलभागे 'घनाः' निश्छिद्राः सहस्रं यावद्योजनानां सर्वेऽपि नरकावासाः। 'उप्पिं'ति उपरि संकुचन्तीति संकुचाः संकुचिता इत्यर्थः सहस्रं 'एकं तु' एकमेव। तथा 'मध्ये' मध्यभागे 'शुषिराः' रन्ध्रभावभाजः सहस्रम्। एवं 'त्रीणि सहस्राणि उच्छ्रिताः' प्रत्येकं त्रिसहस्रबाहल्या इत्यर्थः 'नरकाः' इति नरकावासप्रस्तटा इति॥१०४॥ संप्रति प्रतिपृथिवि यत्प्रस्तटान्तरं तत्सूत्रकारः साक्षादेव दर्शयन् गाथापञ्चकमाह—

तेसीया पंच सया, एक्कारस चेव जोयणसहस्सा ।
रयणाएँ पत्थडंतरमेगो वि य जोयणतिभागो ॥ १०५ ॥
सत्ताणउइसयाइं, बितियाए पत्थडंतरं होति ।
पणसत्तय तिणि सया, बारस य सहस्स तइयाए ॥१०६॥
छावट्ठि सयं सोलस, सहस्स पंकाए दो तिभागा य ।
अड्ढाइज्जसयाइं, पणुवीस सहस्स धूमाए ॥ १०७ ॥
बावण्णसहस्साइं, पंचेव य होंति जोयणसयाइं ।
पत्थडमंतरमेयं, तु छट्ठपुढवीएँ णायव्वं ॥ १०८ ॥

त्र्यशीतानि पञ्च शतानि एकादश चैव योजनसहस्राणि 'रत्नायां' रत्नप्रभायां 'प्रस्तटान्तरं' प्रस्तटात्प्रस्तटस्यान्तरालम्, एकः 'अपि च' इति समुच्चये योजनत्रिभागो भवतीति, [अङ्कतोऽपि ११५८३$\frac{1}{3}$] ॥ १०५ ॥ सप्तनवतिशतानि द्वितीयायां पृथिव्यां प्रस्तटान्तरं भवति, अङ्कतोऽपि ९७०० । एवं पञ्चसप्ततानि त्रीणि शतानि द्वादश च सहस्राणि तृतीयायां पृथिव्याम्, अङ्कतोऽपि १२३७५ ॥ १०६ ॥ षट्षष्टं शतं षोडश सहस्राणि 'पङ्कायां' पङ्कप्रभायां पृथिव्यां द्वौ भागौ त्रिभागलक्षणौ योजनस्य, अङ्कतोऽपि १६१६६ $\frac{2}{3}$ । 'चः' समुच्चये । तथा 'अर्द्धतृतीयानि शतानि' द्वे शते पञ्चाशदभ्यधिके इत्यर्थः, पञ्चविंशतिः सहस्राणि 'धूमायां' धूमप्रभायामिति, अङ्कतोऽपि २५२५० ॥ १०७ ॥ द्विपञ्चाशत्सहस्राणि पञ्चैव च भवन्ति योजनशतानि प्रस्तटान्तरं मकारोऽलाक्षणिकः, एतच्च 'तुः' पुनरर्थः षष्ठपृथिव्यां ज्ञातव्यमिति, अङ्कतोऽपि ५२५०० ॥ १०८ ॥ सप्तम्यां च कश्चिद्विशेषः समस्तीति तं दर्शयन्नाह—

छसु चेव हवति अंतर-मेयं चिय सत्तमाए हेट्ठुवरिं ।
निरयरहियं मुणेज्जा, सेसेसु निरंतरा निरया ॥ १०९ ॥

'षट्स्वेव' पृथिवीषु भवति अन्तरं प्रस्तटात्प्रस्तटस्य, यत एक एव प्रस्तटः सप्तम्यां वर्त्तते । ततोऽवधारणफलमाह–'एयं चिय' त्ति एतदेव पूर्वोक्तं प्रमाणं सार्द्धद्विपञ्चाशत्सहस्रस्वरूपं 'सप्तम्यां' महातमःप्रभायां 'हेट्ठुवरिं' ति अधस्तादुपरि च, किम्? इत्याह— 'निरयरहियं' ति त्रिसहस्ररूपनरकावासरहितं मन्वीत । इदमत्र तात्पर्यम्–षट्स्वेव पृथिवीष्वनेकप्रस्तटसद्भावादन्तरालं भवति । सप्तम्यां त्वेक एव, ततश्च यत्प्रमाणमष्टसहस्राधिकलक्षस्वरूपं तत्सहस्रत्रयरूप-प्रस्तटप्रमाणरहितं द्विधाकृतं सदधस्तादुपरि च सार्द्धद्विपञ्चाशत्सहस्र-लक्षणं क्षेत्रं नरकरहितं बोद्धव्यम्, अङ्कतोऽपि ५२५०० । अन्तरा-लविरहिते स्थाने का वार्त्ता? इत्याह—'शेषेषु' अन्तरालविरहितेषु नियतक्षेत्रविभागेषु निरन्तरा निरया भवन्तीति ॥ १०९ ॥ संप्रति सीमन्तकप्रस्तटादप्रतिष्ठानप्रस्तटं यावदेकस्यां दिशि विदिशि च विव-क्षितश्रेणौ वृत्तादयो ये नरकावासास्तानुपजिज्ञासोरतिदिशन्नाह—

एगदिसं जं सेढिं, इच्छसि जे तत्थ होंति णिरया उ ।
तिगभइयसुद्धवट्टा, इग तंसे दो य चउरंसे ॥ ११० ॥

'एकदिशि' पूर्वादिकायां उपलक्षणत्वाद्विदिशि चाग्नेय्यादिकायां या श्रेणिर्व्यवस्थिता विभक्तिव्यत्ययश्च प्राकृतत्वात्, 'इच्छसि' अभि-लषसि 'जे' इति यावन्तः 'तत्र' श्रेणौ भवन्ति नरकावासास्तान् ज्ञातुं 'तुः' पुनरर्थः, ततः किम्? इत्याह—'त्रिकभक्तशुद्धवृत्ताः' त्रिकभक्तायां श्रेणौ शुद्धाः–त्रिभागलब्धा वृत्ता भवन्ति, न कश्चित्तत्र

प्रक्षेपः कार्य इति भावः। यदि पुनस्त्रिभिर्भागे पातिते एकको ऽवशिष्यते तदा स एककः ' त्र्यस्रे ' त्र्यस्रराशावेव क्षिप्यते ' दो य चउरंसे ' त्ति यदा द्वावशिष्टौ भवतस्तदैकश्चतुरस्रे चकारात् त्र्यस्रे चैकः क्षिप्यत इति। इदमुक्तं भवति—यदा सीमन्तकादौ कचित्प्रस्तट एकस्यां दिशि विदिशि वा वृत्तादिनरकावासप्रमाणं ज्ञातुमिच्छति तदा या काचिदेकोनपञ्चाशदादिकाऽष्टचत्वारिंशदादिका वा श्रेणिरुपलभ्यते तस्यां त्रिभिर्विभक्तायां लब्धं वृत्तत्र्यस्रचतुरस्रलक्षणेषु त्रिषु स्थानेषु स्थाप्यते, यदि च विभक्तशेष एकको भवति तदा त्र्यस्रराशौ क्षिप्यते, द्वौ पुनर्विभक्तशेषौ यदा भवतस्तदैकस्त्र्यस्रे एकश्चतुरस्रे निक्षिप्यते, ततो वृत्तादिप्रमाणं स्फुटं भवतीति ॥ ११० ॥ एवं सप्तस्वपि पृथ्वीषु नरकावासस्वरूपं सप्रपञ्चं प्रतिपाद्य सांप्रतं तास्वेव सामान्येन प्रतिप्रस्तटं विशेषेण चायुरुत्कृष्टतो जघन्यतश्च प्रतिपादयितुमिच्छुर्गाथाषोडशकमाह—

एगं ति सत्त दस सत्तरेव बावीस तह य तेत्तीसा।
रयणाइसु पुढवीसुं, उक्कोस ठिती उ अयराणि ॥ १११ ॥

एकं त्रीणि सप्त दश सप्तदशैव द्वाविंशतिः तथा च त्रयस्त्रिंशत्, अतराणीत्युत्तरेण संबन्धः, किम्? इत्याह—'रत्नादिषु' रत्नप्रभादिषु पृथ्वीषु ' उत्कृष्टा स्थितिः ' उत्कर्षप्राप्तमवस्थानं ' तुः ' पूरणार्थः ' अतराणि ' सागरोपमानीति ॥ १११ ॥ अथ जघन्या स्थितिरुच्यते—

दसवाससहस्साइं, एग ति सत्त दस तह य सत्तरस।
बावीसा अयराइं, रयणाईणं जहण्णेणं ॥ ११२ ॥

दशवर्षसहस्राणि एकं त्रीणि सप्त दश तथा च सप्तदश द्वाविंशतिः ' अतराणि ' सागरोपमानि, किम्? इत्याह—'रत्नादीनां' रत्नप्रभा-

दीनां पृथ्वीनां "तास्थ्यात्तद्व्यपदेशः" इति तत्स्थानां नारकाणा 'जघन्येन' जघन्यपदापेक्षया स्थितिरिति ॥ ११२ ॥ एनामेव प्रतिप्रस्तटं विभज्य दर्शयन्नाह—

दस गाउइं च सहस्सा, पढमे पयरम्मि ठिति जहगियरा।
सा सयगुणिया बीए, तइयम्मि पुणो इमा होइ ॥ ११३ ॥
गाउई लक्ख जहराणा, उक्कोसा पुव्वकोडि गिद्दिट्ठा।
आदीएँ पुव्वकोडी, दसभागो सागरस्सियरा ॥ ११४ ॥
दसभागो पंचमए, दो दसभागा य होंति उक्कोसा।
एगुत्तरवुड्ढीए, दसेव भागा भवे जाव ॥ ११५ ॥

सहस्रशब्दस्य प्रत्येकमभिसंबन्धात् दश सहस्राणि नवतिश्च सहस्राणि 'प्रथमे प्रतरे' सीमन्तकनाम्नि 'स्थितिः' अवस्थानकालो नरकाणां जघन्येतरा च क्रमेण भवति, जघन्या १०००० उत्कृष्टा ९०००० । 'सा' जघन्येतरा च स्थितिः 'शतगुणिता' शताभ्यस्ता सती 'द्वितीये' द्वितीयप्रस्तटे जघन्येतररूपा जायते, सा चेयम्—जघन्या १०००००० उत्कृष्टा ९००००००। तृतीये प्रस्तटे पुनः 'इयं' वक्ष्यमाणा भवतीति ॥११३॥ नवतिर्लक्षाणि जघन्या उत्कृष्टा पूर्वकोटिर्निर्दिष्टा तीर्थकरगणधरादिभिः। चतुर्थप्रतरे पुनः 'आदौ' जघन्यपदे स्थितिः पूर्वकोटिः, 'दशभागः' दशमोंऽशः सागरस्य 'इतरा' उत्कृष्टा स्थितिर्भवतीति ॥ ११४ ॥ 'दशभागः' उक्तरूपः पञ्चमके प्रस्तटे जघन्या स्थितिः, द्वौ दशभागौ च भवत उत्कृष्टा स्थितिः। एवमेकोत्तरवृद्ध्या तावन्नेयं दशैव भागा भवेयुर्यावत्। क्वचित् "दस दसभागा" इति पाठः, ततश्च दशभिर्भागैः खण्डितस्य सागरोपमस्य

दशभागाः, दश दशभागाः सागरोपममेवेत्यर्थः। इदमस्य गाथादलस्य तात्पर्यम्—षष्ठप्रस्तटे द्वौ दशभागौ सागरोपमस्य जघन्या, त्रयश्चोत्कृष्टा। सप्तमप्रस्तटे त्रयः सागरोपमदशभागा जघन्या चत्वार उत्कृष्टा स्थितिः। एवं पूर्वप्रस्तटोत्कृष्टान् भागान् जघन्यपदे स्थापयता स्वजघन्यांश्चैकेन दशभागेनाभ्यधिकानुत्कृष्टपदे कुर्वता तावन्नेयं यावत्त्रयोदशप्रस्तटे नव सागरोपमदशभागा जघन्या, उत्कृष्टा तु [दश] दशभागा इति॥११५॥

इत्थं प्रथमपृथिव्यां प्रतिप्रस्तटं जघन्यामुत्कृष्टां च स्थितिं प्रतिपाद्य शेषास्वप्युत्कृष्टां तां तावत्प्रतिपादयन्नाह—

उवरिखिइठिइविसेसो, सगपयरविभाग इच्छसंगुणिओ।
उवरिमखिइठिइसहिओ, इच्छियपयरम्मि उक्कोसा॥११६॥

[उपरिक्षितिस्थितिविश्लेषः] उपरिक्षितिस्थितेः पात इत्यर्थः, स्वकप्रतरैर्विभागः क्रियते यश्च तत्र लभ्यते भागः सः 'इच्छासंगुणितः' इच्छयाऽभीष्टप्रतरसंख्यालक्षणया गुणितः सन् 'उपरिमक्षितिस्थितिसहितः' सागरोपमादिपाश्चात्यपृथ्वीस्थितिसमन्वितः ['इच्छितप्रतरे'] अभीष्टप्रतरे उत्कृष्टा स्थितिर्भवति। इयमत्र भावना—यदा शर्कराप्रभायां प्रथमप्रस्तट एवोत्कृष्टा स्थितिर्ज्ञातुमिष्यते तदा शर्कराप्रभाया उत्कृष्टस्थितेः सागरोपमत्रयलक्षणाया मध्याद्रत्नप्रभोत्कृष्टा स्थितिः सागरोपमलक्षणा पात्यते, ततो जातं सागरोपमद्वयम्, तच्चैकादशभिः शर्कराप्रभाप्रतरैरपहृतम्, अपहृते च लब्धौ द्वौ सागरोपमैकादशभागौ, तौ चेष्टप्रतरप्रमाणेनैकलक्षणेन गुणिते "एकगुणं तत्तियं चेव" इति वचनात् तन्मात्रस्थितावुपरितनक्षितिस्थित्या सह संयोजने तयोर्जातमिदमेकं सागरोपमं द्वौ सागरोपमस्यैकादशभागौ, इयं च तत्रोत्कृष्टा स्थितिः।

एवं तावन्नेयं यावदेकादशप्रस्तटे द्वौ सागरोपमैकादशभागावभीष्टप्रतरसंख्ययैकादशलक्षणया गुणितौ, ततो जाता द्वाविंशतिः सागरोपमैकादशभागाः, तेषां चैकादशभिर्भागे हृते लब्धे द्वे सागरोपमे, तत उपरितनक्षित्या एकसागरोपमलक्षणया सह मीलने जातानि त्रीणि सागरोपमानि, इयमेव च तत्रोत्कृष्टा स्थितिः। एवमन्यास्वपि पृथ्वीषु प्रतिप्रस्तटं परिभाव्योत्कृष्टा स्थितिरानेयेति ॥ ११६ ॥ इयं च भागवृद्धिः कासु कासु पृथ्वीषु भवति कासु च न भवति ? इति दर्शयन्नाह—

**रयणादीपुढवीणं, णायव्वा जा खिई चउत्थी उ ॥**
**पंचमियाइविसेसो, जहण्णसहियं फलं होइ ॥ ११७ ॥**

रत्नादिपृथ्वीनां प्रस्तटेषु ज्ञातव्या भागवृद्धिस्तावद्यावत् 'क्षितिः' पृथ्वी चतुर्थी। 'तुः' पूर्ववत्। ततः परं का वार्त्ता ? इत्याह—'पञ्चम्यादिविशेषः' पञ्चम्यादिपृथ्वीषु विशेषः प्राक्पृथिव्यपेक्षया प्रस्तटेष्वायुर्वृद्धौ वर्तते, स चायम्—प्राक्पृथ्वीष्वधस्तनोपरितनस्थितिविशे-(श्ले)षस्य स्वप्रतरैर्भागापहारे आद्यप्रस्तटेषु भागलाभ एवासीत्। पञ्चमीप्रभृति तु प्रथमत एव सभागसागरोपमलाभः। यथा—चतुर्थ्यां दश सागरोपमानि, पञ्चम्यां तु सप्तदश परा स्थितिः, तयोर्विशे (श्ले) षे जातं सप्त सागरोपमानि, तेषां पञ्चमपृथ्वीप्रतरैः पञ्चभिर्भागे हृते लब्धं सागरोपमं द्वौ च सागरोपमप्रमाणस्य पञ्चभागौ, इदं तु लब्धमिष्टप्रतरलक्षणया संख्यया यदा गुण्यते तदा वक्ष्यमाणं फलं भवतीति। आह किमेतदेवोत्कृष्टस्थितिप्रमाणमाहोस्वित्कश्चिदन्योऽपि विशेषः समस्ति ? इत्याशंक्याह—'जघन्यसहितं' स्वकीयजघन्यस्थितिसमन्वितं "उपरिक्षितिस्थितिविशे (श्ले) षः" इत्यादिना क्रमेण यल्लब्धं तत्किम् ? इत्याह—

'फलं' उत्कृष्टस्थितिलक्षणं भवतीति ॥ ११७ ॥ आह विदितमेतद्यदुदितं पञ्चम्याः प्रभृति विशेषः, परं द्वितीयादिपृथ्वीषु षष्ठादिप्रस्तटेषु भागगणनया यदा सागरोपमं लभ्यते तदा च का वार्त्ता ? इत्याह—

पयरम्मि जम्मि अयरं, सयलं वड्ढइ गणिज्जमाणम्मि ;
भागेहिं तओ करणं, छेयविभत्तं फलं होइ ॥ ११८ ॥

प्रतरे यस्मिन् 'अतरं' सागरोपमं 'सकलं' परिपूर्णं 'वर्धते वृद्धिं याति, कथंभूते सति ? इत्याह—'गण्यमाने' संख्यायमान इत्यर्थः, तदनन्तरं किं विधेयम् ? इत्याह—भागैस्ततः करणं वाह्यते, तत इष्टप्रतरे ये लब्धा भागास्ते छेदेन विभज्यन्ते, ततश्छेदविभक्तं फलं भवति । अयमत्र भावः—यथा द्वितीयपृथिव्यामिष्टप्रतरे षष्ठे एकादशभक्तसागरोपमभागद्वयस्य मूलप्रतरलब्धस्य षड्भिर्गुणने जाता द्वादश भागाः, एतेषामेकादशभिर्भागे लब्धमेकं सागरोपममवशिष्टश्चैकादशभागः । ततः सप्तमप्रस्तटे तस्मिन्नवशिष्टैकादशभागे मूलप्रतरलब्धं भागद्वयं क्षिप्तं जातास्त्रय एकादशभागाः । अष्टम एतत्त्रयमध्ये द्वयक्षेपे पञ्च । नवमे पञ्चकमध्ये द्वयक्षेपे सप्त । दशमे सप्तसु द्वयक्षेपे नव । एकादशे तु नवसु द्वयक्षेपे जाता एकादश भागाः, एषां चैकादशभिर्भागे दत्ते लब्धं पुनः सागरोपमम्, तस्मिंश्च षष्ठप्रतरलब्धसागरोपमक्षेपे रत्नप्रभा [सागरोपमक्षेपे च] सागरोपमत्रयम्, एतदेव च तत्रोत्कृष्टा स्थितिः । एवमन्यास्वपि पृथ्वीषु स्वस्वभागक्षेपेण भावना कार्येति ॥ ११८ ॥ इदानीं द्वितीयादिपृथ्वीप्रस्तटेषु षट्त्रिंशत्संख्येषु प्रमाणं जघन्यमुत्कृष्टं च दर्शयन्नाह—

अयरोवमं जहण्णं, बितियाए पत्थडम्मि पढमम्मि ।
अयरोवममुक्कोसं, एक्कारसभाग दो अण्णे ॥ ११९ ॥

न तीर्यत इत्यतरः—सागरस्तेनोपमा यस्य तदतरोपमं 'जघन्यं' जघन्यस्थितिप्रमाणम्, क्व? इत्याह—द्वितीयायाः पृथिव्याः संबन्धिनि प्रस्तटे प्रथमे। तथा 'अतरोपमं' उक्तस्वरूपमेव 'उत्कृष्टं' स्थितिप्रमाणमेकादशभागौ द्वावन्याविति ॥११९॥ अस्यामेव शेषप्रतरातिदेशमाह—

एवं बिउत्तराए, वड्ढीए जाव तिण्णि अयराइं।
ताइं चिय तइयाए, पढमे पयरे जहण्णेणं ॥ १२० ॥
ताइं चिय उक्कोसा, चउरो णवभाग होंति अण्णे उ।
चउरुत्तरिया वड्ढी, णेयव्वा जाव सत्तयरा ॥ १२१ ॥
सत्तेव चउत्थीए, अयरोवम ठिति जहण्णिया होइ।
सत्तेव य उक्कोसा, तिण्णेव य सत्तभागा उ ॥ १२२ ॥

'एवं' प्रथमप्रतरवद् 'द्व्युत्तरया वृद्ध्या' प्रतिप्रतरमपरापरभागद्वयवृद्धिलक्षणया तावन्नेयं यावदेकादशप्रस्तटे जातानि त्रीण्यतराणि, एकस्य सागरोपमस्य रत्नप्रभापृथ्वीगतस्येहानुवर्त्तनाद्द्वयोश्च भागवृद्धिवशेन लब्धत्वात्। अथ वालुकां प्रतीत्याह—'तानि चैव' त्रीणि सागरोपमानि तृतीयायां पृथिव्यां प्रथमे प्रतरे 'जघन्येन' जघन्यतः स्थितिर्भवतीति ॥१२०॥ 'तान्येव' त्रीणि सागरोपमानि 'उत्कृष्टा' उत्कर्षवती स्थितिः 'चत्वारो नवभागाः' नवभागीकृतस्य सागरोपमस्य चत्वारो भागा इत्यर्थः, भवन्ति 'अन्ये तु' सागरोपमत्रयातिरेकिणः पुनः प्रथमप्रतरे। यथा प्रथमप्रस्तटे तथा शेषेष्वपि इत्याह—चतुरुत्तरिका पूर्वा(र्व)पूर्वसागरोपमनवभागचतुष्टयलक्षणे वृद्धिर्नेतव्या यावन्नवमप्रतरे जातान्युत्कृष्टतः सप्तातराणीति ॥१२१॥ सप्तैव चतुर्थ्यां पृथिव्यां प्रथमप्रस्तटे अतरोपमानि स्थितिर्जघन्यका

भवति । सप्तैव चातराण्युत्कृष्टा स्थितिस्त्रय एव च सप्तभागाः 'तुः' पूरणे तत्रैव प्रस्तट इति ॥१२२॥ अस्यामेव शेषप्रस्तटातिदेशमाह—

एवं तिउत्तराए, वड्ढीए ताव जाव दस अयरा ।
पंचमिए दसअयरा, ठिती जहराणा मुणेयव्वा ॥ १२३ ॥
एकारस उक्कोसा, दो चेव य पंचभाग णिद्दिट्ठा ।
सदुभागअयरवड्ढी, णेयव्वा जाव सत्तरस ॥ १२४ ॥
छट्ठीए जहराणं, सतरस अयरोवमा मुणेयव्वा ।
अट्ठारसमुक्कोसा, दो य तिभागा विणिद्दिट्ठा ॥ १२५ ॥

'एवं' प्रथमप्रस्तटवत् त्र्युत्तरया वृद्ध्या तावन्नेयं यावत्सप्तमप्रतरे जातानि दशातराणि । अथ धूमप्रभायां पञ्चम्यां पृथिव्यां दशातराणि स्थितिर्जघन्या मुणितव्या, प्रथमप्रस्तट इति गम्यते ॥१२३॥ एकादश सागरोपमान्युत्कृष्टा द्वौ चैव च पञ्चभागौ निर्दिष्टौ तत्रैव । शेषप्रस्तटातिदेशमाह—'सद्विभागातरवृद्धिः' एकं सागरोपमं द्वौ च सागरोपमस्य पञ्चभागौ प्रतिप्रतरं वृद्धिर्नेतव्या तावद्यावत्सप्तदशातरोपमाण्युत्कृष्टा स्थितिः पर्यन्तप्रतर इति ॥ १२४ ॥ षष्ठ्यां पृथिव्यां जघन्येन सप्तदशातरोपमानि स्थितिर्मुणितव्या । अष्टादशसागरोपमानि मंकारोऽलाक्षणिकः, उत्कृष्टा स्थितिर्द्वौ च त्रिभागौ सागरोपमस्य विनिर्दिष्टाविति ॥ १२५ ॥ शेषप्रतरेष्वतिदेशमाह—

एवं बिउत्तराए, णेयव्वं होइ जाव बावीसा ।
बावीस सत्तमाए, तेत्तीसं होंति उक्कोसा ॥ १२६ ॥

'एवं' प्रथमप्रतरवद् 'द्व्युत्तरया' त्रिभागद्वययुक्तसागरोपमलक्षणया वृद्ध्या तावन्नेतव्यं भवति यावद्द्वाविंशतिः सागरोपमानि षष्ठपृथिव्यां

तृतीयप्रस्तट उत्कृष्टा स्थितिर्भवतीति। अथ महातमःप्रभायाम्—द्वाविंशतिः सागरोपमानि जघन्या स्थितिः सप्तम्याम्, त्रयस्त्रिंशत्सागरोपमानि भवन्त्युत्कृष्टा स्थितिः। सर्वत्राद्याद्यप्रस्तटोत्कृष्टा स्थितिरधस्तनाधस्तनप्रस्तटे जघन्यस्थितितया ज्ञातव्या। अत्र च शरीरोपपातविरहादिका चित्रा नारकवक्तव्यता वक्ष्यमाणदेवेन्द्रकेष्विव वक्तुमुचिता परमत्यन्तविस्तरभयान्न ग्रन्थकारस्तां लिखितवानिति संभाव्यते। तदर्थिना तु ग्रन्थान्तरादवसेयेति ॥१२६॥ इदानीं नरकेन्द्रकवक्तव्यतामुपसंहरन्नाह—

**णरइंदयाण लेसो, गुरूहिं मयरागदोसरहिएहिं।**
**कहिओ घेत्तव्वो उण, हासादीविगहरहितेहिं ॥१२७॥**

'नरकेन्द्रकाणां' आवलिकाप्रविष्टनरकावासलक्षणानामुपलक्षणत्वाच्छेषनरकाणां च 'लेशः' तद्गतवक्तव्यतैकदेशलक्षणः 'गुरुभिः' जिनगणधरादिभिः, कीदृशैः? इत्याह—'मदरागद्वेषरहितैः' अहङ्काराभिष्वङ्गमत्सररहितैरत्यन्तविश्वसनीयवचनैरित्यर्थः, किम्? इत्याह—'कथितः' प्रतिपादितः। अयं च संप्रति मया तदनुसारेण ज्ञाप्यमानः 'ग्रहीतव्यः पुनः' आदरणीयस्तु हास्यादिविकथारहितैः सद्भिः शिष्यैः, आप्तप्रणीतस्यार्थस्य हास्यादिदोषलक्षणयाऽवज्ञया ग्रहणे प्रत्युत महानर्थसंभवादिति ॥ १२७ ॥

इति श्रीमुनिचन्द्रसूरिविरचितायां देवेन्द्रनरकेन्द्रकवृत्तौ नरकेन्द्रकाधिकारः समाप्तः।

॥ अर्हम् ॥

# द्वितीयं देवेन्द्रप्रकरणम् ।

उक्ता नरकेन्द्रकाः । संप्रति देवेन्द्रकान् वक्तुकामः प्राक्सामान्येन कृतमङ्गलाभिधेयादिनिर्देशोऽपि विस्मृतिशीलशिष्यसंस्मृत्यर्थम् अधिकारान्तरत्वाद्वा विशेषमङ्गलाभिधेयाभिधानायाह—

तेलोक्कमत्थयत्थे, सिद्धे अभिवंदिऊण तिविहेण ।
देविंदया उ वोच्छं, गुरुवएसाणुसारेण ॥ १२८ ॥

'त्रैलोक्यमस्तकस्थान्' सर्वासाधारणगुणग्रामरमणीयस्वरूपतया लोकत्रयोपरिवर्तिक्षेत्रव्यवस्थिततया च त्रिजगज्जनजातमौलिमाणिक्यकल्पान् 'सिद्धान्' प्रागेव निरूपितनिरुक्तान् 'अभिवन्द्य' प्रणामस्तवाभ्यामभिवाद्य 'त्रिविधेन' मनोवाक्कायलक्षणेन करणेन, किम् ? इत्याह—'देवेन्द्रकान्' विमानावासविशेषान् 'तुः' पूरणे 'वक्ष्ये' अभिधास्ये 'गुरूपदेशानुसारेण' विमानप्रविभक्तिनामकाध्ययननिरूपणनिपुणधिषणाधिकचिरन्तनाचार्यप्रवर्त्तितोपदेशानुवर्तनेन । अत्र च मङ्गलाभिधेयप्रयोजनसंबन्धचर्चः सामान्यमङ्गलाभिधायकादिसूत्रवत्स्वयमेव वाच्य इति ॥ १२८ ॥ देवेन्द्रकानेव प्रमाणतोऽभिधित्सुराह—

तेरस बारस छ पंच चेव चत्तारि चउसु कप्पेसु ।
गेवेज्जेसुं तिय तिय, एगो उ अणुत्तरेसु भवे ॥ १२९ ॥

त्रयोदश सौधर्मेशानयोः प्रथमद्वितीयकल्पयोः समभूमिकयोः ।

द्वादश सनत्कुमारमाहेन्द्रयोस्तृतीयचतुर्थयोर्देवनिवासयोः समतयाऽवस्थितयोः। षड् ब्रह्मलोके पञ्चमदेवलोके। पञ्च चैव लान्तके षष्ठे। 'चत्तारि' त्ति चत्वारश्चत्वारो विमानेन्द्रकाः 'चतुर्षु' चतुःसङ्ख्येषु, तद्यथा—शुक्रे सप्तमे चत्वारः, सहस्रारेऽष्टमे चत्वारः, आनतप्राणतयोस्समभूमिकयोश्चत्वारः, आरणाच्युतयोरपि समभूमिकयोश्चत्वारः। 'कल्पेषु' देवाधिवासेषु—देवलोकेष्वित्यर्थः, कल्पशब्दस्याधिवासपर्यायस्यापि संभवात्, यथोक्तम्—"सामर्थ्ये वर्णनायां च, कल्पने छेदने तथा। औपम्ये चाधिवासे च, कल्पशब्दं विदुर्बुधाः॥ १॥" तथा 'ग्रैवेयकेषु' लोकपुरुषग्रीवास्थानभवेष्वधस्तनमध्यमोपरितनसंज्ञितेषु प्रत्येकमधस्तनाधस्तनादिभेदेन भिन्नेषु नवसु विमानविशेषेषु 'त्रिकं त्रिकं' एकैकस्मिन् त्रिके त्रयस्त्रयः, सर्वे नवेत्यर्थः। 'एकस्तु' एकः पुनः 'अनुत्तरेषु' सर्वविमानोपरिवर्त्तितया प्राप्तानुत्तराभिधानेषु विमानभेदेषु 'भवेत्' जायेतेन्द्रक इति। एवं चैते त्रयोदशादिसङ्ख्यसर्वेन्द्रकमीलने द्वाषष्टिर्भवन्तीति। स्थापना चेयम्—१३।१२।६।५।४।४।४।४।३।३। ३।१। सर्वेऽपि ६२॥ १२९॥ अत एवाह—

बावट्ठि विमाणिंदा, पढमावलिया वि तत्तिया चेव।
एगट्ठी पुण बीए, सेसा एक्केक्कपरिहीणा॥ १३०॥

'द्वाषष्टिर्विमानेन्द्राः' ऊर्ध्वलोकविमानावासप्रस्तटा भवन्ति। तथा 'प्रथमावलिकापि' उडुनामकप्रथमप्रस्तटमध्यवर्ति (ग्रं० १०००) विमानेन्द्रकं प्रतीत्य चतसृषु दिक्षु प्रवृत्ता विमानश्रेणिः, न केवलं सर्वेन्द्रकसङ्ख्येत्यपि शब्दार्थः, 'तावती चैव' प्रत्येकं द्वाषष्टिप्रमाणैव। 'एकषष्टिः पुनः' एकषष्टिविमानेन्द्रकप्रमाणा श्रेणिः पुनः 'द्वितीये'

प्रस्तटे भवति । याः पुनः 'शेषाः' तृतीयादिप्रस्तटप्रतिबद्धा द्वाषष्टितमप्रस्त-टपर्यन्ता आवलिकास्ताः 'एकैकपरिहीनाः' एकैकेन विमानावासेनोना यावद् ग्रैवेयकपर्यन्तप्रस्तटे विमानद्वयरूपा श्रेणिः । सर्वार्थसिद्धि-प्रस्तटे तु दिक्ष्वेकैकस्यैव विमानस्य सद्भावान्न द्व्यादिरूपा श्रेणिः । अत्र च सर्वप्रस्तटेषु दिक्ष्वेव श्रेणिसद्भावः, विदिक्षु [पुनः] सद्भावस्यात्रैव— "मुहभूमीओ इणमो दिसाण" (गाथा १८६) इत्यादिगाथया निषेत्स्यमा-नत्वादिति ॥ १३० ॥ संप्रति सर्वेषां विमानेन्द्रकाणां गाथासप्तकेन नामान्यभिधित्सुराह—

उडुचंदरययवग्गू, वीरियवरुणो तहेव आणंदे ।
बंभे कंचणरुइले(रे), ¹चंचे अरुणे दिसे चेव ॥ १३१ ॥

उडु १ चन्द्र २ रजत ३ वल्गवः ४ वीर्य ५ वरुणौ ६ तथैवा-नन्दः ७ ब्रह्मा ८ काञ्चन ९ रुचिरौ १० चञ्चः ¹¹ ११ अरुणः १२ दिशः १३ चैवेति ॥ १३१ ॥

वेरुलियरुयगरुइगा(या), अंके फलिहे तहेव तवणिज्जे ।
मेहे अग्घे हालिद्द णलिणे तह लोहियक्खे य ॥ १३२ ॥

वैडूर्य १४ रुचक १५ रुचिताः १६ अङ्कः १७ स्फटिकः १८ तथैव तपनीयः १९ मेघः २० अर्घः २१ हारिद्रः २२ नलिनः २३ तथा लोहिताक्षः २४ चेति ॥ १३२ ॥

वइरे अंजणवरमालअरिट्ठे तह य देव सोमे य ।
³णंगल बलभद्दे या, चक्क गया सोत्थि णंदयावत्तो ॥१३३॥

---

१ "वंचे" इत्यन्यत्र । २ "वञ्चः" इत्यन्यत्र । ३ "मंगल" इत्यन्यत्र दृश्यते ।

वज्रः २५ अञ्जन २६ वरमाल २७ अरिष्टाः २८ तथा च देवः २९ सोमः ३० च लाङ्गलः ३१ बलभद्रः ३२ च, दीर्घत्वं च प्राकृतत्वात् । चक्रं ३३ गदा ३४ स्वस्तिकः ३५ नन्दावर्तः ३६ । इयं च पूर्वार्द्धसमद्वितीयार्द्धा गीतिसंज्ञा गाथा विज्ञेयेति ॥ १३३ ॥

आभंकरे य गिद्धी, केऊ गरुले य होइ बोधव्वे ।
बंभे बंभहिए पुण, बंभुत्तर लंतए चेव ॥ १३४ ॥

आभङ्करः ३७ च गृद्धिः ३८ केतुः ३९ गरुडः ४० च भवति बोद्धव्यः । ब्रह्मा ४१ ब्रह्महितः पुनः ४२ ब्रह्मोत्तरः ४३ ल(ला)न्तकः ४४ चैवेति ॥ १३४ ॥

महसुक्कसहस्सारे, आणय तह पाणए य बोधव्वे ।
पुप्फमलंकारे आरणे य तह अच्चुए चेव ॥ १३५ ॥

महाशुक्र ४५ सहस्रारौ ४६ आनतः ४७ तथा प्राणतः ४८ च बोद्धव्यः । पुष्पं ४९ अलङ्कारः ५० आरणः ५१ च तथाऽच्युतः ५२ चैवेति ॥ १३५ ॥

सुदंसणे सुप्पबुद्धे, मणोरमे चेव होति बोधव्वे ।
तत्तो य सव्वओभद्दे, विसाले सुमणे इय ॥ १३६ ॥

सुदर्शनः ५३ सुप्रबुद्धः ५४ मनोरमः ५५ चैव भवति बोद्धव्यः 'ततश्च' तदनन्तरं पुनः सर्वतोभद्रः ५६ विशालः ५७ सुमनाः ५८ इति च । इयं च गाथा "विषमाक्षरपादं च" इत्यादिगाथालक्षणानुसारिणी विज्ञेयेति ॥ १३६ ॥

---

१ "मङ्गलः" इत्यन्यत्र ।

सोमणसे पीइकरे, आइच्चे चेव होइ बोधव्वे ।
सव्वट्ठसिद्धिणामे, सुरिंदया एते बावट्ठी ॥ १३७ ॥

सौमनसः ५९ प्रीतिकरः ६० आदित्यः ६१ चैव भवति बोद्धव्यः । सर्वार्थसिद्धिनामा ६२ । एवं 'सुरेन्द्रकाः' विमानेन्द्रकाः 'एते' ये प्रागुक्तास्ते द्वाषष्टिर्वर्तंत इति । अत्रोडुचन्द्रादीनि नामानि प्रस्तटानां प्रस्तटमध्यगतविमानानां च तुल्यतयाऽवबोद्धव्यानि । प्रस्तटा नाम समश्रेणितया व्यवस्थिता विमानावासा एव, न पुनस्तदाधारभूताऽन्या काचित्पृथ्वी समस्ति, रत्नप्रभादीनामेवाधस्तात्सप्तानामेकस्याश्चेषत्प्राग्भाराया उपरि पृथ्वीत्वेन शास्त्रे भणनादिति ॥ १३७ ॥ संप्रत्यावलिकागतविमानावासनामान्यभिधित्सुरिन्द्रकासन्नवर्तिचतुर्दिग्गतविमाननामानि तावदाह—

उडुप्पभं च पुव्वेण, उडुमज्झं दक्खिणे दिसाभागे ।
उडुयावत्तं अवरेणुडुसिट्ठं उत्तरे पासे ॥ १३८ ॥

'उडुप्रभं च' [ उडुप्रभनामकं च 'पूर्वेण' पूर्वस्यां दिशि, उडुमध्यं 'दक्षिणे दिग्भागे' दक्षिणस्यां दिशि, उडुकावर्तं 'अपरेण' अपरस्यां दिशि, ] उडुशिष्टं उत्तरे पार्श्वे । एषापि "विषमाक्षरपादं च" इत्यादिगाथालक्षणानुयायिन्येवेति ॥ १३८ ॥ पूर्वदिग्गतावलिकाद्वितीयादिविमानानां नामनिर्देशायाह—

पढमवितियादिपुव्वक्कमेण तह उडुपभस्स पुव्वेण ।
विज्जा नामविभत्ति, एगट्ठीए विमाणाणं ॥ १३९ ॥

प्रथमद्वितीयादिश्चासौ पूर्वक्रमश्च—पूर्वानुपूर्वीलक्षणस्तेन, तथेति पूरणार्थः, 'उडुप्रभस्य' अनन्तरमेवोपदर्शितस्य 'पूर्वेण' पूर्वस्यां दिशि

' विघात् ' जानीयाद् बुद्धिमान्, काम् ? इत्याह—' नामविभक्ति ' नामविभागं ' एकषष्टेः ' एकषष्टिप्रमाणानां विमानानामिति ॥ १३९ ॥
एनामेव गाथाषट्केनाह—

सत्थिय सिरिवच्छे वद्धमाणए अंकुसे भसे य जवे।
छत्ते विमले कलसे, उसभे सीहे समे सुरभी ॥ १४० ॥

स्वस्तिकः १ श्रीवत्सः २ वर्द्धमानकः ३ अङ्कुशः ४ झषः ५ च यवः ६ छत्रं ७ विमलः ८ कलशः ९ वृषभः १० सिंहः ११ समः १२ सुरभिः १३ इति ॥ १४० ॥

जसहर सव्वओभद्दे, विमले सोवत्थिए सुभद्दे य।
अरए विरए सुप्पभ, इंद महिंदे उविंदे य ॥ १४१ ॥

यशोधरः १४ सर्वतोभद्रः १५ विमलः १६ सौवस्तिकः १७ सुभद्रश्च १८ अरजाः १९ विरजाः २० सुप्रभः २१ इन्द्रः २२ महेन्द्रः २३ उपेन्द्रः २४ चेति ॥ १४१ ॥

कमले कुमुदे णलिणे, उप्पल पउमे य पोंडरीए य।
सोगंधिए तिगिञ्छि य, केसर चंपग असोए य ॥१४२॥

कमलं २५ कुमुदं २६ नलिनं २७ उत्पल २८ पद्मौ २९ च पौण्डरीकं ३० च सौगन्धिकं ३१ तिगिच्छः ३२ च केशरः ३३ चम्पकः ३४ अशोकः ३५ चेति ॥ १४२ ॥

सोमे सूरे सुक्के, णक्खत्ते चंदणे ससी मलए।
णंदण सोमणसे या, सारसमुद्दे सिवे धम्मे ॥ १४३ ॥

सोमः ३६ शूरः ३७ शुक्रः ३८ नक्षत्रं ३९ चन्दनः ४०

शशी ४१ मलयः ४२ नन्दनं ४३ सौमनसः ४४ च सार ४५-समुद्रौ ४६ शिवः ४७ धर्मः ४८ इति ॥ १४३ ॥

वेसमणंबरकणया, बोधव्वे लोहियक्खणामे य ।
णंदीसरे अमोहे, जलकंते सूरकंते य ॥ १४४ ॥

वैश्रमण ४९ अम्बर ५० कनकाः ५१ बोधव्यो लोहिताक्षनामा ५२ च नदीश्वरः ५३ अमोघः ५४ जलकान्तः ५५ सूर्यकान्तः ५६ चेति ॥ १४४ ॥

अव्वाबाहे दोगुंदए य सिद्धत्थकुंडले सोमे ।
एते एगट्ठी खलु, पुव्वावलिए विमाणिंदा ॥ १४५ ॥

अव्याबाधः ५७ दोगुन्दकः ५८ च सिद्धार्थ ५९ कुण्डलौ ६० सोमः ६१ । 'एते' प्रागुक्तनामानः 'एकषष्टिः' एकाधिकषष्टिसङ्ख्याः 'खलुः' निश्चये 'पूर्वावलिकायां' पूर्वदिग्वर्तिश्रेणावित्यर्थः 'विमानेन्द्राः' इन्द्रकविमाना इति ॥ १४५ ॥ एतान्येव नामानि यथा दक्षिणादिदिक्त्रयवर्त्तिविमानश्रेणिषु योज्यन्ते तथाऽऽह—

मज्झा दाहिणपासे, आवत्ता अवरओ मुणेयव्वा ।
सिट्ठा उत्तरपासे, पुव्विल्लाओ विभइयव्वा ॥ १४६ ॥

'मध्याः' मध्यशब्दोपपदाः स्वस्तिकश्रीवत्सादयोऽभिधानविशेषाः 'दक्षिणपार्श्वे' दक्षिणदिग्भागवर्तिश्रेणौ, तथा 'आवर्त्ताः' आवर्त्तशब्दोपपदा एत एव 'अपरतः' अपरस्यां दिशि 'मुणितव्याः' ज्ञातव्याः, तथा 'शिष्टाः' शिष्टशब्दोपपदास्त एव 'उत्तरपार्श्वे' उत्तरदिग्भागे, किम्? इत्याह—पौरस्त्यादभिधानसमुदायात् इत्थं 'विभक्तव्याः' विभागेन स्थापनीयाः । इदमुक्तं भवति—यदभिधानाः

पूर्वस्यां दिशि विमानावासा उक्ता द्वितीयादयस्तदभिधाना एव दक्षिणस्यां दिशि, परं मध्यशब्दोपपदा भणितव्याः, तद्यथा—मध्यस्वस्तिकः १ मध्यश्रीवत्सः २ मध्यवर्द्धमानकः ३ इत्यादि। एवमपरस्यां दिश्यावर्त्तोपपदाः, यथा—आवर्त्तस्वस्तिकः १ आवर्त्तश्रीवत्सः २ आवर्त्तवर्द्धमानकः ३ इत्यादि। एवमुत्तरस्यां शिष्टशब्दोपपदाः, यथा—शिष्टस्वस्तिकः १ शिष्टश्रीवत्सः २ शिष्टवर्द्धमानकः ३ इत्यादि। एवं चन्द्रादिशेषप्रस्तटेष्वपि स्वकीयेन्द्रकनामानुसारेण चन्द्रप्रभ १ चन्द्रमध्य— २ चन्द्रावर्त्त ३ चन्द्रशिष्टा ४ दिलक्षणेन पूर्वादिदिग्गतश्रेण्यादिभूतविमानचतुष्कनामनिर्देशस्तावन्नेयो यावद् ग्रैवेयकपर्यन्तप्रस्तटे आदित्याभिधाने—आदित्यप्रभ आदित्यमध्य आदित्यावर्त आदित्यशिष्ट इति। तथैतेष्वेव प्रस्तटेष्वावलिकाप्रविष्टद्वितीयादिविमानेषु दिक्चतुष्टयसंबन्धिषु सर्वेषु स्वस्तिकमध्यस्वस्तिकावर्त्तस्वस्तिकशिष्टस्वस्तिकप्रभृतिर्नामनिर्देशः श्रेणिपर्यन्त एकैकनामहान्या तावद्वाच्यो यावदादित्यप्रस्तटे स्वस्तिको मध्यस्वस्तिक आवर्तस्वस्तिकः शिष्टस्वस्तिक इति संभाव्यते, नरकप्रस्तटेष्वनेनैव क्रमेण नामनिर्देशादिति॥ १४६॥ अथ प्रकीर्णकाभिधानदेवावासघननामनिरूपणायाह—

**इट्ठा वा सुभगा वा, णामा जे केइ अत्थि लोगम्मि।**
**तन्नामगा विमाणा, भवंति वेमाणियसुराणं॥ १४७॥**

'इष्टाः' अभिलषणीयाः सर्वेन्द्रियाह्लादमाश्रित्य काकलीगीत—मयूररूप—कस्तूरिका—शर्करा—हंसतूलीप्रभृतयः, 'सुभगाः' स्वभावत एव सुभगभावभाजः पुरन्दर—नरनाथ—पाथोनाथादयः, वाशब्दावन्योन्यसमुच्चये, के? इत्याह—'नामाः' परिणामा वस्तुविशेषा

इत्यर्थः 'ये' केचन चित्ररूपाः 'सन्ति' विद्यन्ते 'लोके' जगत्त्रयलक्षणे, ततः किम्? इत्याह—'तन्नामकाः' इष्टसुभगपदार्थसार्थसदृशाभिधानाः 'विमानाः' प्रकीर्णकाभिधानास्त्रिदशावासाः भवन्ति 'वैमानिकसुराणां' सौधर्मादिदेवलोकवर्तिवृन्दारकाणामिति ॥ १४७॥ इदानीमावलिकाप्रविष्टविमानप्रमाणानयनाय करणमभिधित्सुस्तदुपयोगिनीं परिभाषां तावदाह—

पंचेव हवदि आदी, चत्तारि य उत्तरं मुणेयव्वं ।
बावट्ठिमेव गच्छो, विमाणवलि तत्तिया चेव ॥ १४८ ॥

'पञ्चैव' विमानानि विजयादीनि सर्वार्थसिद्ध्यभिधानप्रस्तटगतानि भवन्ति 'आदिः' प्रारम्भः। 'चत्तारि' त्ति चत्वारश्च 'उत्तरं' वृद्धिः प्रतिप्रस्तटं 'मुणितव्यं' बोद्धव्यम्। तथा द्वाषष्टिरेव गच्छः, 'गच्छः' निखिलप्रस्तटप्रमाणलक्षणो मुणितव्यः । तथा 'विमाणवलि' त्ति विमानावलयः—प्रत्येकं पूर्वादिदिग्गता विमानश्रेणय ऊर्ध्वाधोभागे चिन्त्यमानाः 'तावत्य एव' द्वाषष्टिरूपा एव। यच्च विजयादीनामेकैकत्वेऽपि श्रेणित्वमुच्यते तत्पूर्वादिदिगाश्रितत्वेन श्रेणिगतविमानसदृशत्वात् । एवं नरकेन्द्रकेष्वपि "पञ्चेव हवइ आई" इत्यादि ( ४९ ) गाथाव्याख्याने कालादीनां श्रेणिगतनरकावासत्वं वाच्यमिति ॥ १४८ ॥ अथ करणमाह—

गच्छुत्तरसंवग्गे, उत्तरहीणम्मि पक्खिवे आदिं ।
अंतिमधण आदिजुयं, गच्छद्धगुणं तु सव्वधणं ॥ १४९ ॥

गच्छोत्तरयोः—द्वाषष्टिचतुष्टयरूपयोः संवर्गः—परस्परगुणना गच्छोत्तरसंवर्गस्तत्र, किम्? इत्याह—'उत्तरहीने' चतुष्टयशून्ये 'प्रक्षिपेत्'

न्यसेत् ‘ आदिं ’ पञ्चलक्षणम्, ततः ‘ अन्तिमधनं ’ सौधर्मप्रस्तटगत-विमानाग्रं लभ्यते। तदेव यदा आदियुतं सद्गच्छार्द्धगुणं क्रियते ‘तुः’ पुनरर्थः तदा ‘ सर्वधनं ’ सर्वप्रस्तटश्रेणिगतविमानावासाग्रं संपद्यते। अयमत्र परमार्थः—गच्छोत्तरयोः संवर्गे जाते द्वे शते अष्टचत्वारिंशे २४८, अत्र च चतुष्टयलक्षणे उत्तरेऽपनीते पञ्चकलक्षणे चादौ प्रक्षिप्ते लब्धे द्वे शते एकोनपञ्चाशदधिके २४९, एतत्सर्वार्थसिद्धयाख्यप्रथम-प्रस्तटापेक्षयाऽन्तिमो यः सौधर्माभिधानप्रथमकल्पे प्रथमप्रस्तटस्तत्र विमानाग्रं भवति। एतदेवादिना पञ्चलक्षणेन युक्तं सद्गच्छार्द्धेनैकत्रिंशल्लक्षणेन यदा गुण्यते तदाऽऽवलिकागतसर्वविमानाग्रं संपद्यते, तच्चेदम्—अष्टसप्ततिशतानि चतुःसप्तत्यधिकानि ७८७४ ॥ १४९ ॥ यदा कश्चित्सौधर्मप्रथमप्रस्तटादुपरि गत्वा द्वितीयतृतीयादिप्रस्तटे विमानाग्रं जिज्ञासति तदा किं विधेयम् ? इत्याह—

जहिं पयडम्मि इच्छसि, सव्वविमाणाण सव्वसंखेवं।
तं बावट्ठिविसुद्धं, चउगुणिय सपंचगं पयरं ॥ १५० ॥

‘ यत्र ’ द्वितीयादौ प्रस्तटे ‘ इच्छसि ’ अभिलषसि हे विमान-प्रमाणजिज्ञासो ! ‘ सर्वविमानानां ’ आवलिकागतलक्षणानां ‘ सर्व-संक्षेपं ’ समुदायसङ्ख्यां, तत्र किम् ? इत्याह—‘ तं ’ इष्टप्रतरं ‘ द्वाष-ष्टिविशुद्धं ’ द्वाषष्टेरपनीतं विधेहि, तत्र च यदवशिष्टं तत् ‘चतुर्गुणितं’ चतुर्भिराहतं तदनु ‘ सपञ्चकं ’ पञ्चकयुक्तं कृत्वा ‘ प्रतरं ’ इष्टप्रतर-श्रेणिगतविमानाग्रमवबुध्यस्व। तथाहि—यदा कश्चिदिह पञ्चमप्रतरे विमानाग्रं बुभुत्सते तदा तत्सङ्ख्या पञ्चकलक्षणा द्वाषष्टेरपनीयते जाता सप्तपञ्चाशत् ५७, तस्यां चतुर्भिर्गुणितायां पञ्चकयुक्तायां च लब्धे द्वे

शते त्रयस्त्रिंशदधिके, अङ्कतोऽपि २३३, एतदेव तत्र श्रेणिगतदेवावासमानमिति ॥ १९० ॥ अधुना यदा सर्वार्थसिद्धप्रस्तटादधोऽवतीर्य क्वचित्प्रस्तटे श्रेणिप्रतिबद्धविमानसङ्ख्यां पृच्छेत्तदा किमुत्तरम्? इत्याह—

**जावइयं इच्छेज्जा, तावइयं चउहिं संगुणं काउं ।**
**एगं तत्थ छुभित्ता, तावइयाइं विमाणाइं ॥ १९१ ॥**

यावत्प्रमाणं 'इच्छेत्' श्रेणिसंस्थविमानपरिमाणजिज्ञासयाऽभिलषेत् प्रस्तटं तावत्प्रमाणं चतुर्भिः संगुणं कृत्वा तथा एकं तत्र क्षिप्त्वा यल्लभ्यते तावन्ति विमानानि तत्र जानीहि । तथाहि—यदा कश्चित्सर्वार्थसिद्धप्रस्तटादधस्तादवतीर्य पञ्चमे प्रस्तटे विमानाग्रमधिगन्तुमिच्छति तदा तत्प्रतरसङ्ख्यां पञ्चकलक्षणां चतुर्गुणामेककयुतां कुर्याज्जातैकविंशतिः, इदमेव तत्र विमानप्रमाणमिति ॥ १९१ ॥ इदानीं सर्वार्थसिद्धिप्रस्तटादध एकेनैव गाथासूत्रेण प्रस्तटप्रमाणाद्विमानप्रमाणं विमानप्रमाणाच्च प्रस्तटप्रमाणं निर्दिदिक्षुराह—

**इच्छा चउसंगुणिया, रूवजुया पत्थडे तति विमाणा ।**
**रूवूणा य विमाणा, चउभइया पत्थडं जाण ॥ १९२ ॥**

'इच्छा' पञ्चकादिरूपा चतुःसंगुणिता सती रूपयुता कार्या, ततः 'प्रस्तटे' पञ्चमादौ 'तइ' त्ति तावन्ति विमानानि भवन्ति । भावना चास्यानन्तरोक्तैवेति । रूपोनानि च विमानानि पुनश्चतुर्भिर्भक्तानि 'प्रस्तटं' प्रस्तटसंख्यां जानीहि, तथाहि—कश्चिदेकविंशतिं विमानान्युपदर्श्य वदेत् क्व प्रस्तटे एतानि लभ्यन्ते? तदैकविंशतेरेकमपनीय शेषस्य चतुर्भिर्भागोऽपह्नियते लब्धाः पञ्च, ततो ज्ञायते पञ्चमप्रस्तटे एतानि विमानानि । एवं शेषेष्वपि प्रस्तटेषु भावना कार्येति

॥ १९२ ॥ पुनरप्युडुप्रस्तटमादौ कृत्वा प्रकारान्तरेण प्रस्तटप्रमाणाद्वि-मानप्रमाणानयनायाह—

**इच्छा चउसंगुणिया, रूवहिया ऊणिया य पणगेणं ।**
**पढमसुहाओ सुद्धा, माणं तं इट्ठपयरम्मि ॥ १९३ ॥**

'इच्छा' अभीष्टप्रतरलक्षणा चतुःसंगुणिता रूपाधिका 'ऊनिता च' ऊनीकृता पुनः पञ्चकेन तथा 'प्रथममुखात्' सौधर्म [ प्रथम-प्रस्तटविमानावासाग्रलक्षणात् 'शुद्धा' अपनीता सती यदवशिष्टं 'मानं' श्रेणिगतविमानलक्षणं तत् 'इष्टप्रतरे' पञ्चकादिरूपे जानीहि । यथा—इच्छा सौधर्मपञ्चम ] प्रस्तटविमानप्रमाणलक्षणा चतुर्गुणा रूपाधिका पञ्चकोना सती संपन्नषोडशरूपा प्रथमप्रस्तटाग्रादेकोनपञ्चाशदधिकशतद्वयमानात् २४९ अपनीयते, यत्तत्रापनीतशेषं त्रयस्त्रिंशदधिकशतद्वयलक्षणं २३३ तत्तत्र प्रस्तटे श्रेणिगतविमानप्रमाणमिति ॥ १९३ ॥ संप्रतीष्टप्रमाणादेकदिग्गतविमानप्रमाणं सर्वार्थसिद्धप्रस्तटात्प्रस्तटप्रमाणं चाभिधित्सुराह—

**उद्दिट्ठं रूवूणं, चउभइयं तं भवेज्ज एगदिसं ।**
**उवरिल्लाओ तइमं, च पत्थडं तं वियाणाहि ॥ १९४ ॥**

'उद्दिष्टं' विवक्षितं विमानप्रमाणं रूपोनं चतुर्विभक्तं क्रियते यत्तत्र लभ्यते तद्भवेदेकस्यां दिशि विमानमानं 'उपरितनात्' सर्वप्रस्तटोपरितनात्प्रस्तटात्सर्वार्थसिद्धाख्यात् 'तइमं' ति तत्प्रमाणमनन्तरोक्तन्यायलब्धैकदिग्गतविमानसमानसंख्यं 'चः' समुच्चये प्रस्तटं 'तं' यत्रैकदिग्गतदेवावासप्रमाणमानीतं 'विजानीहि' अवबुध्यस्व । यथा केनचिद्द्वे शते त्रयस्त्रिंशदधिके विमानानामुपदर्शिते, ततस्तेषु विमाने

चतुर्भक्तेषु यल्लब्धमष्टपञ्चाशत्तदेकस्यां दिश्यावलिकाश्रितविमानप्रमाणं स्यात्। यत्र च प्रस्तटे एतदुपलभ्यते स सर्वार्थसिद्धप्रस्तटादष्टपञ्चाशत्तमो भवति। एवमन्यत्रापीति ॥ १९४॥ यदा पुनरिष्टविमानप्रमाणात्सर्वाधस्तनप्रतरं प्रतीत्योपरितनप्रस्तटप्रमाणमानेतुमिष्यते तदा का वार्त्ता? इत्याह—

पढममुहाओ सोहिय, इट्ठविमाणाइ चउहि सेस भए।
लद्धं रूवेणहियं, इट्ठविमाणाण तं पयरं ॥ १५५ ॥

'प्रथममुखात्' सौधर्माद्यप्रतरविमानावासाग्रलक्षणात् शोधयित्वा 'इष्टविमानानि' उद्दिष्टरूपाणि ततश्चतुर्भिः 'शेषं' उद्धरितं 'भजेत्' अपहरेत्। ततोऽपि यद् 'लब्धं' प्राप्तं तद्रूपेणाधिकं सत् किम्? इत्याह—इष्टविमानानामाश्रयभूतं तं प्रतरं परिच्छिन्धि। तथाहि—कश्चिद्विमानपञ्चकमुपदर्श्य ब्रूयात् कतिथप्रस्तटे विमानाग्रमेतत्? तत्र सौधर्मप्रथमप्रस्तटाग्रादेकोनपञ्चाशदधिकशतद्वयप्रमाणात्तस्मिन् शोधिते शेषे चतुर्भिरपहृते भागलब्धे च रूपाधिके जाता द्वाषष्टिः ६२, एतत्प्रमाणे प्रस्तटे तद्विमानाग्रं भवतीति तस्मै निवेद्यत इति ॥ १९९ ॥ संप्रति प्रतिकल्पं श्रेणिगतविमानप्रमाणं प्रजिज्ञापयिषुर्मुखप्रमाणप्रतिपादनाय पादोनं गाथात्रयमाह—

दोण्णि सय अउणपण्णा, सत्ताणउयं सयं च बोधव्वं।
अउणापण्णं च सयं, सयमेगं पणुवीसं च ॥ १५६ ॥
पंचुत्तरसयमेगं, अउणाणउई य होइ बोधव्वा।
तेवत्तरि सगवण्णा, ईयालीसा य हेट्ठिमए ॥ १५७ ॥

अउणत्तीसा य भवे, सत्तरस य पंच चेव आदीओ।
कप्पेसु पत्थडाणं,

द्वे शते एकोनपञ्चाशदधिके सौधर्मेशानयोः। सप्तनवतं शतं च बोद्धव्यं सनत्कुमारमाहेन्द्रयोः। एकोनपञ्चाशं च शतं ब्रह्मलोके। शतमेकं पञ्चविंशं च लान्तके इति ॥१९६॥ पञ्चोत्तरशतमेकं शुक्रे। एकोननवतिश्च भवति बोद्धव्या सहस्रारे। त्रिसप्ततिरानतप्राणतयोः। 'सगपण्ण' त्ति सप्तपञ्चाशदारणाच्युतयोः। 'ईयालीसा य' त्ति एकचत्वारिंशत्पुनरधस्तने ग्रैवेयकत्रिके इति ॥१९७॥ एकोनत्रिंशच्च भवेन्मध्यमत्रिके। सप्तदश चोपरिमत्रिके। पञ्चैव सर्वार्थसिद्धे। 'आदयः' मुखानि। केषु? इत्याह—'कल्पेषु' वैमानिकदेवावासेषु 'प्रस्तटानां' त्रयोदशद्वादशादिलक्षणानां संबन्धिनः॥ इत्थं मुखान्यभिधाय भूमीकरणमाह—

चउरहिया भूमि पुव्विल्ला ॥१९८॥

चतुरधिकाः उपरितनकल्पगता आदय एव भूमयः 'पौरस्त्याः' पूर्वकल्पगता भवन्ति। यथा—सनत्कुमारमाहेन्द्रयोरादिः सप्तनवतशतप्रमाणः चतुरधिकः सन् संपन्नैकोत्तरशतद्वयरूपः सौधर्मेशानयोर्भूमिः। एवमन्येष्वपि कल्पेषु भावना कार्येति ॥ १९८ ॥ प्रकारान्तरेणापि भूमिकरणमभिधातुमाह—

सगपयरा रूवूणा, चउगुणिया सोहयाहि समुहाओ।
जं तत्थ सुद्धसेसं, इच्छियकप्पस्स सा भूमी ॥ १९९ ॥

'स्वकप्रतरान्' प्रतिकल्पं त्रयोदशद्वादशादीन् रूपोनांश्चतुर्गुणितान् 'शोधय' अपनय, कुतः? इत्याह—'स्वमुखात्' स्वकी-

यादादेः, एवं च कृते यत्तत्र शुद्धशेषं किञ्चिद्राश्यन्तरमुपलभ्यते 'ईप्सितकल्पस्य' सौधर्म्मेशानद्वयादिरूपस्य सा भूमिर्वर्तते । यथा–सौधर्मेशानयोस्त्रयोदश प्रस्तटाः, ते च रूपोनाश्चतुर्गुणिता जाता अष्टचत्वारिंशत्, तस्यां च स्वमुखादुक्तप्रमाणादपनीतायां जातमेकोत्तरं शतद्वयम्, इयमेव तत्र भूमिः । एवं शेषकल्पेष्वपीति ॥ १५९ ॥

भूमिप्रमाणमेव गाथाद्वयेन साक्षादाह—

> एगहिया दोणिण सया, तेवराणसयं सयं च उणतीसं ।
> तत्तो नवाहियसयं, तिणवइ सत्तत्तरी चेव ॥ १६० ॥
> एगट्ठी पणयाला, तेत्तीसा एक्कवीस णव चेव ।
> कप्पेसु पत्थडाणं, भूमीओ होंति णायव्वा ॥ १६१ ॥

एकाधिके द्वे शते सौधर्मेशानयोः । त्रिपञ्चाशं शतं सनत्कुमारमाहेन्द्रयोः । शतं चैकान्नत्रिंशं ब्रह्मलोके । 'ततः' तदनन्तरं नवाधिकशतं लान्तके । त्रिनवतिः शुक्रे । सप्तसप्ततिश्चैव सहस्रार इति ॥ १६० ॥ एकषष्टिरानतप्रणतयोः । पञ्चचत्वारिंशदारणाच्युतयोः। त्रयस्त्रिंशदधस्तनग्रैवेयकत्रिके । एकविंशतिर्मध्यमे । नव चैवोपरितने । 'कल्पेषु' उक्तस्वरूपेष्वेव 'प्रस्तटानां' त्रयोदशादिरूपाणां भूमयो भवन्ति ज्ञातव्याः। सर्वार्थसिद्धप्रस्तटे तु मुखमेव पञ्चकलक्षणं भूमिरिति।

स्थापना चेयम्—

| देवलोकाः | सौ०ई० | सन० मा० | ब्रह्म | लान्त० | शु० | स० | आ०प्रा० | आर० अ० | अ० ग्रै० | म० ग्रै० | उ० ग्रै० | अनु० |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| मुखानि | २४९ | १९७ | १४९ | १२५ | १०५ | ८९ | ७३ | ५७ | ४१ | २९ | १७ | ५ |
| भूमयः | २०१ | १५३ | १२९ | १०९ | ९३ | ७७ | ६१ | ४५ | ३३ | २१ | ९ | |

यदर्थं चेयं मुखभूमिप्ररूपणा तत्कारणमुपरिष्टाद्वक्ष्यत इति ॥ १६१ ॥

संप्रति प्रतिकल्पं सर्वविमानप्रमाणाभिधानाय गाथात्रयमाह—

**बत्तीस अट्ठवीसा, बारस अट्ठ चउरो सयसहस्सा।**
**पएणा चत्तालीसा, छ च्च सहस्सा सहस्सारे ॥ १६२ ॥**

शतसहस्राणीत्युत्तरेण योगाद्द्वात्रिंशच्छतसहस्राणि सौधर्मे ३२०००००। सर्वत्र चायं सम्बन्धो दृश्यः। अष्टाविंशतिरीशाने २८०००००। द्वादश सनत्कुमारे १२०००००। अष्टौ माहेन्द्रे ८०००००। चत्वारि शतसहस्राणि ब्रह्मलोके ४०००००। सहस्राणीत्युत्तरेण संबन्धात् पञ्चाशत्सहस्राणि लान्तके ५००००। चत्वारिंशत्सहस्राणि शुक्रे ४००००। षट् च सहस्राणि ६००० 'सहस्रारे' अष्टमदेवलोक इति ॥ १६२ ॥

**आणयपाणयकप्पे, चत्तारि सयाऽऽरणच्चुए तिन्नि।**
**सत्त विमाणसयाइं, चउसु वि एएसु कप्पेसु ॥ १६३ ॥**

आनतप्राणतकल्पयोर्यौगपद्येन चत्वारि विमानशतानि ४००। आरणाच्युतयोस्त्रीणि शतानीति योज्यते ३००। कल्पचतुष्टयसङ्ख्यामपि सुखावबोधाय संगृह्णन्नाह—सप्त विमानशतानि 'चतुर्ष्वप्येतेषु' प्रागुपदिष्टेषु कल्पेष्विति ॥ १६३ ॥

**एक्कारसुत्तरं हेट्ठिमेसु सत्तुत्तरं च मज्झिमए।**
**सयमेगं उवरिमए, पंचेव अणुत्तरविमाणा ॥ १६४ ॥**

एकादशोत्तरं शतं 'अधस्तनेषु' त्रिषु ग्रैवेयकेषु। 'सप्तोत्तरं च' सप्ताधिकं पुनर्मध्यमके त्रिके। शतमेकमुपरिमके त्रिके। तथा पञ्चैवानुत्तरविमानानीति ॥ १६४ ॥ इत्थं प्रत्येकं सर्वसङ्ख्यामभिधाय संप्रत्यावलिकाप्रविष्टानामेव तामभिधित्सुः करणं तावदाह—

मुहभूमिसमासद्धं, ओलंबगसंगुणं तु सव्वग्गं ।
वलए वलए य भवे, सुरणिलयाणं तु संखेवो ॥ १६५ ॥

मुखभूम्योः—प्रतिकल्पं प्रागेवोक्तप्रमाणयोः समासः—मीलनं तस्यार्द्ध—दलं मुखभूमिसमासार्द्धं 'अवलम्बकसंगुणं तु' त्रयोदशद्वादशस्वप्रतरप्रमाणगुणितमेव, किम् ? इत्याह—'सर्वाग्रं' आवलिकागतसर्वविमानप्रमाणं भवति । सर्वकल्पानुयाय्ययं व्यवहार इत्याह—'वलये वलये' वलयाकारव्यवस्थितप्रस्तटसंबन्धात्सौधर्मादिदेवलोके, चकारः पूरणार्थः, 'भवेत्' पूर्वोक्तकरणन्यायाज्जायेत 'सुरनिलयानां तु' श्रेणिप्रतिबद्धदेवावासानां पुनः 'संक्षेपः' सर्वाग्रलक्षणः । तथाहि—सौधर्मेशानयोर्मुखमेकोनपञ्चाशदधिकशतद्वयलक्षणं २४९, भूमिश्चैकाधिकशतद्वयस्वभावा २०१, अनयोः समासः पञ्चाशदधिकानि चत्वारि शतानि ४५०, एतदर्द्धं पञ्चविंशत्यधिके द्वे शते २२५, एतच्च त्रयोदशलक्षणावलम्बकगुणितं सञ्जातं सर्वाग्रं पञ्चविंशत्यधिकैकोनत्रिंशच्छतलक्षणमिति २९२५ । एवं शेषेष्वपि स्वधिया भावना कार्येति ॥ १६५ ॥

अथ प्रकीर्णकविमानप्रमाणानयनायाह—

कप्पविमाणग्गाओ, सेढीवद्धे विसोहए सेसं ।
सयसयकप्पेसु भवे, पइराणगाणं परीमाणं ॥ १६६ ॥

'कल्पविमानाग्रात्' सौधर्मादौ यद्विमानाग्रं द्वात्रिंशल्लक्षादिलक्षणं ततः सकाशात्, किम् ? इत्याह—'श्रेणिबद्धानि' आवलिकाश्रितानि विमानानि 'विशोधयेत्' अपनयेत् । तत्र च यद् 'शेषं' उद्धरितं तत् 'स्वकस्वककल्पेषु' सौधर्मादिषु 'भवेत्' जायेत 'प्रकीर्णकानां' पुष्पावकीर्णाभिधानविमानानां प्रमाणम् । तथाहि—सौधर्मेशानयोः क-

ल्पयोर्विमानाग्रं षष्टिर्लक्षाः ६००००००, अस्माच्छ्रेणिप्रतिबद्धेषु पञ्चविंशत्यधिकैकोनत्रिंशच्छतलक्षणेष्वपनीतेषु यदवशिष्टमेकोनषष्टिलक्षसप्तनवतिसहस्रपञ्चसप्ततिलक्षणं तत्तयोः पुष्पावकीर्णाग्रं भवति। अङ्कतोऽपि ५९९७०७५। एवं सर्वत्र भावना कार्येति॥ १६६॥ अथ श्रेणिप्रतिबद्धानां पुष्पावकीर्णानां च प्रतिकल्पं कण्ठत एव प्रमाणानि प्रतिपादयितुं गाथाचतुर्दशकमाह—

दो चेव सहस्साइं, णव चेव सयाइं पणवीसाइं।
आवलियासु विमाणा, सोहम्मीसाणकप्पेसु॥ १६७॥
अउणट्ठि सयसहस्सा, सत्ताणउई भवे सहस्साइं।
पणसत्तरि विमाणा, हवंति पुप्फावकिण्णाणं॥ १६८॥

द्वे चैव सहस्रे नव चैव शतानि पञ्चविंशानि 'आवलिकासु' श्रेणिषु विमानाः सौधर्मेशानकल्पयोर्वर्त्तन्त इति, अङ्कतोऽपि २९२५॥ १६७॥ एकोनषष्टिः शतसहस्राणि सप्तनवतिर्भवेयुः सहस्राणि पञ्चसप्ततिर्विमानानि भवन्ति पुष्पावकीर्णानां सौधर्मेशानयोरेवेति, अङ्कतोऽपि ५९९७०७५॥ १६८॥

दो चेव सहस्साइं, सयमेगं चेव होइ णायव्वं।
आवलियासु विमाणा, सणंकुमारे य माहिंदे॥ १६९॥
दस णव य सयसहस्सा, सत्ताणउई भवे सहस्साइं।
णव य सया संपुण्णा, हवंति पुप्फावकिण्णाणं॥ १७०॥

द्वे चैव सहस्रे शतमेकं चैव भवति ज्ञातव्यं आवलिकासु विमानाः सनत्कुमारे चकारस्य व्यवहितसंबन्धान्माहेन्द्रे चेति, अङ्कतोऽपि २१००॥ १६९॥ 'दश नव च शतसहस्राणि' एकोनविंशतिरित्यर्थः,

सप्तनवतिर्भवेयुः सहस्राणि नव च शतानि संपूर्णानि भवन्ति पुष्पावकीर्णानां सनत्कुमारमाहेन्द्रयोरिति, अङ्कतोऽपि १९९७९०० ॥१७०॥

अट्ठ सया चोत्तीसा, बंभे कप्पम्मि होंति आवलिया ।
लक्खतिगं णवणउयं, छावट्ठसयं पइण्णाणं ॥ १७१ ॥

अष्टौ शतानि चतुस्त्रिंशानि 'ब्रह्मणि कल्पे' ब्रह्मदेवलोके इत्यर्थः, भवन्ति 'आवलिकाः' इत्यावलिकागतविमानानि, अङ्कतोऽपि ८३४ । तथा लक्षत्रिकं 'नवनवतं' नवनवतिसहस्राधिकं षट्षष्टं शतं प्रकीर्णकानां तत्रैवेति, अङ्कतोऽपि ३९९१६६ ॥ १७१ ॥

अउणापण्ण सहस्सा, पइण्णगाण चउरो य पण्णारा ।
पंच य पंचासीया, आवलिया लंतए कप्पे ॥ १७२ ॥

एकोनपञ्चाशत्सहस्राणि प्रकीर्णकानां चत्वारि च शतानि पञ्चदशानि, अङ्कतोऽपि ४९४१५ । तथा 'पञ्च' पञ्चैव शतानीति गम्यते पञ्चाशीतानि 'आवलिकाः' आवलिकागतविमानानि, एवं सर्वत्रावलिकाशब्दार्थो बोद्धव्यः, लान्तके कल्पे, अङ्कतोऽपि ५८५ । व्यतिक्रमभणनं चात्र भणितिरीतिवैचित्र्यादिति ॥ १७२ ॥

तिण्णि सया छण्णउया, आवलिया खलु भवे महासुक्के ।
उणयालीस सहस्सा, छ च्च सय पइण्णगा चउरो ॥१७३॥

त्रीणि शतानि षण्णवतान्यावलिका खलु भवेन्महाशुक्रे, [ अङ्कतोऽपि ३९६ । तथा एकोनचत्वारिंशत्सहस्राणि षट् च शतानि 'प्रकीर्णकानि' पुष्पावकीर्णानि चतुरधिकानीति, ] अङ्कतोऽपि ३९६०४ ॥ १७३ ॥

तिण्णि सया बत्तीसा, आवलिया खलु भवे सहस्सारे ।
छप्पण्णमट्ठसट्ठा, पइण्णगाणं तु बोधव्वा ॥ १७४ ॥

त्रीणि शतानि द्वात्रिंशान्यावलिका खलु भवेत् सहस्रारे ३३२। तथा षट्पञ्चाशच्छतान्यष्टषष्टानि प्रकीर्णकानां तु बोद्धव्यानीति ५६६८ ॥ १७४ ॥

**आणयपाणयकप्पे, दोसिया सया अट्ठसट्ठमावलिया।**
**बत्तीसं सयमेगं, च होइ पुप्फावकिण्णाणं ॥ १७५ ॥**

आनतप्राणतकल्पयोर्द्वे शते अष्टषष्टे आवलिका २६८। तथा 'द्वात्रिंशं शतमेकं च' इति एकमेव द्वात्रिंशं शतमित्यर्थः, भवति पुष्पावकीर्णानामिति १३२ ॥ १७५ ॥

**दोसिया सया चउरहिया, आवलिया आरणच्चुए कप्पे।**
**छण्णउइं च विमाणा, हवंति पुप्फावकिण्णाणं ॥ १७६ ॥**

द्वे शते चतुरधिके आवलिकाऽऽरणाच्युतयोः कल्पयोः २०४। तथा 'षण्णवतिश्च' षण्णवतिरेव विमानानि भवन्ति पुष्पावकीर्णानां संबन्धीनीति ९६ ॥ १७६ ॥

**हेट्ठिमगेवेज्जाणं, एक्कारं भण्णए विमाणसयं।**
**आवलियासु विमाणा, णत्थि उ पुप्फावकिण्ण त्थ ॥१७७॥**

'अधस्तनग्रैवेयकाणां' इति विभक्तिव्यत्ययादधस्तनग्रैवेयकेषु त्रिषु 'एक्कारं' ति एकादशाभ्यधिकं भण्यते विमानशतमावलिकासु १११। विमानानि 'न सन्ति तु' न विद्यन्ते पुनः पुष्पावकीर्णानि अत्रेति ॥ १७७ ॥

**मज्झिमगेविज्जाणं, आवलि पणुत्तरी विमाणाइं।**
**बत्तीसं च विमाणा, हवंति पुप्फावकिण्णाणं ॥ १७८ ॥**

[ ' मध्यमग्रैवेयकाणां ' इति ] अत्रापि विभक्तिव्यत्ययान्मध्यमग्रैवेयकेष्वावलिर्वर्तते पञ्चसप्ततिर्विमानानि ७५ । ' द्वात्रिंशं च ' द्वात्रिंशत्पुनर्विमानानि भवन्ति पुष्पावकीर्णानां संबन्धिनीति ३२ ॥ १७८ ॥

उवरिमगेवेज्जाणं, इगु(गु-)यालीसं हवंति आवलिया ।
एगट्ठि च विमाणा, हवंति पुप्फावकिण्णाणं ॥ १७९ ॥

[ उपरिमग्रैवेयकाणां ] विभक्तिव्यत्ययादेवोपरितनग्रैवेयकेष्वेकोनचत्वारिंशद्विमानानि भवन्त्यावलिका ३९ । एकषष्टिश्च विमाना भवन्ति पुष्पावकीर्णानां सत्का इति ६१ ॥ १७९ ॥

विजए य वेजयंते, जयंत अवराइए य सव्वट्ठे ।
आवलियाए विमाणा, णत्थि उ पुप्फावकिण्ण त्थ ॥१८०॥

विजयश्च १ वैजयन्तः २ जयन्तः ३ अपराजितश्च ४ पूर्वादिदिक्क्रमेण, मध्ये च सर्वार्थः ५, एते आवलिकासु विमाना वर्त्तन्ते पर्यन्तप्रतरे । न सन्ति तु पुष्पावकीर्णान्यत्रेति ॥ १८० ॥ अधुना सकलदेवलोकावलिकागतविमानप्रमाणं तदितरदेवावासमानमुभयमानं च गाथात्रयेणाह—

सत्तेव सहस्साइं, सयाइँ चोवत्तराइँ अट्ठ भवे ।
आवलियाहिँ विमाणा, सेसा पुप्फावकिण्ण त्थ ॥ १८१ ॥

सप्तैव सहस्राणि शतानि चतुःसप्तान्यष्टौ भवेयुरावलिकासु विमानानि सर्वकल्पेष्विति, अङ्कतोऽपि ७८७४ । ' शेषाणि ' एतेभ्योऽवशिष्टानि पुष्पावकीर्णान्यत्रेति ॥ १८१ ॥ तान्येव साक्षादाह—

चुलसीति सयसहस्सा, अउणाणउई भवे सहस्साइं ।
एगूणगं दिवड्ढं, सयं तु पुप्फावकिण्णाणं ॥ १८२ ॥

चुलसीति सयसहस्सा, सत्ताणउइं भवे सहस्साइं।
तेवीसं च विमाणा, उड्ढलोए समक्खाया ॥ १८३ ॥

चतुरशीतिः शतसहस्राण्येकोननवतिर्भवेयुः सहस्राणि एकोनकं 'दिवड्ढं' ति द्व्यर्द्धं सार्द्धमित्यर्थः, शतं तु पुष्पावकीर्णानामिति। ८४८९१४९ ॥ १८२ ॥ चतुरशीतिः शतसहस्राणि सप्तनवतिर्भवेयुः सहस्राणि त्रयोविंशतिश्च विमाना ऊर्ध्वलोके समाख्याता इति। ८४९७०२३ ॥ १८३ ॥ अथोक्तमर्थं निगमयन् वृत्तत्र्यस्रचतुरस्र-प्रमाणप्रतिपादनाय प्रस्तावनामाह—

सोहम्माईयाणं, अणुत्तरविमाणपज्जवसियाणं।
वुत्तं विमाणमाणं, इणिंह वट्टाइए वोच्छं ॥ १८४ ॥

सौधर्मादीनामनुत्तरविमानपर्यवसितानां देवस्थानविशेषाणां 'उक्तं' अभिहितं विमानमानम्। 'इदानीं' सांप्रतमेव 'वृत्तादीनि' वृत्तत्र्य-स्रचतुरस्राणि विमानानि 'वक्ष्ये' गणनाप्रमाणतो भणिष्यामीति॥१८४॥ एतत्प्रमाणानयनोपायभूते मुखभूमी प्रतिकल्पमेकादिदिगपेक्षया प्रतिपा-दयन् तदानयनोपायभूतां गाथां तावदाह—

बावट्ठी खलु पढमं, सेसा परपयररहिय हौंति मुहा।
सगपयरेहिं विरहिया, रूवूणेहिं मुहा भूमी ॥ १८५ ॥

द्वाषष्टिर्विमानानि सौधर्मे [शान] प्रथमप्रतरावलिकागतानि 'खलु' निश्चये 'प्रथमं' आद्यं मुखमित्यर्थः। 'शेषाणि' सनत्कुमारमाहेन्द्र-कल्पद्वयब्रह्मलोकलान्तकादीनां कल्पानां संबन्धीनि 'परप्रतररहितानि' अग्रेतनाग्रेतनकल्पापेक्षया पूर्वपूर्वकल्पसत्कप्रस्तटोनीकृतानि पूर्वपूर्वकल्प-मुखान्येवोपरितनोपरितनकल्पेषु भवन्ति मुखानि। तथा 'स्वकप्रतरैः'

स्वकीयस्वकीयदेवलोकप्रस्तटैः 'विरहितानि' ऊनीकृतानि, किंविशिष्टैः? इत्याह—'रूपोनैः' रूपरहितैः, कानि? इत्याह—'मुखानि' आदय एव भूमयो भवन्ति। तथाहि—सौधर्मेशानयोर्द्वाषष्टिर्मुखम्। तदेव सनत्कुमारमाहेन्द्रकल्पापेक्षया परप्रतरैः सौधर्मेशानसत्कैस्त्रयोदशभिर्विरहितं लब्धैकोनपञ्चाशद्रूपं तयोः कल्पयोर्मुखं भवति। इदमेव च ब्रह्मलोककल्पापेक्षया परप्रतरैः पूर्वकल्पद्वयसंबन्धिभिर्द्वादशभिर्विरहितं लब्धं सप्तत्रिंशद्रूपं तत्र कल्पे मुखं भवति। एवं सर्वत्र। तथा सौधर्मेशानस्वमुखं द्वाषष्टिरूपं स्वकप्रतरै रूपोनैः संपन्नद्वादशरूपैर्विरहितं लब्धं पञ्चाशद्रूपं भूमिर्भवति। एवं सनत्कुमारमाहेन्द्रकल्पयुगलकमुखमप्येकोनपञ्चाशल्लक्षणं स्वकप्रतरै रूपोनैः संपन्नैकादशरूपैर्विरहितं लब्धाष्टत्रिंशद्रूपं भूमिर्भवति। तथा ब्रह्मलोके स्वमुखं सप्तत्रिंशद्रूपं स्वकप्रतरै रूपोनैः संपन्नपञ्चकरूपैरूनीकृतं संपन्नद्वात्रिंशद्रूपं भूमिर्भवति। एवं सर्वत्र भावना कार्येति ॥ १८९ ॥ आह रत्नप्रभादिषु पृथ्वीषु दिक्षु विदिक्षु च [ यथा पृथक् ] पृथग् मुखभूमिप्रज्ञापनोपलभ्यते कल्पेष्वपि किं तथैव प्रज्ञापना उत न? इति ( इत्याह )—

मुहभूमीओ इणमो, दिसाण नो एत्थ होंति विदिसाणं।
जेण दिसावलियाओ, देवेसु ण होंति विदिसासु ॥१८६॥

मुखभूमयः 'इणमो' त्ति इमा अनन्तरमेव वक्ष्यमाणाः 'दिशां' पूर्वादिलक्षणानां संबन्धिन्यो भवन्ति। व्यवच्छेद्यमाह—'न तु' न पुनः 'अत्र' देवलोकेषु भवन्ति विदिशां मुखभूमयः। कुतः? इत्याह—'येन' कारणेन 'दिगावलिकाः' दिश्वेव विमानश्रेणयः 'देवेषु'

देवाधिवासत्वेन देवलोकेषु, ' न ' नैव भवन्ति विदिक्ष्वावलिका इति ॥ १८६ ॥ कण्ठत एव क्रमेण मुखभूमिप्रमाणानि गाथाद्वयेनाह—

बावट्ठी उणपरणा, सत्ततीस इगतीस छव्वीसा ।
बावीस ट्ठारा या, चोद्दस दस सत्त चउर मुहा ॥ १८७ ॥
पराणास अट्ठतीसा, बत्तीसा सत्तवीस तेवीसा ।
उणवीस पराणरेकारसेव अड पंच दो भूमी ॥ १८८ ॥

द्वाषष्टिः सौधर्मेशानयोः, एकोनपञ्चाशत्सनत्कुमारमाहेन्द्रयोः, सप्तत्रिंशद् ब्रह्मलोके, एकत्रिंशल्लान्तके, षड्विंशतिर्महाशुक्रे, द्वाविंशतिः सहस्रारे, ' अट्ठारा या ' त्ति अष्टादश चानतप्राणतयोः, चतुर्दशारणाच्युतयोः, दशाधस्तनग्रैवेयकत्रिके, सप्त मध्यमग्रैवेयकत्रिके, चत्वार्युपरितनग्रैवेयकत्रिके ' मुखानि ' आदयः । सर्वार्थसिद्धौ त्वेककलक्षणमुखसद्भावेऽपि मुखव्यतिरिक्तभूमिरहितस्य तस्य निष्फलत्वान्न भणनं कृतमिति ॥ १८७ ॥ पञ्चाशत्सौधर्मेशानयोः, अष्टत्रिंशत्सनत्कुमारमाहेन्द्रयोः, द्वात्रिंशद् ब्रह्मलोके, सप्तविंशतिर्लान्तके, त्रयोविंशतिर्महाशुक्रे, एकोनविंशतिः सहस्रारे, 'पण्णर' त्ति पञ्चदशाऽऽनतप्राणतयोः, एकादशैवारणाच्युतयोः, अष्टावधस्तनग्रैवेयकत्रिके, [पञ्च मध्यमग्रैवेयकत्रिके,] द्वे उपरितनग्रैवेयकत्रिके भूमयः । सर्वार्थसिद्धौ तु मुखव्यतिरिक्तभूमेरभाव एवेति ॥ १८८ ॥ स्थापना—

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| मुखानि | ६२ | ४९ | ३७ | ३१ | २६ | २२ | १८ | १४ | १० | ७ | ४ |
| भूमयः | ५० | ३८ | ३२ | २७ | २३ | १९ | १५ | ११ | ८ | ५ | २ |

अधुना गाथाष्टकेन करणमाह—

मुहभूमिसमासद्धं, सगपयरगुणं तु सोहणगसुद्धं ।
तिहि भइए तिह रासी, सोहणगदुगेगभागजुया ॥ १८९ ॥

मुखभूमिसमासार्द्धं 'स्वकप्रतरगुणं तु' सौधर्मादिस्वकीयप्रतरगुणितं पुनः शोधनकशुद्धं क्रियते, ततस्त्रिभिर्भक्ते तस्मिन् राशौ यल्लभ्यते 'तिह रासि' त्ति तत्त्रिधा राशितया व्यवस्थाप्यते । ततः किं क्रियते? इत्याह—शोधनकद्विकैकभागयुतौ त्र्यस्रचतुरस्रराशी क्रियेते । अयमत्राभिप्रायः—सौधर्मेशानयोर्मुखं द्वाषष्टिः, भूमिश्च पञ्चाशत्, तत्समासार्द्धं षट्पञ्चाशत्, तस्यां स्वप्रतरैस्त्रयोदशभिर्गुणितायां जातानि सप्तशतान्यष्टाविंशत्यधिकानि, एतेभ्यश्चापनीते चतुर्दशलक्षणे शोधनके जातानि सप्तशतानि चतुर्दशाधिकानि ७१४, पुनस्तेषु त्रिभिर्भक्तेषु लब्धमष्टात्रिंशं शतद्वयम्, तस्मिन् त्रिस्थानस्थिते शोधनकस्यापि चतुर्दशलक्षणस्य त्रिभिर्भागो दीयते, लब्धश्चतुष्ककः द्वौ चावशिष्टौ, स च चतुष्ककस्त्रिषु स्थानेषु स्थाप्यते, ततो द्वौ चतुष्कौ त्र्यस्रेषु क्षिप्येते एकश्चतुरस्रेषु, यौ च द्वाववशिष्टौ तयोरप्येकस्त्र्यस्रेषु एकश्चतुरस्रेष्विति ॥ १८९ ॥ यदा मुखभूमिसमासराशिः क्वापि कल्पे नार्द्धीकर्तुं पार्यते तदा का वार्त्ता? इत्याह—

**मुहभूमिसमासकए, रासी तु ण देज्ज तत्थ जो अद्धं ।**
**तस्स सगोलंबद्धं, गहेउ गुण सेस जह पुव्वं ॥ १९० ॥**

मुखभूम्योः समासे कृते 'राशिस्तु' राशिः पुनः 'न' नैव 'दद्यात्' प्रयच्छेत् 'तत्र' वृत्तादिप्रमाणानयने प्रक्रान्ते 'यः' कश्चित् 'अर्द्धं' द्विरूपं भागं 'तस्य' राशेः 'स्वकावलम्बार्द्धं' निजकल्पप्रतरप्रमाणार्द्धलक्षणं 'गृहीत्वा' आदाय गुणय प्रकृतमेव राशिशेष (राशिं 'शेषं') शोधनकशुद्ध्यादिकर्म 'यथा' इति दृष्टान्तार्थः 'पूर्वं' नरकवक्तव्यतायामिति ॥ १९० ॥ सौधर्मादिषु शोधनकप्रमाणमाह—

चोद्दस वारस छक्कं, चत्तारो पणगं च चउ तिगं पणगं।
गेवेज्जेसु तिय तियं, एक्को तेवट्ठि सव्वे वि ॥ १९१ ॥

चतुर्दश सौधर्मेशानयोः। द्वादश सनत्कुमारमाहेन्द्रयोः। षट्कं ब्रह्मलोके। चत्वारि लान्तके। पञ्चकं च महाशुक्रे। 'चउ' त्ति चत्वारि सहस्रारे। त्रिकमानतप्राणतयोः। पञ्चकमारणाच्युतयोः। 'ग्रैवेयकेषु' यथाक्रममधस्तनमध्यमोपरितनेषु त्रिकं त्रिकम्। एकः सर्वार्थसिद्धे। त्रिषष्टिः सर्वेऽपीति स्थापना—१४। १२। ६। ४। ५। ४। ३। ५। ३। ३। ३। १ ॥१९१॥ यदतो विधेयं तदाह—

एयं बाहग्गाओऽवणेत्तु सेसं तिहा विभइऊणं।
तिहिँ ठाणेहिँ ठवेउं, सोहणगस्सावि हर भागं ॥ १९२ ॥

'एतत्' शोधनकं 'बाहाग्रात्' ऊर्ध्वाधोभागव्यस्थितैकदिग्गत-विमानप्रमाणलक्षणात् प्रतिकल्पमपनीय शेषं 'त्रिधा विभज्य' त्रिभिर्भक्तं कृत्वा यत्तत्र लभ्यते तत्त्रिषु स्थानेषु स्थापयित्वा 'शोधनकस्यापि' चतुर्दशादिलक्षणस्य हर भागम् ॥ १९२ ॥ कैः ? इत्याह—

तिहिँ चेव सया कालं, जं लद्धं तं तिहा उ काऊणं।
दो भागा ऊ तंसे, पक्खेवो एगु चउरंसे ॥ १९३ ॥

त्रिभिश्चैव 'सदा कालं' यदा यदा वृत्तादिपरिमाणं जिज्ञास्यते तस्मिंस्तस्मिन् काले इत्यर्थः, ततो यल्लब्धं तत् 'त्रिधा तु' त्रिधैव कृत्वा त्रिषु स्थानेषु स्थापयित्वा, तदेव स्थानत्रयं दर्शयति—एकत्र स्थाने 'द्वौ भागौ' त्रिभागलक्षणौ राशी 'तुः' पूर्ववत् त्र्यस्रे विमानराशौ प्रक्षिप्यत इति 'प्रक्षेपः' न्यसनीयो राशिर्वर्तते। एकत्रिभा-

गश्चतुरस्रे विमानराशावेव प्रक्षेप इति ॥ १९३ ॥ यदा शोधनकस्य त्रिभिर्भक्तस्य किञ्चिदवशिष्यते तदा यत्कर्त्तव्यं तदाह—

सोहगदोऽव्वरिया, तत्थेगो तंसे (सि) एगो (ग) चउरंसे ।
एगुव्वरियं तंसे, एगा बाहा हवइ एसा ॥ १९४ ॥

यदा शोधनकस्य—चतुर्दशादिलक्षणस्य त्रिभिर्भक्तस्य द्वावुद्धरितौ भवतस्तदा ' तत्र ' तयोरेकस्त्र्यस्रे एकश्चतुरस्रे न्यसनीयः । यदा पुनः एकं—एककलक्षणमङ्कस्थानमुद्धरति लान्तकस्य सहस्रारस्य वा देवलोकस्य संबन्धिनि चतुष्टयलक्षणे शोधनके तदैकमुद्धरितं त्र्यस्रराशौ न्यसेत् । एवं च कृते ' एका ' पूर्वादिदिग्गता ' बाहा ' सौधर्मेशानादिकल्पगतवृत्तत्र्यस्रचतुरस्रविमानप्रमाणलक्षणा श्रेणिर्भवति ' एषा ' अनन्तरोक्तेति ॥ १९४ ॥ पूर्वोक्तमर्थं निगमयन् सर्वदिग्गतवृत्तादिविमानप्रमाणानयनायाह—

एयं एगदिसग्गं, चउसंगुणियं तु होइ सव्वग्गं ।
वलए वलए एवं, वट्टा तंसा य चउरंसा ॥ १९५ ॥

' एतत् ' अनन्तरोक्तं ' एकदिगग्रं ' एकस्यां दिशि वृत्तादिपरिमाणम्, चतुःसंगुणितं ' तुः ' पुनरर्थे भवति सर्वाग्रमिति । एवं सति यत्सिद्धं तदाह—' वलये वलये ' सौधर्मेशानकल्पद्वयादिलक्षणे ' एवं ' उक्तनीत्या वृत्तास्त्र्यस्राश्चकारस्य भिन्नक्रमत्वाच्चतुरस्राश्च गणनाप्रमाणतो विज्ञातव्या भवन्तीति ॥ १९९ ॥ ये चात्रावलिकामध्यगता विमानेन्द्रकास्तेषां यद्विधेयं तदाह—

जे जत्तिया उ कप्पे, पत्थारा तत्तिया उ मज्झिल्ला ।
उवरिमरासीएते, पक्खेयव्वा न्भो वट्टा ॥ १९६ ॥

ये 'यावन्तः' त्रयोदशादिलक्षणाः 'तु:' पुनरर्थः 'कल्पे' सौधर्मेशानादिलक्षणे 'प्रस्ताराः' प्रस्तटाः 'तावन्तस्तु' तावन्त एव 'मज्झिल्ल' त्ति मध्यमा विमानेन्द्रकाः 'उपरिमराशौ' वृत्तविमानलक्षणे एते प्रक्षेप्तव्याः। अत्र हेतुमाह—'यतः' यस्मात्कारणाद् वृत्तास्ते, उपरितनराशिश्च वृत्तसंबन्धी इति तेषां तत्र निक्षेप इति ॥ १९६ ॥

अस्य गाथाष्टकस्य भावना नरकेन्द्रककृतभावनानुसारेण स्वयमेवेहावतारणीया। नवरं सुखावबोधार्थं पर्यन्तप्रस्तटभावनोच्यते—तत्र सर्वार्थसिद्धप्रस्तटे एकस्यां दिश्येकस्यैव विमानस्य सद्भावात्तदेव मुखं तत्र भूमिः, ततो मुखभूम्योः समासार्द्धे जात एकः, स च स्वकप्रतरेणैकलक्षणेन गुण्यते "एगगुणं तत्तियं चेव" त्ति वचनात्संजात एक एव, तस्माच्चैकलक्षणे शोधनके शोधिते स्थितं शून्यम्, तच्च वृत्तत्र्यस्रचतुरस्रलक्षणेषु त्रिषु स्थानेषु स्थाप्यते, ततः शोधनकस्याप्येकरूपस्य त्रिभिर्भागो दीयते, भागाभावाल्लब्धं शून्यमवशिष्टश्चैककः, तच्च शून्यं त्रिषु स्थानेषु स्थाप्यते तत्र द्वे शून्ये त्र्यस्रसंज्ञिते शून्यराशौ क्षिप्येते, [एकं च चतुरस्रसंज्ञिते,] ततो "राशिरविकृतः खयोजनापगमे" इति वचनात् उभयत्रापि स्थितं शून्यमेव, यश्चैकको ऽवशिष्ट आसीत्स त्र्यस्रशून्ये क्षिप्यते लब्धमेकं त्र्यस्रविमानम्, एतदेव च तत्रैकदिग्गतविमानप्रमाणम्, दिक्प्रतिबद्धवृत्तचतुरस्रयोश्च तत्राभावः। यदा त्वेतदेव चतुर्भिर्गुण्यते मध्यवर्ती च वृत्तेन्द्रको मध्ये क्षिप्यते तदा पञ्चकलक्षणं पर्यन्तप्रस्तटे विमानाग्रं भवतीति ॥ संप्रत्यनेन करणेन यत्र कल्पे यद् वृत्तादिप्रमाणमायातं तत्तत्र साक्षादेव दर्शयितुं सूत्रकारो गाथादशकमाह—

पणणट्ठमट्ठसीया, दुसत्तरग्गा य णव णव सया उ।
सोहम्मे ईसाणे, वट्टा तंसा य चउरंसा ॥ १९७ ॥

पञ्चषष्टानि, मकारोऽलाक्षणिकः अष्टाशीतानि द्विसप्तत्यग्राणि च नव नव शतानि 'तुः' पूरणे सौधर्मे ईशाने वृत्तारुयस्राश्चकारस्य व्यवहितसंबन्धाच्चतुरस्राश्च, एवमुत्तरत्रापि चकारस्य संबन्धः, यथासङ्ख्यं भवन्ति। स्थापना–९६५ । ९८८ । ९७२ ॥ १९७ ॥

छ च्च सया बाणउया, सत्त सया बारसुत्तरा होंति।
छ च्च सया छण्णउया, वट्टादि सणंकुमारमाहेंदि ॥ १९८ ॥

षट् च शतानि द्वानवतानि, सप्त शतानि द्वादशोत्तराणि भवन्ति, षट् च शतानि षण्णवतानि, किम्? इत्याह—'वृत्तादि' वृत्तत्र्यस्रचतुरस्रप्रमाणं 'सनत्कुमारमाहेन्द्रे' उभयरूपे देवनिवेशे ६९२ । ७१२ । ६९६ । इयं च गाथा गीतिसंज्ञा बोद्धव्येति ॥ १९८ ॥

चोवत्तर चुलसीया, छसत्तरग्गा दुवे दुव सया उ।
कप्पम्मि बंभलोए, वट्टा तंसा य चउरंसा ॥ १९९ ॥

चतुःसप्ततानि चतुरशीतानि षट्सप्तत्यग्राणि 'दुवे दुव' त्ति द्वे द्वे तुशब्दस्यावधारणार्थस्येह संबन्धाद्द्वे एव शते कल्पे ब्रह्मलोके वृत्तारुयस्राश्चतुरस्राश्च विमाना भवन्तीति। २७४ । २८४ । २७६ ॥ १९९ ॥

तेणउयं चेव सयं, दो चेव सया सयं च बाणउयं।
कप्पम्मि लंतगम्मी, वट्टा तंसा य चउरंसा ॥ २०० ॥

त्रिनवतं चैव शतं, द्वे चैव शते अन्यूनाधिके, शतं च द्वानवतं कल्पे लान्तके वृत्तारुयस्राश्चतुरस्राश्च विमाना भवन्तीति । १९३ । २०० । १९२ ॥ २०० ॥

अट्ठावीसं च सयं, छत्तीस सयं सयं च बत्तीसं।
कप्पम्मि महासुक्के, वट्टा तंसा य चउरंसा ॥ २०१ ॥

[अष्टाविंशं च शतं, षट्त्रिंशं शतं, शतं च 'द्वात्रिंशं' द्वात्रिंशदधिकं कल्पे महाशुक्रे वृत्तास्त्र्यस्राश्चतुरस्राश्च विमाना भवन्तीति। १२८। १३६। १३२] ॥ २०१ ॥

अट्ठुत्तरं च सोलं, अट्ठ सयं चेव होअणूणं तु।
कप्पम्मि सहस्सारे, वट्टा तंसा य चउरंसा ॥ २०२ ॥

अष्टोत्तरं च शतं 'षोडशं' इति षोडशोत्तरं [शतं] 'अष्टशतं चैव' अष्टाभिरधिकमेव शतं भवत्यन्यूनाधिकं, 'तुः' पुनरर्थे भिन्नक्रमश्च, ततः कल्पे सहस्रारे पुनर्वृत्तास्त्र्यस्राश्चतुरस्राश्चेति। १०८। ११६। १०८ ॥ २०२ ॥

अडसीती बाणउई, अट्ठासीती य होंति बोधव्वा।
आणयपाणयकप्पे, वट्टा तंसा य चउरंसा ॥ २०३ ॥

अष्टाशीतिर्द्वानवतिरष्टाशीतिश्च भवन्ति बोद्धव्या आनतप्राणतकल्पे वृत्तास्त्र्यस्राश्चतुरस्राश्चेति। ८८। ९२। ८८ ॥ २०३ ॥

चउसट्ठी बावत्तरि, अट्ठट्ठी चेव होइ बोधव्वा।
आरणअच्चुयकप्पे, वट्टा तंसा य चउरंसा ॥ २०४ ॥

चतुःषष्टिर्द्वासप्ततिरष्टषष्टिश्चैव भवति बोद्धव्या आरणाच्युतकल्पे वृत्तास्त्र्यस्राश्चतुरस्राश्चेति। ६४। ७२। ६८ ॥ २०४ ॥

पणतीसा चत्ता या, छत्तीसा हेट्ठिमम्मि गेवेज्जे।
तेवीस ट्ठावीसा, चउवीसा चेव मज्झिमए ॥ २०५ ॥

---

१ इयं गाथा मूलादर्शे पतिता परं श्रीमन्मलयगिरिविरचितबृहत्संग्रहणीवृत्तितोऽत्र लिखिता।

पञ्चत्रिंशच्चत्वारिंशत् षट्त्रिंशदधस्तने 'ग्रैवेयके' इति अवयवे समुदायोपचारात् ग्रैवेयकत्रिके-त्रिष्वधस्तनग्रैवेयकेष्वित्यर्थः । ३५ । ४० । ३६ । तथा त्रयोविंशतिरष्टाविंशतिश्चतुर्विंशतिश्चैव मध्यमके ग्रैवेयकत्रिक इति । २३ । २८ । २४ ॥ २०५ ॥

**एक्कारस सोलस बारसेव गेवेज्ज उवरिमे होंति ।**
**एगं वट्टं तंसा, चउरो य अणुत्तरे जाण ॥ २०६ ॥**

एकादश षोडश द्वादशैव 'ग्रैवेयके' ग्रैवेयकत्रिके उपरिमे भवन्ति । ११ । १६ । १२ । तथैकं वृत्तं त्र्यस्राणि चत्वार्येव 'अनुत्तरे' सर्वार्थसिद्धनामनि प्रस्तटे 'जानीहि' अवबुध्यस्वेति ॥ २०६ ॥

इत्थं प्रत्येकं कल्पेषु वृत्तादिप्रमाणं प्रतिपाद्य संप्रति सर्वदेवस्थानगतवृत्तादिप्रमाणं यौगपद्येन प्रज्ञापयितुमिच्छुराह—

**मुहभूमिसमासद्धं, वेहो बावट्ठि सोहण तिसट्ठि ।**
**तिगभतिएगदिसग्गं, चउसंगुणियं तु सव्वग्गं ॥ २०७ ॥**

मुखं—द्वाषष्टिर्विमानानि भूमिश्च—एकं विमानं तयोर्मुखभूम्योः समासस्त्रिषष्टिः, तस्यार्द्धं—दलं तच्चेह न संभवति विषमराशित्वात् । तथा 'वेधः' इत्युद्वेधः—अवलम्बको द्वाषष्टिप्रमाणम्, अयमेवात्र गुणकार इत्यर्थः । अनेन च गुणिते शोधनकं सर्वकल्पशोधनकमीलनाल्लब्धा त्रिषष्टिः, तस्यां च शोधितायां योऽवशिष्टराशिः स 'तिगभइय' त्ति त्रिभिर्विभज्यते, ततः 'एकदिगग्रं' एकपूर्वादिदिग्गतं वृत्तादिपरिमाणं लभ्यते । एतदेव 'चतुःसंगुणितं तु' चतुर्भिर्गुणितं पुनः 'सर्वाग्रं' सर्वदिग्गतविमानपरिमाणं भवति । अयमत्राभिप्रायः—मुखभूम्योः समासे संजाता त्रिषष्टिः, ततोऽर्द्धदानाभावाद् द्वाषष्टिलक्षणावलम्बकार्द्धे-

नैकत्रिंशद्रूपेण गुण्यते ततो जातान्येकोनविंशतिशतानि त्रिपञ्चाशदधिकानि, तेभ्यश्च शोधनकं त्रिषष्टिः शोध्यते ततो जातान्यष्टादशशतानि नवत्यधिकानि १८९०, अस्य च राशेस्त्रिभिर्भागे दत्ते लब्धानि षट् शतानि त्रिंशदधिकानि ६३०, एतानि च वृत्तत्र्यस्त्रचतुरस्त्रलक्षणेषु त्रिषु स्थानेषु स्थाप्यन्ते, तदनु शोधनकस्यापि त्रिभिर्भागो दीयते लब्धा एकविंशतिः २१, इयमपि त्रिषु स्थानेषु न्यस्यते, ततो द्वे एकविंशती त्र्यस्त्रेषु क्षिप्येते एका च चतुरस्त्रेषु, एवं च कृते लब्धं यथाक्रममेकदिक्प्रतिबद्धवृत्तत्र्यस्त्रचतुरस्त्रविमानमानमिदम्—वृत्त० ६३० त्र्यस्त्र० ६७२ चतुरस्त्र० ६९१। यदा त्वेतदेव राशित्रयं प्रत्येकं चतुर्भिर्गुण्यते वृत्तराशौ च द्वाषष्टिरिन्द्रकाः क्षिप्यन्ते तदा सर्वदेवस्थानप्रतिबद्धदिक्चतुष्टयवर्त्तिवृत्तादिविमानप्रमाणं भवतीति ॥ २०७ ॥ तदेव साक्षादभिधातुमाह—

पणुवीसं बासीया, छव्वीसं चेव अट्ठसीयाइं।
छव्वीसं चउरहिया, वट्टादीयाण सव्वग्गं॥ २०८ ॥

पञ्चविंशतिः शतानीति गम्यते द्वाशीतानि, षड्विंशतिश्चैवाष्टाशीतिः, षड्विंशतिशतानि चतुरधिकानि, किम्? इत्याह—वृत्तादीनां विमानानां सर्वाग्रं भवतीति। २५८२। २६८८। २६०४ ॥२०८॥ इत्थं वृत्तादिविमानप्रमाणं प्रत्येकं सामस्त्येन च प्रतिपाद्य संप्रति सौधर्मेशानयोः सनत्कुमारमाहेन्द्रयोश्च कल्पयोर्यानि विमानानि यस्येन्द्रस्याऽऽभवन्ति तत्प्रतिपादनायाह—

वावट्ठी आवलिया, पुरच्छिमा दक्खिणा य अवरा य।
सक्कस्स पत्थडाणं, एसा आदी पढमयाए॥ २०९ ॥

द्वाषष्टिर्विमानानां ' आवलिका ' श्रेणिः ' पौरस्त्या ' पूर्वदिग्गामिनी 'दक्षिणा च' दक्षिणदिग्भवा 'अपरा च' पश्चिमदिग्भागवर्तिनी चकारौ समुच्चये शक्रस्वामिकत्वात् 'शक्रस्य' सौधर्मेन्द्रस्य। 'प्रस्तटानां' प्रतराणां ' एषा ' द्वाषष्टिः 'आदिः' प्रथमारम्भः स च पश्चानुपूर्व्यापि स्यात्तद्व्यवच्छेदार्थमाह—' प्रथमतया ' प्राथम्येन पूर्वानुपूर्व्येत्यर्थः ॥ २०९ ॥ तथा—

बावट्ठी आवलिया, पुरच्छिमा उत्तरा य अवरा य।
ईसाणपत्थडाणं, एसा आई पढमयाए ॥ २१० ॥

' द्वाषष्टिः ' द्वाषष्टिप्रमाणा आवलिका पौरस्त्योत्तरा चापरा च, केषाम्? इत्याह—'ईशानप्रस्तटानां' द्वितीयदेवलोकसंबन्धिप्रतराणाम्। 'एषा' द्वाषष्टिः 'आदिः' प्रथमारम्भः 'प्रथमतया' प्राथम्येन ॥२१०॥ एतदेव गाथाद्वयं सविशेषं गाथाचतुष्टयेन व्याख्यानयन्नाह—

जे दक्खिणेण इंदा, दाहिणओ आवली मुणेयव्वा।
जे पुण उत्तर इंदा, उत्तरओ आवली तेसिं ॥ २११ ॥

यौ ' दक्षिणेन ' दक्षिणस्यां दिशि ' इन्द्रौ ' शक्रसनत्कुमारौ, तयोः किम्? इत्याह—' दक्षिणतः ' दक्षिणस्यां दिशि ' आवली ' विमानश्रेणिः मुणितव्या आभाव्यत्वेन। यौ पुनः ' उत्तरौ ' उत्तरविभागवर्तिनौ ' इन्द्रौ ' ईशानमाहेन्द्राभिधानौ ' उत्तरतः ' उत्तरस्यां दिश्यावली तयोराभाव्या। इदमुक्तं भवति—सौधर्मेशानयोः सनत्कुमारमाहेन्द्रयोश्च समश्रेणिव्यवस्थितयोर्द्वयोर्द्वयोः कल्पयोः सर्वप्रस्तटेष्विन्द्रकविमानापेक्षया दक्षिणदिग्भागविनिर्गता विमानश्रेणयो

यास्ताः केवला दाक्षिणात्येन्द्रयोः शक्रसनत्कुमारयोः । याः पुनरुत्तरास्ताः सर्वा औदीच्ययोरीशानमाहेन्द्रयोरिन्द्रयोराभाव्या इति ॥ २११ ॥ शेषदिग्द्वयावलिकामध्येन्द्रकविभागार्थमाह—

पुव्वेण पच्छिमेण य, सामराणा आवली मुणेयव्वा ।
जे पुण वट्टविमाणा, मज्झिल्ला दाहिणिल्लाणं ॥ २१२ ॥
पुव्वेण पच्छिमेण य, जे वट्टा ते वि दाहिणिल्लाणं ।
तंसचउरंसगा पुण, सामराणा होंति दोराहं पि ॥ २१३ ॥

'पूर्वेण पश्चिमेन च' पूर्वस्यां दिशि पश्चिमायां च दिशीत्यर्थः, 'सामान्या' उभयदिग्गतेन्द्रतुल्या आवली मुणितव्या । ये पुनर्वृत्त-विमानाः सर्वप्रस्तटेषु, कीदृशाः ? इत्याह—'मध्यमाः' इन्द्रकनामानस्ते दाक्षिणात्ययोरिन्द्रयोराभवन्तीति ॥ २१२ ॥ पूर्वेण पश्चिमेन च ये केचन वृत्ता विमानास्तेऽपि किं पुनरिन्द्रकाः ? इत्यपि शब्दार्थः, किम् ? इत्याह—दाक्षिणात्ययोरिन्द्रयोराभवन्तीति । तत्रैव दिग्द्वये त्र्यस्रच-तुरस्रकाः पुनर्विमानाः सामान्या भवन्ति द्वयोरपीन्द्रयोः, केचिद्दाक्षि-णात्ययोः केचिदौदीच्ययोरित्यर्थः ॥ २१३ ॥ अयं च विभागो येषु देवलोकेषु संपन्नस्तद्देवलोकदर्शनायाह—

एसो उ कमो नियमा, इंदाणं होंति कप्पवासिणं ।
सोहम्मे ईसाणे, सणंकुमारे य माहिंदे ॥ २१४ ॥

'एष तु' एष पुनः 'क्रमः' परिपाटिः 'नियमात्' अवश्यंतया 'इन्द्राणां' देवराजानां भवति कल्पवासिनाम्, कुत्र ? इत्याह— सौधर्मे ईशाने सनत्कुमारे चकारस्य भिन्नक्रमस्य पाठान् माहेन्द्रे च कल्पे, अनयोरेव द्वयोर्द्वयोर्देवलोकयोः समश्रेणितया व्यवस्थानं प्रत्येक-

मिन्द्रभावश्चेत्येष्वेवायं क्रम इति ॥ २१४ ॥ उपरितनदेवलोकेषु तु यथाऽऽवलिकास्वामित्वं भवति तथा दर्शयितुमाह—

तेण परं इंदाणं, चउदिसिं आवली मुणेयव्वा ।
जाओ वट्टविमाणाहिं णिग्गया जस्स जइ कप्पे ॥ २१५ ॥

'तेन' इति ततः सौधर्मादिकल्पचतुष्टयात् 'परं' अग्रतः 'इन्द्राणां' ब्रह्मलान्तकादीनां 'चतुर्दिशि' चतसृष्वपि दिक्षु 'आवल्यः' विमानश्रेणयो मुणितव्याः 'याः' आवल्यः 'वृत्तविमानेभ्यः' वृत्तविमानानि—इन्द्रकनामान्यवधीकृत्य 'निर्गताः' प्रवृत्ताः 'यस्य' इन्द्रस्य ब्रह्मादेः 'यावत्यः' यत्प्रमाणाः प्रतिप्रस्तटं चतुष्प्रमाणा इत्यर्थः 'कल्पे' ब्रह्मलोकादौ । इदमुक्तं भवति—ब्रह्मलोकादिषु चतुर्षु देवलोकेष्वानतप्राणतयोरारणाच्युतयोश्च द्वयोर्द्वयोर्देवलोकयोर्ये ब्रह्मादयः षडिन्द्रास्तेषां यथाक्रमं स्वकल्पगता आवलिका आभवन्तीति ॥ २१५ ॥ संप्रति शक्रेशानयोः पौरस्त्यपाश्चात्ये आवल्यौ प्रतीत्योक्तमपि स्वामित्वविषयविभागं किञ्चिद्विशेषतोऽभिधातुमाह—

पत्थडतेरे वट्टा, जत्तियमेत्ता हवंति गुणिया उ ।
उत्तरओ मोत्तूणं, सेसा सव्वे वि सक्कस्स ॥ २१६ ॥

प्रस्तटत्रयोदशके वृत्ता विमाना यावन्मात्रा भवन्ति गुणिताः 'तुः' पूरणे 'उत्तरतः' उत्तरस्यां दिशि मुक्त्वा वृत्तविमानानि 'शेषाणि' पूर्वदाक्षिणपश्चिमावलिकासम्बन्धीनि 'सर्वाण्यपि' निरवशेषाणि शक्रस्य । इह किल सौधर्मेशानयोर्नव शतानि पञ्चषष्ट्यधिकानि [ वृत्तविमानानि ] सर्वप्रस्तटगतवृत्तविमानसंयोजनेन भवन्ति । तत्रोत्तरदिग्गतान्यष्टात्रिंशदधिकद्विशतप्रमाणानि वृत्तविमानान्यपनीय शेषो वृत्तविमानराशिः सप्त-

विंशत्यधिकसप्तशतलक्षणः शक्रस्याऽऽभवतीति ॥ २१६ ॥ इत्थं सामान्यतो वृत्तादिविमानानामाभवद्व्यवहारं प्रतिपाद्य संप्रति पूर्वोक्तमर्थं निगमयन् वृत्तादिविमानाऽऽभवद्व्यवहारमेव संख्यया प्रतिपादयितुकामः संबन्धमारचयन् गाथाद्वयमाह—

एवं एते भणिया, वट्टा तंसा तहेव चउरंसा।
सोहम्माईयाणं, सव्वेसिं आणुपुव्वीए ॥ २१७ ॥
संपइ पुण सोहम्मे, ईसाणे चेव सक्कराईणं।
वट्टाई केवइया, कस्स त्ति अओ परं वोच्छं ॥ २१८ ॥

'एवं' अनेन प्रकारेण 'एते' विमानाः 'भणिताः' उक्ता वृत्तात्र्यस्रास्तथैव चतुरस्राः, केषाम्? इत्याह—'सौधर्मादीनां' सौधर्मेशानद्वयादिकल्पानां 'सर्वेषां' समस्तानां 'आनुपूर्व्या' अनुक्रमेणेति ॥२१७॥ संप्रति पुनः सौधर्मे ईशाने चैव 'सक्कराईणं' ति शक्रः शक्र एव, ततोऽप्यतिशयेन राजनाद्राजा—ईशानेन्द्रः, ततः शक्रराजयोः—सौधर्मेशाननायकयोरित्यर्थः, 'वृत्तादयः' विमानविशेषाः कियन्तः 'कस्य' इति शक्रादेः 'इति' एतत् 'अतः परं' एतदूर्द्ध्वं 'वक्ष्ये' भणिष्यामीति ॥ २१८ ॥ एतदुपयोगि तावत्करणमाह—

मुहभूमिसमासद्धं, ओलम्बगुणं ससोहणगरहियं।
तिहिं भइए तिह रासी, सोहणगदुगेगभागजुया ॥२१९॥

मुखभूमिसमासार्द्धं 'अवलम्बगुणं' अवलम्बकेन त्रयोदशरूपेण गुणितं स्वशोधनकरहितं क्रियते, ततोऽस्मिन् राशौ त्रिभिर्भक्ते यल्लभ्यते तत् 'तिह रासिं' त्ति त्रिप्रकारराशितया व्यवस्थाप्यते। एतेष्वेव

राशिषु यौ त्र्यस्रचतुरस्रराशी तौ यथाक्रमं शोधनकद्विकैकभागयुतौ द्वाभ्यामेकेन च भागेन युक्तौ कार्याविति ॥२१९॥ इदमेव करणं सौधर्मेशानकल्पद्वयमधिकृत्य भावयितुं स्वयमेव ग्रन्थकारो गाथापञ्चकमाह-

बावट्ठी पण्णाए, य समासो तत्थ गेरिहऊणद्धं ।
तेरोलंबगगुणिए, जाया सय सत्त अडवीसा ॥ २२० ॥

'द्वाषष्टेः' मुखरूपायाः 'पञ्चाशतः' भूमिरूपायाः 'चः' समुच्चये 'समासः' संक्षेपः क्रियते, तत्र कृते गृहीत्वा तस्यार्द्धं ततस्त्रयोदशावलम्बकगुणिते जातानि शतानि सप्ताष्टविंशानीति ॥२२०॥ ततोऽपि यत्कृत्यं तदाह—

चोद्दस अवणेहि तओ, सेसस्स हराहि तो तिहिं भागं ।
जं तत्थ भागलद्धं, तं तित्थं ठावए मइमं ॥ २२१ ॥

'चतुर्दश' शोधनकलक्षणान् अपनय 'तस्माद्' आगताद्राशेः सकाशात्, एवं च कृते 'शेषस्य' शोधनकस्य शुद्धौ सत्यामवशिष्टस्य हर 'ततः' शोधनकशुद्ध्युत्तरकालं ( ग्रंथाग्रम्० १९०० ) त्रिभिर्भागम्, यत्तत्र भागलब्धं तत् 'त्रिस्थं' स्थानत्रयस्थायितया स्थापयेत् 'मतिमान्' बुद्धिमानिति ॥ २२१ ॥ शोधनकविधिमाह—

जे चोद्दस अवणीया, ते णव तंसे उ पंच चउरंसे ।
पक्खित्तेसुं तेसुं, दो वि गुणोज्जा तओ दोसुं ॥ २२२ ॥

ये चतुर्दशापनीताः 'ते' इति विभक्तिव्यत्ययात्तेभ्यो नव त्र्यस्रे विमानराशौ तुशब्दस्य पुनरर्थस्य भिन्नक्रमत्वात् पञ्च पुनः चतुरस्रे प्रक्षेप्याः । प्रक्षिप्तेषु नवसु पञ्चसु च द्वावपि राशी—त्र्यस्रचतुरस्रलक्ष-

णावित्यर्थः, 'गुणयेत्' ताडयेत् 'ततः' तदनन्तरं 'दोसुं' ति विभक्तिव्यत्ययाद्द्वाभ्यामिति ॥ २२२ ॥ एतदेव भावयन्नाह—

जो तत्थ तंसरासी, चउरंसाणं च जो भवे रासी।
एते दोण्णि वि रासी, दोहिँ गुणे वट्ट तीहिं तु ॥२२३॥

यः 'तत्र' त्रिषु राशिषु मध्ये [स्थित] त्र्यस्रराशिः चतुरस्राणां च विमानानां यो भवेद्राशिः, एतौ द्वावपि राशी द्वाभ्यां गुणयेत्। तुशब्दो वक्ष्यमाणो भिन्नक्रमः, ततः 'वट्ट' त्ति वृत्तविमानराशिं पुनः त्रिभिर्गुणयेदिति ॥ २२३ ॥ ततो यत्कृत्यं तदाह—

वट्टगरासी तिउणो, तेरस मज्झिल्लगा उ तो पच्छा।
पक्खेयव्वा वट्टेसु चेव होंतावलिविमाणा ॥ २२४ ॥

वृत्तकराशिस्त्रिगुणः कृतो यदा भवति तदा त्रयोदश 'मध्यकास्तु' वृत्तेन्द्रकाः पुनस्तत्र त्रिगुणितान्तरं पश्चात्प्रक्षेप्तव्या वृत्तेषु चैव विमानेषु, ततो भवन्ति 'आवलिविमानाः' वृत्तत्र्यस्रचतुरस्रसंज्ञिताः गणनाप्रमाण[तः]। यदत्र त्र्यस्रचतुरस्रराशी द्विगुणौ कृतौ वृत्तराशिश्च त्रिगुणस्तत्रायमभिप्रायः—यानि दक्षिणश्रेणिगतानि त्र्यस्राणि चतुरस्राणि च विमानानि तानि शक्रस्यैव, उत्तरश्रेणिगतानि त्वीशानस्य, पूर्वपाश्चिमदिशोस्तु त्र्यस्राणां चतुरस्राणां च विमानानां साधारणभावादर्द्धं शक्रस्यार्द्धमीशानस्येति दिग्द्वयगतार्द्धार्द्धमीलनेनैकैकस्य त्र्यस्रराशे[श्चतुरस्रराशे]श्च निष्पन्नत्वाद्द्विगुण[:]त्र्यस्रराशिश्चतुरस्रराशिश्च शक्रेशानयोः प्रत्येकं भवति। वृत्तविमानानि पुनर्दिक्त्रयसंबन्धीनि शक्रस्याऽऽभवन्तीति त्रिभिर्गुण्यन्ते। औदीच्यश्रेणिगतान्येव पुनर्विमानानीशानस्ये-

त्र्येकगुणानि तानीति ॥ २२४ ॥ एवं त्र्यस्रराशौ चतुरस्रराशौ च द्विगुणीकृते वृत्तराशौ च त्रिगुणे यत्संपन्नं तदाह—

**सत्त सय सत्तवीसा, चत्तारि सया उ होंति चउणउया ।**
**चत्तारि य छासीया, सोहम्मे होंति वट्टाई ॥ २२५ ॥**

सप्त शतानि सप्तविंशानि, चत्वारि शतानि तु भवन्ति चतुर्णवतानि, चत्वारि च षडशीतानि, किम् ? इत्याह—सौधर्मदेवलोके भवन्ति 'वृत्तादीनि' वृत्तत्र्यस्रचतुरस्राणि विमानानीति ॥ वृ० ७२७, त्र्य० ४९४, चतु० ४८६ ॥ २२५ ॥ इत्थं सौधर्मे प्रतिपाद्येशानेऽपि वृत्तादिप्रमाणं प्रतिपादयितुमाह—

**एमेव य ईसाणे, णवरं वट्टाण होइ णाणत्तं ।**
**दो सय अट्ठत्तीसा, सेसा जह चेव सोहम्मे ॥ २२६ ॥**

'एवमेव च' पूर्वगाथोक्तक्रमेण विमानप्रमाणं 'ईशाने' द्वितीयदेवलोके बोद्धव्यम् । सर्वथासाम्यपरिहारायाह—'नवरं' केवलं वृत्तविमानानां भवति 'नानात्वं' विशेषः, तदेवाह—द्वे शते अष्टत्रिंशे वृत्तविमानानाम् । वृत्तविमानवत् त्र्यस्रचतुरस्रराश्योरपि माने कश्चित्केनचिद्विशेषः संभावयिष्यते इति तन्निरासायाह—'शेषाः' त्र्यस्राश्चतुरस्राश्च विमानाः 'यथा चैव' यत्परिमाणा एव सौधर्मे तथैव बोद्धव्याः ॥२२६॥ इत्थं शक्रेशानयोर्विभागेन वृत्तादिविमानप्रमाणं प्रतिपाद्य संप्रति तदेव तयोः समुदायेन प्रतिपादयन् क्रमेण करणभूतं गाथाद्वयमाह—

**मुहभूमिसमासद्धं, वेहगुणं सोहणूण तिहिं भइयं ।**
**सत्तगुण दुगुणसोहणवेहजुयं चेव जम्माणं ॥ २२७ ॥**

मुहभूमिसमासद्धं, वेहगुणं सोहणूण तिहि भइयं ।
पंचगुणादुगुणसोहणगसंजुयं उत्तरिल्लाणं ॥ २२८ ॥

इह किलायमभिप्रायः—द्वयोरप्यनयोर्देवलोकयोश्चतस्रो विमानश्रेणय-स्तत्रैकैकस्यां श्रेण्यां त्रयस्त्रयो वृत्तादिविमानराशयः सन्ति समुदायेन च द्वादश। तेषु च दक्षिणदिग्वर्त्तिवृत्तादिराशित्रयं पूर्वापर[वर्ति]वृत्तराशिद्वयं पौरस्त्यपाश्चात्ययोश्च त्र्यस्रचतुरस्रयो राश्योरर्द्धार्द्धमीलनेन निष्पन्नं राशि-द्वयमिति सप्तराशयः शक्रस्याऽऽभवन्ति। शेषा औदीच्यास्त्रयो द्वौ च पौरस्त्यपाश्चात्यत्र्यस्रचतुरस्रराश्योरर्द्धार्द्धमीलने निष्पन्नौ राशी इति पञ्चराशय ईशानस्याऽऽभाव्या इति। अमुमेव चाभिप्रायं मनसि निवेश्य सूत्रकारः [ सूत्र ]माह—

'मुखभूमिसमासार्द्धं' प्रागेव निरूपितस्वरूपं 'वेधगुणं' त्रयो-दशप्रस्तटगुणितमित्यर्थः, शोधनकोनं त्रिभिर्भक्तं क्रियते, ततः सप्तगुणं 'द्विगुणशोधनकवेधयुतं' द्विगुणेन शोधनकेन—अष्टाविंशत्येत्यर्थः, वेधेन च—त्रयोदशलक्षणेन युक्तं सत्, चैवेति समुच्चये, 'याम्यानां' याम्येन्द्रसंबन्धिनां श्रेणिगतविमानानां परिमाणं भवतीति ॥ २२७ ॥

इयमपि गाथा पूर्वगाथावद् व्याख्येया। नवरं त्रिभिर्भागे हृते यल्ल-भ्यते तत्पञ्चगुणं कर्त्तव्यमिति ॥ २२८ ॥

ये (या) चात्र शोधनकस्य द्वयोरपि कल्पयोर्द्विगुणस्य सतोर्योजना क्रियते सा चतुर्दिक्संबन्धिनां चतुर्णां शोधनकानां मध्याद्दक्षिणोत्तरयो-र्दिशोरेकैकस्य केवलस्य पूर्वपश्चिमयोश्च द्वयोः शुद्धयोरर्द्धार्द्धस्य योजनेन एकप्रमाणशोधनकभावात् ॥ एकैकस्य कल्पस्य शोधनकद्वयलाभ इति कृत्वा करणद्वयमेव भावयितुं गाथाद्वयमाह—

दो सय अट्ठत्तीसा, सोहम्मे सत्तएण गुणिऊणं ।
तेरस पत्थड दुगुणं, च सोहणं तत्थ छोढव्वं ॥ २२९ ॥

मुखभूमिसमासार्द्धे वेधगुणे शोधनोने त्रिभिश्च भक्ते सति ये लब्धे द्वे शते अष्टत्रिंशे सौधर्मे कल्पे [ तान् ] सप्तकेन गुणयित्वा पश्चात् 'त्रयोदश प्रस्तटाः' प्रस्तटप्रमाणा इन्द्रका इत्यर्थः, द्विगुणं च शोधनकं तत्र सप्तगुणे राशौ क्षेप्तव्यमिति ॥ २२९ ॥ तथा—

दो सय अट्ठत्तीसा, ईसाणे पंचएण गुणिऊणं ।
दुगुणं च सोहणं तत्थ नियमओ होइ छोढव्वं ॥ २३० ॥

द्वे शते अष्टत्रिंशे प्राग्निरूपिते एव 'ईशाने' द्वितीयदेवलोके पञ्चकेन गुणयित्वा ततः 'द्विगुणं च' द्विगुणं पुनः शोधनकं 'तत्र' पञ्चगुणे राशौ नियमाद्भवति क्षेप्तव्यम् । इन्द्रकप्रक्षेपश्चात्र नास्ति, तेषां शक्रस्यैवाऽऽभाव्यत्वादिति ॥ २३० ॥ एवं सप्तगुणे पञ्चगुणे चैकत्र द्विगुणशोधनकेन्द्रकयोः दशकसंयोगेऽन्यत्र द्विगुणशोधनकसंयोग एव यल्लब्धं तद्दर्शयितुमाह—

सत्तरस सया सत्तुत्तरा उ सोहम्मि आवलिविमाणा ।
बारस अट्ठारहिया, ईसाणे आवलिविमाणा ॥ २३१ ॥

सप्तदश शतानि सप्तोत्तराणि 'तुः' पूर्ववत् सौधर्मे 'आवलिविमानाः' श्रेणिप्रतिबद्धविमानविशेषा भवन्ति । तथा द्वादश शतान्यष्टादशाधिकानि 'ईशाने' द्वितीयदेवलोके आवलिविमाना इति ॥ २३१ ॥ अनयोरेव कल्पयोः पुष्पावकीर्णविमानप्रमाणनिर्धारणाय गाथाद्वयमाह—

इगतीस सयसहस्सा, अट्ठाणउतिं भवे सहस्साइं ।
दो य सया तेणउया, सोहम्मे पुप्फकिण्णाणं ॥ २३२ ॥

एकत्रिंशत् 'शतसहस्राणि' लक्षाः अष्टानवतिर्भवेत्सहस्राणि द्वे च शते त्रिनवते सौधर्मे 'पुष्पकीर्णानां' पुष्पप्रकरवद्विप्रकीर्णरूपाणां पुष्पावकीर्णानामित्यर्थः, सौधर्मसामान्यविमानेभ्यो द्वात्रिंशल्लक्षप्रमाणेभ्यः सप्तदशशतानां सप्तोत्तराणां श्रेणिप्रतिबद्धविमानानां शोधने शेषस्य पुष्पावकीर्णराशेरेतत्संख्यस्य संभवादिति ॥ २३२ ॥

**सत्तावीसं लक्खा, अट्ठाणउतिं भवे सहस्साइं ।**
**सत्त सया बासीया, ईसाणे पुप्फकिरणाणं ॥ २३३ ॥**

सप्तविंशतिर्लक्षा अष्टानवतिर्भवेयुः सहस्राणि सप्त शतानि द्व्य-शीतानीशाने पुष्पकीर्णानाम्, अत्रापि ईशानविमानेभ्योऽष्टाविंशति-लक्षप्रमाणेभ्योऽष्टादशाधिकद्वादशशतप्रमाणश्रेणिप्रतिबद्धविमानशोधनके कृते प्रस्तुतविमानसंख्यासंभव इति ॥ २३३ ॥ अथ सनत्कुमारमा-हेन्द्रयोः श्रेणिगतविमानप्रमाणानयनाय करणं करणफलं च गाथाष्टकेनाह—

**अउणापरणाडतीसामुहभूमिसमास अद्धगं णेच्छे ।**
**बारसओ ओलंबो, तस्सद्धं गेण्हिउं गुणए ॥ २३४ ॥**

एकोनपञ्चाशदष्टत्रिंशल्लक्षणयोर्मुखभूम्योः समासः सप्ताशीतिलक्षणः अर्द्धकं-अर्द्धभावलक्षणं 'न' नैव 'इच्छति' प्रतिपद्यते यतः ततः 'द्वादशकोऽवलम्बः' प्रस्तटप्रमाणलक्षणो यो वर्तते तस्यार्द्धं गृहीत्वा तेन गुणयेन्मुखभूमिसमासार्द्धमेवेति ॥ २३४ ॥

**तो बारस सोहणयं, अवणेहि तिहिं च तो हरे भागं ।**
**भागहिए जं लद्धं, तत्थ सयं सत्तरं होइ ॥ २३५ ॥**

ततोऽवलम्बार्द्धगुणितमुखभूमिसमासराशेः संपन्नद्वाविंशत्यधिकपञ्च-शतप्रमाणात्सकाशाद्द्वादशशोधनकं 'अपनय' स्फेटय, त्रिभिश्च 'ततः'

तस्य राशेर्हरेद्भागम्, ततो भागे हृते यल्लब्धं तत्र शतं 'सत्तरं'ति सप्तत्यधिकं भवतीति ॥ २३५ ॥

तं तित्थं काऊणं, सोहणभागं हराहि तिहिँ पच्छा ।
जं लद्धं तं दुगुणं, खिव तंसे इयरमेगगुणं ॥ २३६ ॥

'तं' राशिं 'त्रिस्थं' स्थानत्रयस्थापितं कृत्वा शोधनभागं हर त्रिभिः, पश्चाद्यल्लब्धं चतुष्टयरूपं तद्द्विगुणं क्षिप 'त्र्यस्रे' त्र्यस्रविमानराशौ, 'इयरं'ति इतरस्मिंश्चतुरस्रराशौ एकगुणं क्षिपेति ॥ २३६ ॥

इय माहिंदत्थं पडि-रासीए तिण्णि वीहरासीओ ।
तो णं सणंकुमारे, वट्टगरासिं करे तिगुणं ॥ २३७ ॥

'एनं' त्रिस्थं 'माहेन्द्रस्थं' माहेन्द्रदेवलोकवर्त्तिनं राशिं सप्तत्यधिक–अष्टसप्तत्यधिक–चतुःसप्तत्यधिकशतलक्षणं एकत्र स्थाने स्थापयित्वेति गम्यते, ततः किं कर्त्तव्यम्? इत्याह––प्रतिराश्या द्वितीयस्थाने स्थापयित्वा एतानेव त्रीनपि वृत्तत्र्यस्रचतुरस्रसंज्ञितान् 'इह' प्रस्तावे राशीन्, ततः 'णं' इति वाक्यालङ्कारे ['सनत्कुमारे'] सनत्कुमारदेवलोके वृत्तकराशिं कुर्यात् त्रिगुणम्, पूर्वदक्षिणापरदिग्गतवृत्तविमानानां सनत्कुमारेन्द्रस्याऽऽभाव्यत्वादिति ॥ २३७ ॥ ततोऽपि किं कर्त्तव्यम्? इत्याह—

तिगुणीकए उ वट्टे, तंसे दुगुणे तहेव चउरंसे ।
पच्छा मज्झिल्लिंदा, बारस वट्टेसु पक्खेवो ॥ २३८ ॥

त्रिगुणीकृते तु 'वृत्ते' वृत्तराशौ त्र्यस्रे द्विगुणे तथैव चतुरस्रे द्विगुण एव पश्चान्मध्यमेन्द्रकाद् द्वादश वृत्तेषु विमानेषु प्रक्षेपः कर्त्तव्य इति ॥ २३८ ॥ एवंकृते सति सनत्कुमारे यल्लब्धं तद्दर्शयितुमाह—

पंच सया बावीसा, तिरणेव सया उ होंति छप्पराणा।
तिरिण सया अडयाला, सणंकुमारस्स वट्टादी ॥ २३९ ॥

पञ्च शतानि द्वाविंशानि, त्रीण्येव शतानि तु भवन्ति षट्पञ्चाशानि, त्रीणि शतान्यष्टचत्वारिंशानि 'सनत्कुमारस्य' तृतीयकल्पप्रभोः 'वृत्तादीनि' वृत्तत्र्यस्रचतुरस्राणि विमानानि यथासंख्यं भवन्तीति ॥ २३९ ॥

माहिंदत्थो रासी, पुव्वं पडिरासिऊण जो ठविश्रो।
तत्थ उ वट्टगरासि, एगगुणं दुगुणमियरं तु ॥ २४० ॥

माहेन्द्रस्थः 'राशिः' वृत्तत्र्यस्रचतुरस्रसंज्ञितः 'पूर्वं' सनत्कुमारवृत्तादिविमानानयनावसरे प्रतिराश्य द्वितीयराशिरूपतया कृत्वा यः स्थापित आसीत् 'तत्र तु' तस्मिन् राशित्रये पुनर्वृत्तकराशिमेकगुणं कुर्यात्, औदीच्यश्रेणिगतविमानानामेव माहेन्द्रनाम्न इन्द्रस्याऽऽभाव्यत्वात्। द्विगुणं 'इतरं तु', इतरं पुनः-त्र्यस्रराशिं चतुरस्रराशिं च कुर्यात्, यतो माहेन्द्रस्य औदीच्य [:] त्र्यस्रराशिश्चतुरस्रराशिश्च शुद्ध एवाऽऽभवति, पौरस्त्यपाश्चात्ययोश्चार्द्धमर्द्धमिति कृत्वा द्विगुणावेवैतौ राशी क्रियेते इति ॥ २४० ॥ एवं सति यदापन्नं माहेन्द्रे तद्दर्शयन्नाह—

सत्तर सयं अणूणं, तिरणेव सया हवंति छप्पराणा।
तिरिण सया अडयाला, वट्टादि महिंदसक्कस्स ॥२४१॥

'सप्ततं शतं' शतं सप्तत्यधिकमित्यर्थः, 'अनूनं' परिपूर्णं त्रीण्येव शतानि भवन्ति षट्पञ्चाशानि, त्रीणि शतान्यष्टचत्वारिंशानि [ 'वट्टादि' त्ति ] विभक्तिलोपात् वृत्तादीनि वृत्तत्र्यस्रचतुरस्राणि 'माहेन्द्रशक्रस्य' माहेन्द्रनाम्नो नाकनायकस्येति ॥ २४१ ॥ सांप्रतं द्वयोरपि कल्पयोर्यावती श्रेणिगतविमानसंख्या संपन्ना तां दर्शयितुमाह—

बारस सय छव्वीसा, कप्पम्मि सणंकुमार आवलिया ।
अट्ठ सया चोवत्तर, विमाण माहिंद आवलिया ॥२४२॥

द्वादश शतानि षड्विंशानि 'कल्पे' सनत्कुमारे 'आवलिका' इति आवलिकागतविमानसंख्या । तथाष्टशतानि चतुःसप्ता (सप्तता) नि 'विमान' इति विभक्तिलोपाद्विमानानां 'माहेन्द्रे' चतुर्थदेवलोके आवलिका भवतीति ॥ २४२ ॥ अनयोरेव कल्पयोः सामान्यविमानसंख्यायाः श्रेणिगतविमानानामपकर्षे यः शेषः पुष्पावकीर्णराशिस्तत्प्रमाणं प्रतिपादयितुं गाथाद्वयमाह—

एक्कारस लक्खाइं, अट्ठाणउतिं भवे सहस्साइं ।
सत्त सया चोवत्तर, हवंति पुप्फावकिण्णाणं ॥ २४३ ॥

एकादश लक्षा अष्टानवतिर्भवेयुः सहस्राणि सप्त शतानि चतुःसप्ता(सप्तता)नि भवन्ति पुष्पावकीर्णानां सनत्कुमारदेवलोके इति ॥२४३॥

सत्तेव सयसहस्सा, णवणउइं खलु भवे सहस्साइं ।
सयमेगं छव्वीसं, हवइ उ पुप्फावकिण्णाणं ॥ २४४ ॥

सप्तैव शतसहस्राणि नवतिः 'खलुः' वाक्यालङ्कारे भवेयुः सहस्राणि शतमेकं षड्विंशं भवति तु पुष्पावकीर्णानां माहेन्द्रदेवलोके । द्वादशलक्षप्रमाणाया अष्टलक्षप्रमाणायाश्च कल्पद्वयप्रतिबद्धसर्वविमानसंख्यायाः सकाशाद्यथाक्रममनन्तराभिहितश्रेणिगतविमानसंख्यापनयने यथोक्तपुष्पावकीर्णसंख्यासंभवादिति ॥ २४४ ॥ एतानि च वृत्तादिविमानानि तिर्यग्यथा स्थितानि [ तथा ] प्रतिपादयन्नाह—

सव्वेसु पत्थडेसुं, मज्झे वट्टं अणंतरं तंसं ।
एयंतर चउरंसं, पुणो वि वट्टं तओ तंसं ॥ २४५ ॥

'सर्वेषु प्रस्तटेषु' उडुप्रस्तटप्रभृतिद्वाषष्टिप्रमाणेषु मध्ये वृत्तम्, 'अनन्तरं' वृत्ताव्यवहितमेव त्र्यस्रम्, ततः 'एयंतरं' ति एतदनन्तरं चतुरस्रं विमानं भवति, 'पुनरपि' चतुरस्रानन्तरं वृत्तं ततस्त्र्यस्रमित्यादिक्रमेण तावन्नेयं यावच्छ्रेणिपर्यन्त इति ॥ २४५ ॥ इत्थं तिर्यगवस्थानमभिधाय सांप्रतमूर्ध्वावस्थानस्वरूपनिर्देशायाह—

**वट्टं वट्टस्सुवरिं, तंसं तंसस्स उप्परिं होइ।**
**चउरंसे चउरंसं, उड्ढं तु विमाणसेढीओ ॥ २४६ ॥**

वृत्तं सर्वमेवावलिकाप्रविष्टविमानं वृत्तविमानस्योपरि भवति। त्र्यस्रं त्र्यस्रस्य 'उप्परिं' ति उपरि भवति। 'चतुरस्रे' इति विभक्तिव्यत्ययाच्चतुरस्रस्य चतुरस्रमुपरि भवति। 'ऊर्ध्वं [ तु ]' ऊर्ध्वं पुनः 'विमानश्रेणयः' आवलिकारूपा इत्थं भवन्तीति। औडुप्रस्तटे तु नास्त्ययं व्यवहारः, अधोविमानानां तत्रा(तत्राऽ)संभवादिति॥२४६॥ वृत्तादिस्वरूपमेवाह—

**वट्टं थ वलयगं पिव, तंसं सिंघाडगं पिव विमाणं।**
**चउरंसविमाणं पुण, अक्खाडगसंठियं भणियं ॥ २४७ ॥**

वृत्तं विमानं 'थ' इति वाक्यालङ्कारे 'वलयमिव' शङ्खदन्तादिघटितवलयाकारमित्यर्थः। त्र्यस्रं शृङ्गाटकमिव विमानम्, शृङ्गाटकं नाम जलजस्त्रिकोणः फलविशेषः। चतुरस्रविमानं पुनरक्षपाटकसंस्थितं भणितम्, अक्षपाटको नाम प्रेक्षणकप्रेक्षणप्रवृत्तजनावस्थानयोग्यः स्थानविशेषः, स किल चतुरस्रो भवतीति ॥ २४७ ॥ एतेष्वेव द्वारनियमनायाह—

**सव्वे वट्टविमाणा, एगदुवारा हवंति विन्नेया।**
**तिण्णि य तंसविमाणे, चत्तारि य होंति चउरंसे ॥२४८॥**

सर्वे वृत्तविमानाः 'एकद्वाराः' एकप्रवेशनिगममार्गा भवन्ति विज्ञेयाः। त्रीणि च द्वाराणि त्र्यस्रविमाने। चत्वारि द्वाराणि भवन्ति चतुरस्र इति ॥ २४८ ॥ एतानि च यत्परिक्षिप्तानि भवन्ति तद्दर्शनायाह—

पागारपरिक्खित्ता, वट्टविमाणा हवंति सव्वे वि।
चउरंसविमाणाणं, चउद्दिसिं वेइया होंति ॥ २४९ ॥

'प्राकारपरिक्षिप्तानि' प्राकारः—वप्रः शाल इत्येकोऽर्थः, स च स्वभावत एवोत्तुङ्गकपिशीर्षकविभूषितोपरितनभागः चर्यावक्र(चक्र)-द्वाराट्टालकादिस्वावयवसंपन्नस्तेन परिक्षिप्ता वृत्तविमाना भवन्ति 'सर्वेऽपि' सर्वप्रस्तटवर्तिनोऽपि। चतुरस्रविमानानां 'चतुर्दिशि' चतसृष्वपि दिक्षु वेदिका भवन्ति, वेदिका नाम मुण्डप्राकार इति ॥ २४९ ॥ तथा—

जत्तो वट्टविमाणा, तत्तो तंसस्स वेइया होइ।
पागारो बोद्धव्वो, अवसेसेहिं तु पासेहिं ॥ २५० ॥

'यतः' यस्यां दिशि वृत्तविमानाः 'ततः' तस्यां दिशि त्र्यस्रे वेदिका भवति। 'प्राकारौ' उक्तलक्षणौ बोद्धव्यौ च शेषयोः पार्श्वयोः। चतुर्थपार्श्वे तु नास्ति त्र्यस्रत्वादिति ॥ २५० ॥ संप्रति सामस्त्येन विमानाकारप्रतिपादनायाह—

आवलियासु विमाणा, वट्टा तंसा तहेव चउरंसा।
पुप्फावकिण्णगा उण, अणेगविहरूवसंठाणा ॥ २५१ ॥

'आवलिकासु' सर्वप्रस्तटेषु पूर्वादिदिग्गतासु विमाना वृत्त(त्ताः) त्र्यस्रास्तथैव चतुरस्रा भवन्ति, आकारान्तरभाजो विमानस्य तासु कदाचनाप्यभावात्। पुष्पावकीर्णकाः पुनर्विमाना अनेकविधरूपाणि-

नन्द्यावर्तखड्गचक्रादिचित्ररूपभाञ्जि संस्थानानि—आकारा येषां ते तथा, सर्वेषां प्रशस्ताकाराणां तेषु क्वचित्कस्यचिद्भावादिति ॥२९१॥ एतान्यपि पुष्पावकीर्णानि कस्यां दिशि सन्ति कस्यां न सन्तीति निदर्शयन्नाह—

पुप्फावकिराणगा खलु, दाहिणओ पच्छिमेण उत्तरओ ।
पुव्वेण विमाणिंदस्स णत्थि पुप्फावकिराण त्थ ॥२५२॥

पुष्पावकीर्णका विमानाः ' खलुः ' वाक्यालङ्कारे 'दक्षिणतः' दक्षिणस्यां दिशि श्रेणिगतविमानक्षेत्रपरिहारेण ' पश्चिमेन ' पश्चिमस्यां दिशि 'उत्तरतः' उत्तरस्यां दिशि इन्द्रकविमानपेक्षया वर्त्तन्ते। 'पूर्वेण' पूर्वस्यां दिशि 'विमानेन्द्रस्य ' उडोर्विमानादेः ' न ' नैव 'सन्ति' वर्त्तन्ते पुष्पावकीर्णविमानाः 'अत्र' एतेषु प्रस्तटेषूडुप्रभृतिष्विति ॥ २९२ ॥ स्थापना चेयम्—एतानि श्रेणिगतविमानानि येषां द्वीपसमुद्राणामुपरिपातीनि तद्दर्शयन्नाह—




बावट्ठी आवलिया, तीसे अद्धं सयंभुरमणम्मि ।
उड्ढं पडिहि विमाणा, जे आवलियापइट्ठा उ ॥ २५३ ॥

द्वाषष्टिर्विमानानि 'आवलिका' या उडुप्रस्तटप्रतिबद्धा तस्याः 'अर्द्ध' इत्यर्द्धप्रमाणा एकत्रिंशदित्यर्थः 'स्वयंभूरमणे' स्वयंभुवो नाम देवास्ते रमन्ते क्रीडन्ति यत्र स तथा तत्र—सर्वपर्यन्तवर्तिनि नीरनिधौ, किम्? इत्याह—'ऊर्ध्वं' ऊर्ध्वां दिशमाश्रित्य पतन्ति विमाना ये आवलिकाप्रविष्टाः 'तुः' पूरणार्थः। इदमुक्तंभवति—सौधर्मदेवलोके प्रथमप्रस्तटे या द्वाषष्टिविमानप्रमाणाश्चतस्र आवलिकाः प्रवृत्तास्तासामर्द्धमर्द्धं स्वयंभूरमणजलधेरुपरितनभागेऽवतरति। शेषं चार्वाचीनद्वीपसमुद्रेष्विति सामर्थ्याद्गम्यत इति ॥ २५३ ॥ इदमेव सविशेषमाह—

तिरिणा य दीवे तिरणोव समुद्दे बाहिरे अवाहाए।
जेसिं पडिहि विमाणा, ते आवलियापइट्ठा उ ॥ २५४ ॥

त्रींश्च द्वीपान् त्रीनेव समुद्रान् 'बाह्यान्' समुद्रचक्रवालबहिर्वर्तिनः प्रतीत्य 'अबाधया' इन्द्रकविमानादन्तरालभावेन वर्तते, शेषद्वीपसमुद्रजातमिति गम्यते। के च ते त्रयो द्वीपाः समुद्राश्च? अत आह—येषामूर्ध्वं पतन्ति विमानाः 'ते' ये प्राक् त्र्यस्रचतुरस्रवृत्तरूपतया निरूपिताः 'आवलिकाप्रविष्टाः' आवलिकागताः 'तुः' पूरणार्थः ॥२५४॥ तानेव नामग्राहं दर्शयन् गद्यं सूत्रमाह—

देवे दीवे १ नागे समुद्दे २ जक्खे दीवे ४ भूए य समुद्दे ८ सयंभुरमणे दीवे १६ सयंभुरमणे समुद्दे य ३१ ॥

यथा 'देवः' देवाभिधो द्वीपस्तदनु नागसमुद्रस्ततोऽपि जक्षो द्वीप[स्ततोऽपि] भूतश्च समुद्रस्ततोऽपि स्वयंभूरमणो द्वीपः [ततोऽपि] स्वयंभूरमणसमुद्रश्च। अत्र च देवादिषु स्वयंभूरमणद्वीपपर्यन्तेषु पञ्चद्वीपसमुद्रेषु शेषाण्येकत्रिंशद्विमानान्येकं द्वे चत्वारि अष्टौ षोडशेति

क्रमेणोपरिभागे स्थितिमवलम्बन्ते । शेषद्वीपसमुद्रास्त्वावलिकागतविमानशून्योपरितनभागा एवेति ॥ एतेषां च श्रेणिगतविमानानां यावदन्तरं तत्प्रतिपादयितुमाह—

जे केइ विमाणिंदम्मि विमाणा तेसिमन्तरं जं तु ।
सो संखेज्जइभागो, उड्डलोयस्स बोधव्वो ॥ २५५ ॥

ये केचिद् 'विमानेन्द्रे' इन्द्रकविमानसमाननामन्युडुप्रस्तटादौ प्रस्तटविशेषे 'विमानाः' वृत्तादयस्तेषां 'अन्तरं' परस्परमन्तरालं यत्पुनर्वर्तते स संख्येयभागः, कस्य? इत्याह—ऊर्ध्वलोकस्य विस्तारक्षेत्रापेक्षया, अनुस्वारश्च प्राकृतत्वात्, 'बोद्धव्यः' मन्तव्यः । इदमुक्तं भवति—यानि श्रेणिगतविमानानि यत्रोर्ध्वलोके वर्तन्ते तस्य यद्विस्तारप्रमाणं तस्य संख्येयभागस्तेषां विमानानां परस्परमन्तरालप्रमाणमिति ॥२९९॥ अधुना यावन्ति प्रस्तटान्तराण्यूर्ध्वलोकमपेक्ष्य वर्त्तन्ते तद्दर्शयितुमाह—

बारेक्कारस दस सत्त तिण्णि तिण्णेव पत्थडाणं तु ।
दोण्हं दोण्हं कप्पाण अंतरा अट्ठ गेवेज्जा ॥ २५६ ॥

द्वादश सौधर्मेशानयोः, त्रयोदशानां प्रस्तटानां तत्र सद्भावेनेयतामेवान्तराणां भावात् । एवमेकादश सनत्कुमारमाहेन्द्रयोः । दश ब्रह्मलोकलान्तकयोः । सप्त शुक्रसहस्रारयोः । त्रीण्यानतप्राणतयोः । त्रीण्येवारणाच्युतयोः । 'प्रस्तटानां तु' प्रस्तटानां पुनर्द्वयोर्द्वयोः कल्पयोरनन्तरमिहैव भावितयोः 'अन्तराणि' विचालरूपाणि वर्तन्ते । तथाष्टौ 'ग्रैवेयकाणि' ग्रैवेयकसंबन्धीन्यन्तराणीति ॥२९६॥ संप्रति तिर्यग्लोकात्कियद्दूरे उडुविमानमिति दर्शयन्नाह—

अउणावीससमहियं, उडुविमाणं तु होइ तिरियाओ ।
सो उ विसेसो भणिओ, संखेज्जइभाग सेढीए ॥२५७॥

'अउणावीससमहियं' ति एकोनविंशति[तम]भागे समधिके उडुविमानं 'तुः' पूरणे भवति 'तिरियाओ' त्ति तिर्यग्लोकात् । यच्च "सोहम्मम्मि दिवड्ढा" इति वचनात् तिर्यग्लोकमपेक्ष्य सौधर्मदेवलोकः सार्द्धरज्जुप्रमाणे क्षेत्रे प्रतिपाद्यते तत्सौधर्मपर्यन्तप्रस्तटगतविमानाग्रभागापेक्षयेति समवसेयम् । 'स तु' पुनरूर्ध्वलोकक्षेत्रापेक्षया समधिकैकोनविंशतितमलक्षणः 'विशेषः' भागः 'भणितः' उक्तः, कीदृशः ? इत्याह—'संख्येयभागः', संख्येयतमोऽशः 'श्रेणेः' घनीकृतलोकाकाशप्रदेशपङ्क्तिरूपाया इति ॥ २५७ ॥ अथ पूर्वोक्तमेवार्थं स्वयमेव सूत्रकारः किञ्चिद् व्याचिख्यासुराह—

उड्डलोओ एगूणवीसखंडीकओ तओ तस्स ।
एगूणवीसभागम्मि समहिए ऊ उडुविमाणं ॥ २५८ ॥

ऊर्ध्वलोक एकोनविंशतिखण्डीकृतस्ततस्तस्य संबन्धिन्येकोनविंशभागे समधिके 'तुः' प्राग्वद्, दीर्घत्वं च प्राकृतत्वात्, उडुविमानं वर्तते तिर्यग्लोकादिति ॥२५८॥ उक्तमनुक्तं चार्थमेकवाक्यतयैव संगृह्णन्नाह—

आवलियविमाणाणं, तु अंतरं णियमसो असंखेज्जं ।
संखेज्जमसंखेज्जं, भणियं पुप्फावकिण्णाणं ॥ २५९ ॥

आवलिकाविमानानां 'तुः' पूरणार्थः 'अन्तरं' परस्परमन्तरालं तिर्यक्क्षेत्रापेक्षया 'नियमतः' नियमेनासंख्येययोजनप्रमाणम्, "जे केइ" ( गा० २५५ ) इत्यादि प्रागुक्तगाथोक्तलोकसंख्येयविभागस्यासंख्येययोजनप्रमाणत्वात् । तथा संख्येयमसंख्येयं भणितमन्तरं पुप्पावकी-

र्णानां विमानानामिति ॥ २५९ ॥ आदिमान्त्ययोर्विमानेन्द्रयोः प्रमाणं प्रतिपादयन्नाह—

पढमं उडुविमाणं, पणयालीसं भवे सयसहस्सा।
एगं च सयसहस्सं, भणियं सव्वट्ठसिद्धं तु ॥ २६० ॥

'प्रथमं' प्रथमप्रस्तटवर्तितया 'उडुविमानं' श्रेणिगतविमानप्रज्ञापनाविधिभूतं पञ्चचत्वारिंशद्भवेच्छतसहस्राणि योजनानामायामतो विष्कम्भतश्च, सर्वतो वृत्तरूपत्वात्तस्य। 'एकं च' एकं पुनर्योजनानां शतसहस्रं भणितं 'सवार्थसिद्धं' समस्तविमानोपरिवर्त्ति। 'तुः' पादपूरणार्थः ॥ २६० ॥ शेषेन्द्रकप्रमाणप्रतिपादनायाह—

तेण परं सेसाणं, पयराणं जे भवे विमाणिंदा।
वित्थारेण असंखाईं सयसहस्साइँ वित्थिण्णा ॥ २६१ ॥

'तेन परं' इति ततः परं 'शेषाणां' उडुप्रस्तट [ सर्वार्थसिद्धप्रस्तट ] व्यतिरिक्तानां प्रतराणां संबन्धिनो ये भवेयुः 'विमानेन्द्राः' इन्द्रकनामानो विमानाः, [ ते ] किम्? इत्याह—विस्तारेणासंख्येयानि योजनानां शतसहस्राणि विस्तीर्णा इति ॥ २६१ ॥ संप्रतीन्द्रकरहितावलिकाप्रतिबद्धपुष्पावकीर्णविमानविस्तारप्रमाणप्रतिपादनायाह—

आवलियाहिँ विमाणा, वित्थारेण भणिया असंखेज्जा।
संखेज्जमसंखेज्जा, भणिया पुप्फावकिण्णा उ ॥ २६२ ॥

आवलिकासु विमाना विस्तारेण भणिताः 'असंख्येयाः' असंख्येययोजनप्रमाणाः। 'संखेज्जमसंखेज्ज' त्ति संख्येययोजनविस्तारा असंख्येययोजनविस्ताराश्च भणिताः पुष्पावकीर्णास्तु ॥ २६२ ॥

एतच्च प्रमाणं प्रमाण [अङ्गुल] योजनापेक्षया। तच्च प्रमाणाङ्गुलमेव कथं निष्पद्यते ? इति तावदङ्गुलमेव प्रतिपाद्यते—

इह त्रिविधमङ्गुलम्—आत्माङ्गुलं उत्सेधाङ्गुलं प्रमाणाङ्गुलं चेति। तत्र ये यत्र युगे पुरुषाः स्वकीयाङ्गुलाष्टोत्तरशतसमुच्छ्रितदेहास्तेषां यत्स्वकीयाङ्गुलं तदात्माङ्गुलमित्युच्यते, अनियतप्रमाणं चेदम्, युगे युगेऽपरापरदेहप्रमाणानां पुरुषाणां भावात्। उत्सेधाङ्गुलं तु—" परमाणू रहरेणू, तसरेणू अग्गयं च वालस्स।" इत्यादिक्रमेणानुयोगद्वारनिरूपिते [ न ] लब्धात्मलाभं सर्वयुगेष्वपि प्रतिनियतैकस्वरूपं सूत्रधारकं वि....हस्तनिष्पत्तिहेतु। प्रमाणाङ्गुलं तु भरतचक्रवर्तिहस्ताङ्गुष्ठरेखातुल्यविष्कम्भायामबाहल्यम्, तच्च किलोत्सेधाङ्गुलापेक्षया चत्वारि शतान्यायामेन सूच्येत्यर्थः, सार्द्धे द्वे अङ्गुले विष्कम्भेणाङ्गुलं च बाहल्येनेति। एवं चायामस्य विष्कम्भगुणने उत्सेधाङ्गुलप्रमाणानां चतुरस्राणामङ्गुलप्रमाणमात्रबाहल्यानां क्षेत्रखण्डानां गणितव्यवहारेण सहस्रप्रमाणानां लाभादुत्सेधाङ्गुलक्षेत्रमपेक्ष्य प्रमाणाङ्गुलक्षेत्रं सहस्रगुणं भवति, उक्तं च—" उस्सेहंगुलमेगं, हवइ पमाणंगुलं सहस्सगुणं।" इति। मेयविषयश्चैतेषामित्थमवसेयः—" आयंगुलेण वत्थुं, उस्सेहपमाणओ मिणसु देहं। नगपुढविविमाणाइं, मिणसु पमाणंगुलेणं तु ॥ १ ॥" इह च नगपृथ्व्यादिप्रमाणप्रज्ञापनायां प्रमाणाङ्गुलक्षेत्रलब्धमुत्सेधाङ्गुलसहस्रं कल्पनया श्रेणिरूपतया व्यवस्थाप्य व्यापार्यत इत्येके मन्यन्ते। अन्ये पुनः प्रमाणाङ्गुलसूचिरुत्सेधाङ्गुलशतचतुष्टयप्रमाणाऽऽपाद्यत इति व्याकुर्वते। अनुयोगद्वाराणां चूर्णौ वृत्तौ च पुनरित्थमुपलभ्यते—" जे य

१ " परमाणू तसरेणू रहरेणू अग्गयं च वालस्स। " इत्यपि पाठः।

पमाणंगुलओ पुढवाइपमाणा आणिज्जंति ते पमाणंगुलविक्खम्भेण अ.-णेयव्वा न पमाणंगुलसूईए " त्ति । प्रमाणाङ्गुलविष्कम्भः सार्द्धोत्सेधाङ्गुलद्वयप्रमाणः, अनेनैव च प्रमाणाङ्गुलप्रमाणेन कूणिकस्य प्राप्तपरिमितवर्षप्रमाणराज्यस्य वैशालीनगरीमात्रसाधनेऽपि लग्नद्वादशवर्षस्य तदन्ववर्वाचीनदेशाऽऽक्रमेण भरतक्षेत्रार्द्धं विजित्य वैताढ्यवर्तितिमिस्रगुहागमनमुपपद्यते, न पुनरन्यथा । यतोऽत्र सहस्रगुणत्वे किञ्चिदधिकाष्टत्रिंशत्सहस्राधिकलक्षद्वयप्रमाणं भरतार्द्धं लभ्यते । चतुःशतगुणत्वे च किञ्चिदधिकानि पञ्चनवतिर्योजनसहस्राणि । एतावत्तावच्छरप्रमाणक्षेत्रम् । यत्पुनरर्वाचीनदेशभ्रमणक्रमेण धनुष्पृष्ठक्षेत्रप्रमाणमुत्पद्यते तदतिबहु, एतच्च कूणिककालभाविभिस्तुच्छदेहप्रमाणैस्तुच्छगमनशक्तिभिश्च सैनिकैर्नातिक्रमितुं पार्यते । यतश्च " प्रद्योतनलेखाहरिको लोहजङ्घनामा लोहोपमानजङ्घतया प्राप्तयथार्थाभिधानः प्रभातसमये भरुकच्छादुत्थित आदित्यास्तसमये उज्जयिनीमार्गे पञ्चविंशतियोजनप्रमाणं महता प्रयत्नेन प्रोल्लङ्घितवान् " इत्यावश्यकचूर्णौ श्रूयते, न च ततोऽपि तदा कश्चिच्छीघ्रगतिरभवत् । अतोऽन्येषां तद्गमनापेक्षयाऽर्द्धत्रिभागादिगमनानामेतावतः क्षेत्रस्य कथञ्चिदुल्लङ्घनं न संभाव्यते । न च सार्द्धद्विगुणत्वेऽपि प्रमाणाङ्गुलस्य चक्रवर्तिग्रामनगरादीनि भरतक्षेत्रे न मान्ति, पाटीगणितागतगणितपदापेक्षया क्षेत्रप्रमाणानयने सङ्गतवृत्त्यैव ग्रामनगरादीनां मानसंभवात् । तत्त्वं पुनः केवलिनो विदन्तीति ॥

संप्रति शक्रादीनामीशानादीनां च पञ्च विमानानि यान्यात्मन एवाभाव्यानि तेषां नामनिर्देशाय गाथापञ्चकमाह—

**पुव्वेण उ वेरुलियं, रुयगं पुण दक्खिणे दिसी (सा) भागे ।**
**अवरेण असोगं पुण, मसक्कसारं च उत्तरओ ॥ २६३ ॥**

'पूर्वेण' पूर्वस्यां दिशि सौधर्मावतंसकविमानात् 'तुः' प्राग्वत् 'वैडूर्य' वैडूर्यनामकं विमानम्, रुचकः पुनर्दक्षिणे दिग्भागे, 'अपरेण' अपरस्यां दिशि 'अशोकं' अशोकाभिधानम्, पुनः 'मसकसारं' मसक-साराभिधानं 'चः' समुच्चये 'उत्तरतः' उत्तरस्यां दिशीति ॥२६३॥

एवंणामा उ भवे, कप्पविमाणा हवंति विराणेया ।
जे दक्खिणेण इंदा, तेसिं खलु हांति पत्तेयं ॥ २६४ ॥

एवंनामान एव तुशब्दस्यैवकारार्थत्वात् भवः-संसारस्तदेकदेश-त्वाद्भवः-देवलोकस्तत्र, कल्पः-समस्तो देवलोकस्तत्प्रतिमविभूतिभाज-नत्वेन कल्पभूतविमानाः कल्पविमाना भवन्ति विज्ञेयाः, ते च ये 'दक्षिणेन' दक्षिणस्यां दिशि 'इन्द्राः' शक्रसनत्कुमार-ब्रह्ममहाशुक्रलक्षणास्तेषां 'खलुः' वाक्यालङ्कारे भवन्ति प्रत्येकम् । इह किलाच्युतपर्यन्तेषु द्वादशसु कल्पेषु प्रथमतृतीयपञ्चमसप्तमदेवलो-कगता इन्द्रा दाक्षिणात्या इति परिभाष्यन्ते, शेषाश्च षडौदीच्याः । दक्षिणोत्तरयोर्दिशोः केवलतदाभाव्यपञ्चपञ्चविमानानां क्रमेण शास्त्रान्तरे वर्णनात् । ततस्तेषां दाक्षिणात्यानामिन्द्राणां मध्यविमानापेक्षया पूर्वादि-दिग्गतानि चत्वारि चत्वारि वैडूर्यादीनि विमानानि भवन्तीति ॥२६४॥

रुयगे य मंदरे या, असोगे चेव सत्तवरणे य ।
पुव्वादिआणुपुव्वी, चउदिसिं होंति चत्तारि ॥ २६५ ॥

रुचकश्च मन्दरश्चाशोकश्चैव सप्तपर्णश्च 'पुव्वाइआणुपुव्वि' त्ति, इह किलानुपूर्वी त्रिधा-पूर्वानुपूर्वी पश्चानुपूर्वी अनानुपूर्वी चेति, ततश्चा-नुपूर्व्यन्तरव्यवच्छेदार्थमाह-पूर्वा दिग् आदिर्यस्याः सा पूर्वादि सा चासावानुपूर्वी च पूर्वाद्यानुपूर्वी तया पूर्वानुपूर्व्येति भावार्थः । विभ-

क्तिलोपश्च प्राकृतत्वात्। 'चतुर्दिशि' चतसृषु दिक्षु भवन्ति चत्वारि विमानानीति ॥ २६९ ॥

एवंणामा उ भवे, कप्पविमाणा हवंति विरणेया।
जे उत्तरेण इंदा, तेसिं खलु होंति पत्तेयं ॥ २६६ ॥

इयं च गाथा व्याख्यातार्थैव, परं ये तु उत्तरेणेन्द्रास्ते ईशानमाहेन्द्रलान्तकसहस्रारप्राणताच्युतनामानः षड् वक्तव्या इति ॥ २६६ ॥ यत्र च प्रस्तटे एतानि यच्च मध्यविमानस्य नाम तद्दर्शयितुमाह—

पंच वि कप्पविमाणा, उवरिं कप्पाण होंति नायव्वा।
मज्झिल्ला य विमाणा, कप्पसरिसनामया होंति ॥ २६७ ॥

पञ्चापि न केवलमेकद्व्यादय इत्यपिशब्दार्थः, कल्पविमानाः 'उवरिं' ति उपरितनप्रस्तटे त्रयोदशद्वादशादौ 'कल्पानां' स्वदेवलोकानां भवन्ति ज्ञातव्याः। दाक्षिणात्यानामिन्द्राणां दक्षिणस्यां दिशि, औदीच्यानामुत्तरस्यां दिशि। 'मध्यमाश्च' मध्यविमानाः पुनः कल्पसदृशनामका भवन्ति, केचित्सौधर्मेशानादिकल्पसमाननामान इत्यर्थः। यथा सौधर्मावतंसक ईशानावतंसक इत्यादीनि ॥ २६७ ॥ संप्रति त्रायस्त्रिंशेन्द्रसामानिकादिसंबन्धिविमानवक्तव्यतामाह—

तावत्तीसाण उ कंचणाइं सामाणियाण सयकंता।
पत्तेयविमाणा दक्खिणेण कप्पेसु तिसु होंति ॥ २६८ ॥

'त्रायस्त्रिंशानां तु' त्रायस्त्रिंशनाम्नां त्रयस्त्रिंशत्संख्यानां च पितृव्यादिमहत्तरस्थानीयदेवानां पुनः 'काञ्चनानि' काञ्चनमयत्वेन प्राप्तकाञ्चनाभिधानानि 'सामानिकानां' इन्द्रसमानरूपायुष्कादिगुणग्रामाणां देवविशेषाणामेव 'शतकान्तानि' शतकान्तरत्नविशेषमयानि 'प्रत्ये-

कविमानाः ' इति प्रत्येकविमानान्येकैकस्य त्रायस्त्रिंशस्य सामानिकस्य चैकैकं विमानमित्यर्थः ' दक्षिणेन ' दक्षिणस्यां दिशि व्यवस्थितेषु 'कल्पेषु' देवलोकेषु 'त्रिषु' सौधर्मसनत्कुमारब्रह्मलोकनामसु भवन्तीति ॥ २६८ ॥

सयज्जलेसु समाणा, तावत्तीसा य कंचणपहेसु ।
पत्तेयविमाणा उत्तरेसु कप्पेसु दुसु होंति ॥ २६९ ॥

'शतज्वलेषु' शतज्वलनामकरत्नमयेषु विमानेषु 'समानाः' सदृशा इन्द्रेणेन्द्रसामानिका इत्यर्थः, दीर्घत्वं च प्राकृतत्वात्, त्रायस्त्रिंशाश्च ' काञ्चनप्रभेषु ' काञ्चनप्रभरत्नमयेषु वसन्ति । एते च सामानिकत्रायस्त्रिंशावासभूताः प्रत्येकविमानाः ' उत्तरयोः ' ईशानमाहेन्द्रयोः कल्पयोर्द्वयोर्भवन्ति । अन्येषु देवलोकेषु मनागूमन्दरागद्वेषत्वेन सामानिकत्रायस्त्रिंशानामेकविमानेऽपि निवाससंभवादयमित्थं नियमः कृतः । इयं च गाथा " विषमाक्षरपादं च " इत्यादिगाथानुलक्षण(गाथालक्षणानु)सारिणी विज्ञेयेति ॥ २६९ ॥

संधप्पभं च सोमस्स, वरसिट्ठं जमस्स उ ।
सयज्जलं वरुणस्स, वग्गु वेसवणस्स उ ॥ २७० ॥

सन्ध्याप्रभं च ' सोमस्य ' पूर्वदिग्लोकपालस्य, वरशिष्टं ' यमस्य तु ' यमनाम्नो लोकपालस्य पुनः, शतज्वलं ' वरुणस्य ' पश्चिमाशापतेः, वल्गु ' वैश्रमणस्य तु ' उत्तरदिक्पालस्य पुनरिति ॥ २७० ॥

एवंनामा चत्तारि विमाणा जाव बंभलोगो उ ।
जे दाहिणेण इंदा, तेसिं खलु लोगपालाणं ॥ २७१ ॥

एवंनामानश्चत्वारो विमानास्तावन्नेया यावद् ब्रह्मलोकः 'तुः' पूरणार्थः,

ये ' दक्षिणेन ' दक्षिणस्यां दिशि 'इन्द्राः' शक्रसनत्कुमारब्रह्मनामानः तेषां संबन्धिनां ' खलुः ' वाक्यालङ्कारे 'लोकपालानां' पूर्वादिदिग्गतानां प्रत्येकं प्रत्येकं भवन्तीति ॥ २७१ ॥

**सोमे य सव्वओभद्दे, सुजाए सोमणे इय।**
**पुव्वाइआणुपुव्वी, चउदिसिं होंति चत्तारि ॥ २७२ ॥**

' सोमः ' सोमाभिधानः, चकारो भिन्नक्रमः, ततः सर्वतोभद्रश्च सुजातः ' सोमणे इय ' त्ति सुमना इति च—एवं ' पूर्वानुपूर्व्या ' उक्तलक्षणया चतुर्दिशि भवन्ति चत्वारो विमाना इति ॥ २७२ ॥

**एवंनामा उ भवे, कप्पविमाणा हवंति सव्वे वि।**
**जे उत्तरेण इंदा, तेसिं खलु लोगपालाणं ॥ २७३ ॥**

एवंनामान एव तुशब्दस्यैवकारार्थत्वात् 'भवे' देवलोके कल्पविमाना भवन्ति सर्वेऽपि, कल्पविमाना नाम कल्पपरिपालकदेवविशेषनिवासभूता विमानविशेषाः। यौ 'उत्तरेणेन्द्रौ' ईशानमाहेन्द्रौ तयोः खलु संबन्धिनां लोकपालानामिति ॥ २७३ ॥

**परिसा य आयरक्खा, अणीय तह जा य अग्गमहिसीओ।**
**सोहम्मे ईसाणे, कप्पविमाणेसु बोधव्वा ॥ २७४ ॥**

'परिषदः' शमिका—चण्डा—जाताख्यास्तिस्रः। तत्र शमिका उत्तमत्वेन स्थिरप्रकृतितया शमवती, स्वप्रभोर्वा कोपौत्सुक्यादिभावात् शमवत्युपादेयवचनतयेति शमिका। तथा तथाविधमहत्त्वाभावेनेषत्कोपादिभावाच्चण्डा।प्रकृतिमहत्त्ववर्जितत्वेनास्थान(ने)कोपादीनां जातत्वाज्जाता। एषा च(एता एव)क्रमेणाभ्यन्तरा मध्यमा बाह्या चेति।तत्राभ्यन्तरा समुत्पन्नप्रयोजनेन प्रभुणा गौरवार्हत्वादाकारितैव पार्श्वे समागच्छति, तां चासा-

वर्थपदं पृच्छति। मध्यमा तूभयथाप्यागच्छति, अल्पतरगौरवविषयत्वात् । अभ्यन्तरया वाऽऽदिष्टमर्थपदं तया सह प्रबध्नाति ग्रन्थिबन्धं करोतीति । बाह्या बाह्यत्वेनानाकारितैवागच्छति, अल्पतमगौरवविषयत्वात्, तस्याश्चार्थपदं वर्णयत्येवेति(—पदमेव वर्णयतीति) । चकारो भिन्नक्रमे, तत आत्मरक्षकाश्च, सन्नद्धबद्धकवचाः उत्पीडितशरासनपट्टिकाः गृहीतविविधप्रहरणाः सौधर्मसभायामास्थानगतं स्वप्रभुं परिक्षिप्य बद्धपालयो ये वर्तन्ते । 'अनीकानि' हस्त्यश्वरथपदातिवृषभगन्धर्वनाट्यलक्षणानि सप्त । तत्राद्यानि पञ्च संग्रामोपयोगीनि, द्वे तु भोगफले इति । 'तथा' इति समुच्चये । याश्च 'अग्रमहिष्यः' पट्टराज्ञीसदृक्षास्त्रिदशपतिपत्न्यः ताः सौधर्मे ईशाने कल्पविमानेषु बोद्धव्या इति ॥ २७४ ॥ एतदेव सविशेषं भावयितुमाह—

**परिसाईया सव्वे, सोहम्मे जे य होंति ईसाणे ।**
**पत्तेयविमाणेसुं, वसंति न उ सक्कतणएसु ॥ २७५ ॥**

'परिषदादयश्च' देवविशेषा अनन्तरमेव निरूपिताः सर्वे सौधर्मे ये च भवन्ति ईशाने, ते किम्? इत्याह—'प्रत्येकविमानेषु' पृथक्पृथगवस्थितलक्षणेषु वसन्ति, 'न तु' न पुनः 'सक्कतणएसु' त्ति शक्रसत्कनिलयेषु, सेवावसरागतानामेव पञ्चस्वपि शक्रविमानेषु परिषदादीनामवस्थानसंभवादिति ॥ २७५ ॥ उपरितनदेवलोकेषु परिषदादिदेवनिवासनिरूपणायाह—

**कप्पविमाणेसु भवे, परिसाओ आयरक्खऽणीया य ।**
**एगविमाणे सामाणिया य तह लोगपाला य ॥ २७६ ॥**

'कल्पविमानेषु' उक्तलक्षणेषु 'भवेयुः' निवसेयुः, के? इत्याह—

'परिषदः' पारिषद्यदेवा आत्मरक्षा अनीकाश्च 'एकविमाने' साधारण-रूप एव सामानिकाश्च। 'तथा' इति समुच्चये, लोकपालाश्चेति ॥ २७६ ॥ एतदेव व्याख्यातुमाह—

परिसाईया सव्वे, एगविमाणे हवंति नियमाओ।
कप्पे सणंकुमारे, माहिंदे बंभलोगे य ॥ २७७ ॥

'परिषदादिकाः' पारिषद्यप्रभृतयोऽनन्तरोक्ता देवविशेषाः 'सर्वे' निरवशेषा एकविमाने भवन्ति 'नियमाओ'त्ति नियमेन, केषु देवलोकेषु ? इत्याह—कल्पे सनत्कुमारे माहेन्द्रे ब्रह्मलोके चेति ॥ २७७ ॥ अत्रैवार्थे उपपत्तिमाह—

परिसाईया सव्वे, उवरिं तु हवंति कारणं किं तं ?।
भण्णइ जं उवरिमया, कप्पेसु न पेम्मराइल्ला ॥ २७८ ॥

परिषदादिकाः सर्वे 'उपरि तु' उपरितनदेवलोकेषु पुनरेकत्रैव भवन्तीत्यत्र कारणं किं तद्येनैवम् ? 'भण्यते' उच्यते—'यद्' यस्मात्कारणात् उपरिमका देवाः 'कल्पेषु' स्वावासविमानलक्षणेषु 'न' नैव 'पेम्मराइल्ल' त्ति प्रेमरागिणः। रागशब्देनात्र मत्सर एव विवक्षितः। नात्यन्तं सौधर्मेशानदेवा इव परस्पररागद्वेषवन्तो वर्तन्त इत्येकविमानेऽपि वसतां तेषां तथाविधरागद्वेषाभावेन पुष्कलसमाधानलाभ एवेति ॥ २७८ ॥ अथ लान्तकादिषु स्वपारिषद्यादिदेवानामवस्थानमाह—

तेण परं जे देवा, परिसाईया वसंति ते सव्वे।
इंदविमाणेसुं चिय, ईसाईदोसरहियत्ता ॥ २७९ ॥

ततः परं ये देवाः 'परिसाईय' त्ति पारिषद्याद्याः 'वसन्ति' अवस्थितिं लभन्ते ते 'सर्वे' निरवशेषाः, क ? इत्याह—'इंदवि-

माणेसुं चिय ' त्ति इन्द्रसंबन्धिविमानेष्वेव। कुतोऽयं तेषामेकत्रैवावस्थानसंभवः? इत्याह—'ईर्ष्यादिदोषरहितत्वात्' तथाविधासूयामत्सराहङ्कारादिदोषव्रजविकलत्वादिति ॥ २७९ ॥ अथाग्रमहिषीणां प्रमाणं क्रियान्तरं चाभिधित्सुराह—

**सक्कस्स देवरयणो, देवीओ अट्ठ होंति नायव्वा।**
**एक्केक्का वि य एत्तो, विउव्वए सोलस सहस्से ॥ २८० ॥**

शक्रस्य 'देवराजस्य' त्रिदशनायकस्य 'देव्यः' अग्रमहिष्योऽष्टौ भवन्ति ज्ञातव्याः। एकैकापि च 'इतः' अष्टाग्रमहिषीदेवीमध्यात्, किम्? इत्याह—विकुरुते षोडश सहस्राणि। एतदुक्तं भवति—यदा शक्रः प्रवीचाराभिप्रायपरायणो भवति तदा सपदि वैक्रियसमुद्घातेन परिणम्य स्वशिखरोल्लिखितगगनान्तरालमतिबहलरश्मिजालपाटलीकृतसकलदिक्चक्रवालमतिशयोत्तुङ्गपवनप्रेर्यमाणरमणीयध्वजपताकामालमेकलक्षयोजनप्रमाणं संभोगभारसहमुत्तरविमानं विकुरुते, तदनु तन्मध्यवर्तिन्यां मणिपीठिकायां स एव दिव्यरूपं शयनीयमेकं निर्मापयति, ततोऽसावष्टाभिर्देवीभिः प्रत्येकं कृतषोडशसहस्रप्रमाणोत्तरवैक्रियशरीराभिर्द्वाभ्यां च गन्धर्वनाट्यानीकाभ्यां सहितः कृतानेकोत्तरवैक्रियशरीरस्तत्र विमाने समारोहति। ततो देवीभिः कृतोत्तरवैक्रियाभिस्सह महता संरम्भेण प्रवीचारमारभ्य कियतोऽपि कालादूर्ध्वं विगतवेदोदयविप्लवो भवतीति ॥ २८० ॥ सामस्त्येन सर्वदेवीसंबन्ध्युत्तरवैक्रियाप्रमाह—

**एगं च सयसहस्सं, अट्ठावीसं भवे सहस्साइं।**
**सक्कस्स देवरयणो, देवीणं होति ओरोहो ॥ २८१ ॥**

'एगं च' एकमेव 'शतसहस्रं' लक्षमष्टाविंशतिर्भवेयुः सहस्राणि

शक्रस्य देवराजस्य देवीनां भवति 'अवरोधः' अन्तःपुरम्, षोडशानां सहस्राणामष्टाभिर्गुणने एतावत्याः संख्यायाः संभवादिति । अङ्कोऽपि १२८००० ॥ २८१ ॥ संप्रति सौधर्माधिपतौ स्वस्थितिकालं परिपालयति सत्युत्कृष्टादिस्थितयो देव्यः सौधर्मवास्तव्या यावत्यस्ततश्च्यवन्ते तदर्थप्रतिपादनाय गाथासप्तकमाह—

सक्कस्स देवरण्णो, आउठिई जाव खिज्जए ताव ।
अच्छरगणपरियट्टा, हवंति जावंतिया सुणसु ॥ २८२ ॥

शक्रस्य देवराजस्य 'आयुःस्थितिः' सागरोपमद्वयलक्षणा यावत्क्षीयते तावत् 'अप्सरोगणपरिवर्ताः' नवनवोत्पादलक्षणा भवन्ति यावन्तस्तान् शृण्विति ॥ २८२ ॥

चत्तालसयसहस्सा, कोडीणं होंति रूवमब्भहिया ।
अच्छरगण परियट्टा, बोधव्वा वज्जपाणिस्स ॥ २८३ ॥

चत्वारिंशच्छतसहस्राः कोटीनां भवन्ति 'रूवमब्भहिय' त्ति रूपेणाधिकानामुत्कृष्टरूपाणामित्यर्थः, मकारोऽलाक्षणिकः, अप्सरोगणानां विभक्तिव्यत्ययलोपौ प्राकृतत्वात् ' परिवर्त्ताः ' परिवृत्तयो बोद्धव्याः ' वज्रपाणेः ' शक्रस्येति ॥ २८३ ॥

चत्तालसयसहस्सा, कह होंता ? सुणसु भणणए एवं ।
पलिओवमाइँ दोणि, तिपंचसुणज्जुए काउं ॥ २८४ ॥

चत्वारिंशच्छतसहस्राणि कोटीनामिति गम्यते, अप्सरोगणपरिवर्ताः कथं भवन्ति ? इति प्राह शिष्यः, आचार्योऽप्युत्तरमाह—शृणु भण्यते ' एवं ' यथा, पल्योपमे द्वे ' त्रिपञ्चशून्ययुते ' पञ्चदशशून्यसहिते कृत्वा विंशतिपल्योपमकोटीकोटी व्यवस्थाप्येत्यर्थः ॥२८४॥ ततः—

**उक्कोसगट्ठितीणं, जहरणगादिभइयाण जे लद्धा ।**
**तट्ठीयाणं णियमा, ते परियट्टा मुणेयव्वा ॥ २८५ ॥**

'उत्कृष्टस्थितीनां' पञ्चाशत्पल्योपमप्रमाणपरमायुष्काणां 'जहण्णगाइ' त्ति पल्योपमप्रमाणजघन्यस्थितीनां 'आदिशब्दात्' मध्यमस्थितीनां च संबन्धिना कालेनेति वाक्यशेषः, स चोत्कृष्टस्थितीनां पञ्चाशत्पल्योपमप्रमाण(:)मध्यमस्थितीनां द्व्यादिपल्योपमप्रमाणः किम्? इत्याह—भक्तानां—शक्रस्थितिकालपल्योपमानां यानि लब्धानि पल्योपमानि 'तत्स्थितीनां' भागहारलब्धपल्योपमप्रमाणायुष्कालानां देवीनां 'नियमात्' नियमेन 'ते' लब्धपरिमाणाः परिवर्त्ता मुणितव्याः । तत्रोत्कृष्टस्थितिदेव्यपेक्षया 'चत्ताल' इत्यादिगाथोक्तमेव प्रमाणम्, मध्यमस्थितिनामनियतम्, जघन्यस्थितीनां तु स्वयमेव वक्ष्यतीति ॥ २८५ ॥ संप्रति प्राणतेन्द्रे विंशतिसागरोपमप्रमाणमायुष्कालं परिपालयति पञ्चाशत्पल्योपमायुष्काणां सौधर्मदेवीनां यावन्तः परिवर्त्तास्तान् प्रस्तावाद्दर्शयन्नाह—

**दो सागरोवमाइं, पल्ले काऊण दसगुणे कुज्जा ।**
**पण्णासा पण्णेहिं, भागे लद्धं च तत्थ इमं ॥ २८६ ॥**

'द्वे सागरोपमे पल्यानि कृत्वा' विंशतिकोटीकोटीरूपतया व्यवस्थाप्येत्यर्थः । ततो दशगुणानि कुर्यात्, एवं च विंशतिसागरोपमायुष्कप्राणतेन्द्रस्थितिकालपल्योपमसंख्या कोटीशतद्वयप्रमाणा संपद्यते । तदनु पञ्चाशता पल्योपमैर्भागे हृते 'लब्धं च' प्राप्तं पुनस्तत्र 'इदं' यदुत चतस्रः कोटीकोट्यो देवीनां परिवर्त्ताः, अङ्कतोऽपि ४०००००००००००००० ॥२८६॥ सांप्रतं शक्रस्थितिकालपल्योपमानां पञ्चाशता पल्योपमैर्भागे हृते यथा 'चत्ताल' इत्यादिगाथोक्तसंख्या लभ्यते तथाह—

समसुराणं पाडेउं, लद्धा चत्तालकोडीलक्खाओ ।
रूवब्भहिय त्ति पुणो, जओ य ता परमरूवाओ ॥ २८७ ॥

'समशून्यं' यत्प्रमाणं पञ्चाशल्लक्षणस्य भागहारराशेः शून्यं तच्चैकमेव विंशतिपल्योपमकोटीप्रमाणाद्भाज्यराशेः 'पातयित्वा' अपनीय पश्चात्पञ्चभिर्भागे लब्धाश्चत्वारिंशत्कोटिलक्षा देवीपरिवर्तानामिति । अङ्कतोऽपि ४०००००००००००० । रूपाधिका इति यदुक्तं तद् व्याचष्टे–'रूपाधिकाः' इति पुनः कस्मादुक्तम् ? इत्याह—यतश्च'ताः' अप्सरसः परमरूपा इति ॥ २८७ ॥ अथोत्कृष्टस्थितिदेवीपरिवर्तप्रमाणं निगमयन् जघन्यस्थितिदेवीपरिवर्त्तप्रमाणप्रतिपादनायाह—

उक्कोसगट्ठितीणं, एवइया चेव होंति परियट्टा ।
जाओ जहण्णठीया, कोडाकोडीओ ता वीसं ॥ २८८ ॥

'उत्कृष्टस्थितीनां' पञ्चाशत्पल्योपमायुष्काणां देवीनां 'एतावन्त एव' उक्तप्रमाणा एव भवन्ति परिवर्ताः । तथा याः 'जघन्यस्थितयः' पल्योपमप्रमाणायुष्का देव्यः कोटीकोट्यः प्रसिद्धरूपा एव 'ताः' इति विभक्तिव्यत्ययात् तासां विंशतिः परिवर्त्तानाम्, यावन्ति शक्रायुःकालराशौ पल्योपमानि तावन्तो जघन्यस्थितीनां देवीनां परिवर्त्ता इति भावः । अङ्कतश्च २०००००००००००००००० ॥ २८८ ॥

एताश्च देव्यः किं सर्वकल्पेषु भवन्ति ? उत न ? इति उच्यते-नेति, तर्हि क्व भवन्ति ? सौधर्मेशानयोरिति ब्रूमः । तत्रापि किं प्रत्येकविमानवास्तव्याः साधारणविमानवास्तव्या वा ? उच्यते—उभयथापि न दोषः । यदि प्रत्येकविमानवास्तव्यास्तर्हि कियन्ति विमानानि ? इत्याह—

**पत्तेयविमाणाणं, देवीणं छ भवे सयसहस्सा ।**
**सोहम्मे कप्पम्मी, ईसाणे होंति चत्तारि ॥ २८६ ॥**

'प्रत्येकविमानानां' केवलदेवीलोकभोग्यानां देववासानां देवीनां संबन्धिनां षट् भवेयुः 'शतसहस्राणि' लक्षाः, क ? इत्याह—सौधर्मे कल्पे । ईशाने भवन्ति चत्वारि शतसहस्राणि प्रत्येकविमानानामिति ॥२८९॥

एतेषु हि विमानेषु देव्य एवाधिपतयो न देवाः । ताश्च गणिकालोकप्रायाः स्वेच्छाचारपरायणाः । याः पल्योपमादारभ्य यावत्सप्तप-

---

१ "एषु च ( सौधर्मकल्पगतापरिगृहीतासत्केषु ) विमानेषु यासां देवीनां पूर्वमेकं पल्योपमं स्थितिस्ताः सौधर्मदेवानामेवोपभोग्याः, यासां तु पल्योपममादिं कृत्वा एकद्वित्रिसंख्यातासंख्यातसमयैरभ्यधिका स्थितिर्यावत् पूर्णानि दशपल्योपमानि ताः सर्वा अपि सनत्कुमारदेवानां भोग्याः, उपरितनदेवास्तु ताः सर्वथा नेच्छन्ति । याः पुनः पल्योपमदशकादूर्ध्वं समयादिवृद्धया यावद्विंशतिपल्योपमस्थितिकास्ता ब्रह्मलोकदेवानां भोग्याः, ऊर्ध्वं समयादिवृद्धया यावत् त्रिंशत्पल्योपमस्थितयः शुक्रदेवानां भोग्याः, ततः समयादिवृद्धया यावच्चत्वारिंशत्पल्योपमस्थितय आनतदेवानां स्वस्थानस्था एव प्रवीचारणाप्रवृत्तमनोव्यापारालम्बनं भवन्ति, ततः समयादिवृद्धया यावत्पञ्चाशत्पल्योपमस्थितयः आरणदेवानामिति । ईशाने तु अपरिगृहीतदेवीनां चत्वारि विमानलक्षाणि, तेषु यासां साधिकं पल्योपमं स्थितिस्ता ईशानदेवानामेव भोग्याः, ततः साधिकपल्योपमादूर्ध्वं समयादिवृद्धया यावत्पञ्चदशपल्योपमस्थितयस्ता माहेन्द्रदेवानां भोग्याः, तत ऊर्ध्वं समयादिवृद्धया यावत्पञ्चविंशतिपल्योपमस्थितयस्ता लान्तकदेवानां भोग्याः, पञ्चविंशतेरूर्ध्वं यावत्पञ्चत्रिंशत्पल्योपमस्थितयः सहस्रारदेवभोग्याः, ततो यावत्पञ्चचत्वारिंशत्पल्योपमस्थितयः प्राणतदेवानां स्वस्थानस्थाश्चित्तालम्बनं भवन्ति, ततो यावत्पञ्चपञ्चाशत्पल्योपमस्थितयोऽच्युतदेवानामिति ।" इति रूपेण संग्रहण्यां १२९–१३०–१३१–१३२ गाथाटीकायाम् ॥

२–३ अत्र यत् किल यावत् सप्तपल्योपमस्थितीनां सौधर्मदेवभोग्यत्वं यावद्

ल्योपमस्थितयस्ताः सौधर्मदेवानां प्रवीचारयोग्या वर्तन्ते। एवमीशानेऽपि याः साधिकपल्योपमादारभ्य यावन्नवपल्योपमस्थितयस्तास्तद्देवलोकदेवानामेव प्रवीचारविषयतामायान्ति। अन्याः पुनः पल्योपमसाधिकपल्योपमस्थितेरारभ्य यावद्दशपञ्चदशपल्योपमप्रमाणस्थितयस्तावद्यथाक्रमं सनत्कुमारमाहेन्द्रदेवानाम्। ततोऽपि याः समयाद्यधिकदशपञ्चदशपल्योपमस्थितयो यावद्विंशति[ः पञ्चविंशति]श्च पल्योपमानि तावत्ता ब्रह्मलोकलान्तकदेवानाम्। ततो याः समयाद्यधिकस्थितयो यावत्त्रिंशत्पञ्चत्रिंशच्च पल्योपमानि तावत्ताः शुक्रसहस्रारदेवानाम्। अतोऽपि याः समयाद्यधिकस्थितयो यावच्चत्वारिंशत्पञ्चचत्वारिंशच्च तावत्ता आनतप्राणतदेवानाम्। अतोऽपि याः समयाद्यधिकस्थितयो यावत्पञ्चाशत् पञ्चपञ्चाशच्च तावत्ता आरणाच्युतदेवानां प्रवीचारयोग्या भवन्तीति। प्रवीचारक्रमश्च—"दो कायप्पवियारा कप्पा" (गा० ३४७) इत्यादिना वक्ष्यत इति॥ शेषविमानवक्तव्यतामाह—

**सोहम्मे ईसाणे, जे सेसा मीसगा उ ते सव्वे।**
**तेण परं जे सेसा, सणंकुमारादि णिम्मीसा॥ २९०॥**

सौधर्मे ईशाने [च] देवलोके ये 'शेषाः' षड्भ्यश्चतुर्भ्यश्च देवीविमानशतसहस्रेभ्यो व्यतिरिक्ताः 'मिश्रकास्तु' देवदेवीलोकसंकुला एवं ते सर्वे विमानाः। 'तेन' इति ततः परं ये शेषाः 'सणंकुमाराइ' त्ति सनत्कुमारादिषु देवलोकेषु 'निर्मिश्राः' देवानामेव तत्रोत्पादः,

---

नवपल्योपमस्थितीनामीशानदेवभोग्यत्वं देवीनामुक्तं तत् परिगृहीता आश्रित्य संभाव्यते। अन्यथाऽपरिगृहीतानां पल्योपमायुष्काणां साधिकपल्योपमायुष्काणामेव क्रमेण सौधर्मेशानदेवभोग्यत्वेनोक्तत्वादसङ्गतिः स्यात्॥

केवलेन्द्राः केवलदेवसंभवश्च, सौधर्मेशानयोरुपरिदेवलोकेषु ग्रन्थान्तरे देव्युत्पादस्य प्रतिषेधादिति ॥२९०॥ कल्पविमानप्रमाणप्रतिपादनायाह—

**सोहम्मे ईसाणे, कप्पविमाणाण होंति विक्खंभो ।**
**बारस य सयसहस्सा, पण्णासं चेव य सहस्सा ॥ २९१ ॥**

सौधर्मे ईशाने आधारभूते 'कल्पविमानानां' केवलेन्द्राभाव्यानां पञ्चानां संबन्धी भवति विष्कम्भः, किंरूपः ? इत्याह—द्वादश च शतसहस्राणि पञ्चाशच्चैव च सहस्राणि । अङ्कतोऽपि—१२५०००० ॥२९१॥ अमुमेवार्थं विषयविभागेन व्यवस्थापयितुं गाथाद्वयमाह—

**सोहम्मवडिंसे या, ईसाणवडिंसगम्मि जे भणिया ।**
**सक्कावासा पंच य, ईसाणे चेव आवासा ॥ २९२ ॥**

सौधर्मावतंसकविमानसंबन्धात्सौधर्मावतंसकः—सौधर्मपर्यन्तप्रस्तटस्तत्र 'चः' समुच्चये, एवमीशानावतंसके प्रस्तटे ये भणिताः प्राक् 'शक्रावासाः' केवलशक्राभाव्यत्वेन शक्रनिलयभूताः 'पञ्च च' पञ्चैव 'ईशाने चेव' इति विभक्तिव्यत्ययादीशानस्य चैवेन्द्रस्यावासाः पञ्चेत्यनुवर्तत इति ॥ २९२ ॥

**तेसेयं तु पमाणं, मज्झिल्लवडिंसयाण णऽण्णेसिं ।**
**सेसा संखमसंखा, जोयणकोडीओ माणेणं ॥ २९३ ॥**

'तेषां' पञ्चानां शक्रावासानामीशानावासानां च मध्ये 'एतत्तु' इदं पुनः 'प्रमाणं' अनन्तरोक्तं 'मध्यमावतंसयोः' सौधर्मावतंसकस्येशानावतंसकस्य चेत्यर्थः । व्यवच्छेदमाह—'न' नैव 'अन्येषां' चतुर्णाम् । तर्हि तेषां [किं] प्रमाणम् ? इत्याह—'शेषाः' चत्वारः सौधर्मावतंसकेशानावतंसकयोः प्रत्येकं बहिर्वर्त्तिनः 'संखमसंख' त्ति

केचित्संख्याता[ः केचिदसंख्याता]योजनकोटयः 'मानेन' आयामविष्कम्भलक्षणेन प्रमाणेनेति ॥२९३॥ अथ प्राकृतयोरेव विमानयोः परिधिमाह—

**ऊयालं चिय लक्खा, सहस्स बावरण अड सय सियाला।**
**छ चेगहिया धणुसय, पणगट्ठद्धंगुलं परिही ॥ २९४ ॥**

एकोनचत्वारिंशच्चैव लक्षाः सहस्राणि द्वापञ्चाशद् अष्ट शतानि सप्तचत्वारिंशानि योजनानां षट् चैकाधिकानि धनुःशतानि तथाङ्गुलानां पञ्चषष्टिरर्द्धाङ्गुलं च परिधिः। अङ्कतोऽपि [योजनानि] ३९५२८४७ धनूंषि ६०१ अं० ६५ $\frac{1}{2}$। अयं च—"विक्खंभ वग्ग दहगुण करणी वट्टस्स परिरओ होइ।" इत्यनेन करणेनोत्पादनीय इति ॥२९४॥ संप्रति सर्वा देवजातीराश्रित्य शरीरप्रमाणं प्रतिपादयितुं गाथाद्वयमाह—

**भवणवणजोतिसोहम्मीसाणे होंति सत्त रयणीओ।**
**एक्केक्कहाणि सेसे, दुदुगे य दुगे चउक्के य ॥ २९५ ॥**

'भवनवनज्योतिःसौधर्मेशाने' भवनपतिषु व्यन्तरेषु ज्योतिष्केषु सौधर्मदेवलोके ईशाने च भवन्ति सप्त 'रत्नयः' हस्ताः, उत्सेधाङ्गुलनिष्पन्नाश्चैते गृह्यन्ते, "उस्सेहपमाणओ मिणसु देहं" इति वचनात्। अतः परं का वार्त्ता ? इत्याह—एकैकहानिः शेषे 'दुदुगे य' त्ति द्विके द्विके च द्विके चतुष्के च, चकारौ समुच्चयार्थौ। इदमत्रैदंपर्यम्—भवनपत्यादीशानान्तानां देवानां सप्त हस्ताः शरीरप्रमाणम्। सनत्कुमारमाहेन्द्रयोः षट्। ब्रह्मलोकलान्तकयोः पञ्च। शुक्रसहस्रारयोश्चत्वारः। आनतप्राणतारणाच्युतेषु देवानां त्रयो हस्ताः शरीरप्रमाणमिति ॥ २९५ ॥

गेविज्जेसुं दोरयणी, एका रयणी अणुत्तरेसुं च ।
भवधारणिज्ज एसा, उक्कोसा होइ णायव्वा ॥ २९६ ॥

ग्रैवेयकेषु द्वौ रत्नी । एको रत्निः लिङ्गव्यत्ययश्च प्राग्वत् 'अनुत्तरेषु च' विजयादिषु पुनः 'भवधारणीया' भवं यावद्धार्यते या सा तथा न पुनरुत्तरवैक्रियेति भावः, 'एषा' सप्तहस्तादिका उत्कृष्टा भवति ज्ञातव्या । जघन्या तु सर्वेषामप्यङ्गुलासंख्येयभागमाना उत्पत्तिकाले लभ्यते । यदा तु भवनपत्यादयोऽच्युतान्ता देवा उत्तरवैक्रियं शरीरमारभन्ते तदा तदङ्गुलसंख्येयभागं जघन्यतः, उत्कृष्टतो योजनलक्षप्रमाणं भवति । ग्रैवेयकानुत्तरसुराणामुत्तरवैक्रियशरीराभावाद्भवधारणीयमेव शरीरं भवतीति ॥ २९६ ॥ अथैनामप्यविशेषोक्तामवगाहनां सौधर्मादिष्वनुत्तरपर्यन्तेषु सागरोपमवृद्धिक्रमेण हीनां हीनतरां च दर्शयितुं गाथाष्टकेन करणमाह—

कप्पाओ कप्पम्मि उ, जस्स ठिई सागरोवमविसिट्ठा ।
उस्सेहो तस्स हवे, एक्कारसभागपरिहीणो ॥ २९७ ॥

'कल्पात्' सौधर्मेशानद्वयादिलक्षणात्सकाशात् 'कल्पे' सनत्कुमारमाहेन्द्रादिलक्षणे 'यस्य' देवस्य स्थितिः 'सागरोपमविशिष्टा' पूर्वकल्पसागरोपमेभ्यो यावद्भिः सागरोपमैरधिका 'उत्सेधः' शरीरप्रमाणं 'तस्य' देवस्य भवेत् 'एकादशभागपरिहीणः' एकादशभागीकृतस्य हस्तस्य सप्तादिभिर्भागैरेकोत्तरवृद्धैस्तावत्स्थानगतैर्वक्ष्यमाणक्रमेण परिहीण इति ॥ २९७ ॥ एतदेव किञ्चिद् व्याचिख्यासुराह—

कप्पादो कप्पम्मि उ, सोहम्माओ सणंकुमारादी ।
उक्कोसठितिविसेसो, स विसिट्ठा सागरब्भहिया ॥२९८ ॥

'कल्पात्कल्पे' इति कोऽर्थः? सौधर्मादेः 'सणंकुमाराई' त्ति सनत्कुमारादौ कल्पे, किमुक्तं भवति? सौधर्मेशानकल्पद्वयात्सनत्कुमारमाहेन्द्रकल्पद्वये ततोऽपि ब्रह्मलोकलान्तकयोस्ततोऽपि शुक्रसहस्रारयोस्ततोऽप्यानतादिकल्पचतुष्टये तस्मादपि ग्रैवेयकनवके ततोऽप्यनुत्तरविमानेषु, किम्? इत्याह—'उत्कृष्टस्थितिविशे(श्ले)षः' उत्कृष्टयोः स्थित्योर्यो विशे(श्ले)षः—विवरकः 'सः' विशे(श्ले)षः, किम्? इत्याह—विशिष्टेऽपि (ष्टेति) पदैकदेशेऽपि पदसमुदायोपचारात् सागरोपमविशिष्टाः (ष्टा), कोऽर्थः? 'सागराभ्यधिका' या प्राक् स्थितिरुक्ता सोच्यतयिति ॥२९८॥ उत्कृष्टस्थितिविशे(श्ले)षपरिज्ञानार्थमुत्कृष्टस्थितीरेव तावदाह—

दो उदहि सत्त चोद्दस, अट्ठारस तह य चेव बावीसा।
इगतीसा तेत्तीसा, तेसिं विसेसो उ हेट्ठुवरिं ॥ २९९ ॥

द्वावुदधी सौधर्मेशानयोः, सप्त सनत्कुमारमाहेन्द्रयोः, चतुर्दश ब्रह्मलोकलान्तकयोः, अष्टादश चैव शुक्रसहस्रारयोः, 'तथा च' इति समुच्चये, द्वाविंशतिरानतादिचतुष्टये, एकत्रिंशद् ग्रैवेयकनवके, त्रयस्त्रिंशत्सागरोपमान्यनुत्तरेषु, 'तेषां' द्व्यादिसागरोपमानामुत्कृष्टस्थितिलक्षणानां विशे(श्ले)षस्तु' समधिकराशेः सकाशाल्लघुराशेः पातः पुनर्विधेयः। स च कथं विधेयः? इत्याह—'हेट्ठुवरिं' ति अधस्ताल्लघुराशीनामुपरिष्टाद् बृहत्तरराशीनां न्यासात्कार्यः। (ग्रथाग्रं २०००।) न्यासश्चायम्—

| | | | | | | |
|---|---|---|---|---|---|---|
| २ | ७ | १४ | १८ | २२ | ३१ | ३३ |
| १५० | २ | ७ | १४ | १८ | २२ | ३१ |

॥ २९९ ॥ एवंस्थिते यत्कार्यं तदाह—

इच्छियकप्पठिदीणं, जो उ विसेसो तओ गहेऊणं।
एगं भागे काउं, एक्कारस छेय एक्कारं ॥ ३०० ॥

ईप्सितकल्पस्थित्योर्द्वयोर्द्वयोरुत्कृष्टयोः 'यः' कश्चित् 'तुः' पूरणे 'विशे(श्ले)षः' पञ्चकादिलक्षणो राशिः तस्माद् गृहीत्वा 'एकं' रूपं तच्च 'भागान्' अंशान् कृत्वा एकादश अत्र च छेदः 'एक्कारं' ति एकादशलक्षणः स्थाप्य इति ॥ ३०० ॥ ततः किं कुर्यात् ? इत्याह—

**तं एगूणं सोहिय, विसेसरासिं तु तेहिं भागेहिं ।**
**एसा आदी सोज्झा, एक्कारसअंसमज्झाओ ॥ ३०१ ॥**

तं विशे(श्ले)षराशिमित्युत्तरेण योगः, 'एकोनं' एकेनोनीकृतं सन्तं प्राप्तचतुष्ककादिरूपमित्यर्थः 'शोधयित्वा' अपनीय 'विशे(श्ले)षराशिं' उक्तरूपं, 'तुः' एवकारार्थो भिन्नक्रमश्च, केभ्यः सकाशाच्छोधयित्वा ? इत्याह—'तेभ्य एव' एकादशसंख्येभ्यो भागेभ्यः, ततः किं कृत्यम् ? इत्याह— 'एस'त्ति एष विशे(श्ले)षराश्यपनयनेन संपन्नो राशिः सप्तकादि (:'आदिः') आदिनामा 'शोध्यः' अपनेयः, कुतः ? इत्याह—'एकादशांशमध्यात्' सामर्थ्याद् द्वितीयस्थानव्यवस्थापितेभ्य एकादशभ्योंऽशेभ्यः सकाशादिति ॥ ३०१ ॥ ततः—

**सेसेण गुणं(णे) छेयं, छेयंसोवट्टणं करेऊणं ।**
**सेसेण समं गच्छं, ठावय एगादि एगहियं ॥ ३०२ ॥**

'शेषेण' एकोनीकृतविशे(श्ले)षराशिना चतुष्कादिनेत्यर्थः 'गुणयेत्' ताडयेत् 'छेदं' आदिशुद्धौ सत्यां योऽवशिष्टो राशिस्तस्य संबन्धिनमेकादशलक्षणम्, ततस्तुल्येन राशिना भागं दत्त्वा छेदांशयोर्यल्लघूकरणं तच्छेदांशापवर्तनं तत् 'कृत्वा' विधाय ततः 'शेषेण' अनन्तरोक्तस्वरूपेण 'समं' तुल्यं 'गच्छं' अनन्तरमेवोपपादितमेकैकादशभागलक्षणं सच्छेदमेव 'स्थापय' न्यस्य प्राग्निरूपितादिसंज्ञराशेरनन्तरमेव, कीदृशम् ?

इत्याह—[ 'एकादिं' ] एक आदिः-प्रथमो यस्य स तथा तम्, पुनः कीदृशम्? इत्याह—'एकाधिकं' एकेनाधिकमिति ॥ ३०२ ॥ ततोऽपि किं कार्यम्? इत्याह—

**तं आईसंजुत्तं, हिट्ठिमरयणीओ गच्छठाणसमा।**
**ठवेत्तु घेत्तुमेगं, एक्कारसभाग काउमहे ॥ ३०३ ॥**

'तं' एकाद्यधिकतया स्थापितं गच्छराशिं आदिना-आदौ स्थापितेनैव राशिना संयुक्तं-समेतं कुर्यात्। तथा 'अधस्तनरत्नीन्' प्राग्देवलोकदेहप्रमाणहस्तान् सप्तादिलक्षणान्, कथंभूतान्? इत्याह—'गच्छस्थानसमान्' प्राग्विन्यस्तशोधयिष्यमाणराशिस्थानप्रमाणान् तदुपरिष्टादेव 'स्थापयित्वा' तावत्सु स्थानेषु विन्यस्येत्यर्थः, ततो गृहीत्वा एकं रत्निं तेभ्य एव रत्निभ्यः सकाशात् तं चैकादशभागान् कृत्वा 'अधः' इति तेभ्य एव रत्निभ्योऽधस्तात्स्थापयेति ॥ ३०३ ॥ ततोऽपि किम्? इत्याह—

**आदीसहियं सोहे, एक्कारसहित्तु ( हिं तु ) तत्थ जं सेसं।**
**तं सेसरयणिसहियं, अहिअहियतरुस्सयं जाण ॥ ३०४ ॥**

आदिना-प्रागुक्तस्वरूपेण सहितं-गच्छस्थानसमं स्थापितं 'शोधयेत्' अपनयेत्। प्राक्कृतेभ्य एकादशभ्यस्तु भागेभ्यस्तत्र शुद्धे यच्छेषं तत् 'शेषरत्निसहितं' उद्धरितहस्तसमन्वितं 'अधिकाधिकाऽतरोच्छ्रयं' अधिकाधिकेषु-पूर्वपूर्वकल्पस्थितेर्द्व्यादिसागरोपमलक्षणाया एकादिक्रमेण वृद्धिमुपागतेष्वतरेषु-सागरोपमेषूच्छ्रयं देहगतं जानीहि ॥ ३०४ ॥ अयमस्य गाथाष्टकस्य भावार्थः—

सौधर्मेशानकल्पद्वयस्थितेर्द्विसागरोपमरूपायाः सनत्कुमारमाहेन्द्रकल्पद्वयस्थितेश्च सप्तसागरोपमरूपाया विशे(श्ले)षः पञ्च, तेभ्यश्चैकस्मिन्

रूपे गृहीते शेषाश्चत्वारः, ते च शेषशब्दवाच्या भवन्ति । यच्च तदेकं रूपं गृहीतं तदेकादशभिर्भागैः क्रियते अधस्ताच्छेदश्चैकादशरूपः, स्थापना चेयम्–$\frac{११}{११}$ । द्वितीयेऽपि स्थानेऽयमेव राशिर्ध्रियते, यथा $\frac{११}{११}$ । ततश्च प्रथमराशेः सकाशात् शेषराशिश्चतुष्कलक्षणो विशोध्यते, शोधिते जाताः सप्तैकादशभागाः $\frac{७}{११}$, तेषां चादौ स्थाप्यमानत्वादादिरिति संज्ञाः । ते चादिसंज्ञाः सप्तैकादशभागा द्वितीयराशेः शोध्यन्ते, शुद्धेषु जाताश्चत्वार एकादशभागाः, ते चामी $\frac{४}{११}$ । एषां च च्छेद एकादशलक्षणः शेषराशिना चतुष्करूपेण गुणितो जातश्चतुश्चत्वारिंशत्संख्यः $\frac{४}{४४}$, ततस्तुल्येन चतुष्कराशिना छेदांशयोरपवर्तनं क्रियते, कृते च जात एक एकादशभागः, यथा $\frac{१}{११}$, एवं च कृते प्राग्निरूपितादिराशेरनन्तरमेनमेव राशिमेकाद्येकाधिकतया शेषसमं सच्छेदमेव स्थापयेत् । यथा—

| | | | | |
|---|---|---|---|---|
| ७ | १ | ३ | ४ | ११ |
| ११ | ११ | ११ | ११ | ११ |

तत एनमेव राशिमादिसंयुतं कुर्यात्, तत्रादिः सप्तैकादशभागाः, ते चैकादिषु क्षिप्ताः, ततो जातमिदम्—

| | | | | |
|---|---|---|---|---|
| ७ | ८ | ९ | १० | ११ |
| ११ | ११ | ११ | ११ | ११ |

तदन्वधस्तनकल्पहस्तान् सप्तप्रमाणान् पञ्चलक्षणगच्छसमान् अस्यैव राशेरुपरि स्थापयेत्, एतेभ्यश्च प्रत्येकमेकं गृहीत्वा एकादशभागीकृत्यैतदधस्तादेव स्थापयेत् । स्थापना चेयम्-

| | | | | |
|---|---|---|---|---|
| ६ | ६ | ६ | ६ | ६ |
| ११ | ११ | ११ | ११ | ११ |
| ७ | ८ | ९ | १० | ११ |
| ११ | ११ | ११ | ११ | ११ |

अत्र च प्रथमेभ्य एकादशभागेभ्य आदिः सप्तैकादशभागलक्षणः शोध्यते, ततो द्वितीयादिस्थानस्थेभ्यस्तेभ्य एव यथाक्रममष्टौ नव दशैकादशरूपा एकादशभागाः शोध्यन्ते, शोधिते यत्स्थितं तत्सनत्कुमारमाहेन्द्रयोर्येषां देवानां त्रीणि सागरोपमाणि स्थितिस्तेषां षड् हस्ताश्चत्वारश्चैकादशभागाः शरीरप्रमाणं भवति । एवमेकैकसागरोपमवृद्धौ एकैकभागहान्या ताव-

न्नेयं यावत्सप्तसागरोपमस्थितीनां देवानां षड्हस्तः शरीरोच्छ्र्यो भवतीति।

स्थापना— भागहानिं पादयिषुः

| सागरो० | ३ | ४ | ५ | ६ | ७ |
|---|---|---|---|---|---|
| हस्ताः | ६ | ६ | ६ | ६ | ६ |
| अंशाः | ४ | ३ | २ | १ | ० |
| छेदाः | ११ | ११ | ११ | ११ | ० |

अथ करणलब्धामेव कण्ठत एव प्रतिपिपादयिषुः गाथाद्वयमाह—

**अयरोवमाइं जेसिं, दोरिण ठिती तेसि सत्त रयणीओ।**
**सत्तेक्कारसभागा, रयणीए हाणि तइयम्मि॥ ३०५॥**
**अट्ठ चउत्थे नव चेव, पंचमे हाणि दस य छट्ठम्मि।**
**छ च्चेव य रयणीओ, पुराणाओ सत्तमे अयरे॥ ३०६॥**

'अतरोपमे' सागरोपमे 'येषां' देवानां 'द्वे' द्विप्रमाणे 'स्थितिः' आयुष्कालस्तेषां सप्त 'रत्नयः' हस्ता देहोच्छ्रयः। अयमभिप्रायः— पल्योपमादारभ्य यावद्द्विसागरोपमस्थितिकालः पूर्यते तावत्सप्तैव हस्ता देहमानम्। सप्तैकादशभागा 'रत्नेः' हस्तस्यैकादशभागीकृतस्य हानिः क्रियते तृतीये सागरोपमे, सागरोपमत्रयायुष्काणां देवानां षड् हस्ताश्चत्वारश्चैकादशभागा देहमानमित्यर्थः॥ ३०५॥ अष्टैकादशभागाश्चतुर्थे सागरोपमे नव चैव पञ्चमे हानिर्दश च षष्ठे सागरोपमे षट् चैव च रत्नयः पूर्णाः सप्तमेऽतर इति॥ ३०६॥

यदा तु ब्रह्मलोकलान्तकयोर्देवदेहमानं जिज्ञास्यते तदा सप्तानां चतुर्दशानां च सागरोपमाणामुत्कृष्टस्थितिरूपाणां विशे(श्ले)षो विधीयते, स च सप्त सागरोपमाणि, तस्मादेकं रूपं गृह्यतेऽवशिष्टाः षट्, तच्च रूपमेकादशभिर्भागैर्विभज्यते तदधश्चैकादशच्छेदः। अयं च राशिर्द्विधा स्थाप्यते, यथा—

| | |
|---|---|
| ११ | ११ |
| ११ | ११ |

तत्र षड्रूपो यः शेषराशिः स प्रथमादेकादशराशेः पात्यते ऽवशिष्टाः पञ्चैकादशभागाः $\frac{५}{११}$, एते

चादिसंज्ञा द्वितीयादेकादशांशराशेः पात्यन्ते, अत्र पुनरवशिष्टाः षडेकादशभागाः $\frac{६}{११}$, ततोऽस्य राशेश्छेद एकादशलक्षणः शेषेण षट्करूपेण गुण्यते, ततो जाता षट्षष्टिः $\frac{६}{६६}$, अनयोश्छेदांशयोः षट्केनापवर्तनं क्रियते ततो लब्ध एकादशभागः, [illegible] आदेरनन्तरमेव शेषेण षट्कलक्षणेन सममेकाद्येकोत्तरममुमेव राशिं स्थापयेत्। स्थापना चेयम्—

| | | | | | | |
|---|---|---|---|---|---|---|
| ५ | १ | २ | ३ | ४ | ५ | ६ |
| ११ | ११ | ११ | ११ | ११ | ११ | ११ |

ततः पूर्ववदादिसहितं स्थापयेत्। यथा—

| | | | | | | |
|---|---|---|---|---|---|---|
| ५ | ६ | ७ | ८ | ९ | १० | ११ |
| ११ | ११ | ११ | ११ | ११ | ११ | ११ |

अधस्तनकल्पहस्ताश्चात्र षट्, ते गच्छस्थानसमाः स्थाप्यन्ते, गच्छश्च सप्तरूपः, तेभ्यश्च हस्तेभ्य एको हस्तो गृह्यते, स चैकादशभागीक्रियते, तदनु सप्तसु स्थानेषु स्थाप्यते। स्थापना चेयम्—

| | | | | | | |
|---|---|---|---|---|---|---|
| ५ | ५ | ५ | ५ | ५ | ५ | ५ |
| ११ | ११ | ११ | ११ | ११ | ११ | ११ |
| ५ | ६ | ७ | ८ | ९ | १० | ११ |
| ११ | ११ | ११ | ११ | ११ | ११ | ११ |

तदनु प्राग्निरूपितादिराशिः पञ्चैकादशभागरूपः प्रथमैकादशस्थानात्पात्यते, अन्ये च षडादय एकादशान्ता आदिराशिमिश्रणया ये पूर्वं षड् राशय उत्पादितास्तान् द्वितीयाद्येकादशस्थानेभ्यो यथाक्रमं पातयेत्, ततो यत्तत्रावशिष्यते तत्प्रमाणैकादशांशसमन्विताः पञ्च हस्ता अष्टादिचतुर्दशान्तसागरोपमस्थितीनां देवानां यथाक्रमं शरीरप्रमाणं भवति। स्थापना चेयम्—

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| सागरो० | ८ | ९ | १० | ११ | १२ | १३ | १४ |
| हस्ताः | ५ | ५ | ५ | ५ | ५ | ५ | ५ |
| अंशाः | ६ | ५ | ४ | ३ | २ | १ | ० |
| छेदाः | ११ | ११ | ११ | ११ | ११ | ११ | ० |

एवं चतुर्दशाष्टादशादिसागरोपमलक्षणयोरुत्कृष्टस्थित्योश्चतुष्टयादिलक्षणं विशे(श्ले)षं प्रतीत्य "इच्छियकप्पठिईणं" (गाथा २००)

इत्यादि करणरीतिर्गणितकुशलेनाभ्यूह्य स्वयमेवानुवर्त्तनीया, विस्तरभयाच्च न लिखितेति ॥ अथ सौधर्मेशानकल्पगमेव वक्तव्यान्तरमाह—

**पागारदुवारेसुं, सभासु भवणेसु जं परीमाणं।**
**जं होइ चमरचंचाएँ जं तु वइरोयणसहाए ॥ ३०७ ॥**

प्राकारश्च द्वाराणि च प्राकारद्वाराणि तेषु प्राकारद्वारेषु 'सभासु' सुधर्मासु 'भवनेषु' विमानमध्यप्रासादलक्षणेषु विषये किं प्रमाणमुच्छ्रयाद्यपेक्षया वर्तते? इति शिष्येण पृष्टे सूरिराह—यत्परीमाणं भवति 'चमरचञ्चायां' चमरनामासुरेन्द्रराजधान्यां यत्तु 'वैरोचनसभायां' विशेषेण रोचते शोभत इति विरोचनः स एव वैरोचनः स चेह बलिनामा असुरेन्द्रस्तस्य सभा—निवासो निलय इत्येकोऽर्थः, ततो बलिचञ्चायां राजधान्यामित्यर्थः ॥ ३०७ ॥ तत् किम्? इत्याह—

**तं दुगुणं नायव्वं, सोहम्मीसाणकप्पवासीणं।**
**दो दो वारसहस्सा, एक्काए य बाहाए ॥ ३०८ ॥**

'तत्' प्राकारादिप्रमाणं चमरचञ्चाबलिचञ्चयोः संबन्धि [ द्विगुणं ] 'ज्ञातव्यं' बोद्धव्यं सौधर्मेशानकल्पवासिनां प्राकारद्वारादीनाम्। तथा द्वे द्वे द्वारसहस्रे एकैकस्यां तु 'बाहायां' तथाविधप्राकारभित्तिभागलक्षणायाम्। यत्पुनरत्रैव प्रागभिहितं "सव्वे वट्टविमाणा एगदुवारा भवंति" (गाथा २४८) इत्यादि तदावलिकाप्रविष्टविमानान्येवाश्रित्योक्तमिति संभाव्यते, इदं पुनरावलिकाबाह्यविमानापेक्षयेति ॥ तत्र सर्वविमानेषु प्राकारस्योच्चत्वं त्रीणि योजनशतानि, विस्तारो मूले योजनशतं, मध्ये पञ्चाशत्, सर्वोपरि पञ्चविंशतिः। किमुक्तं भवति?—मूले विस्तीर्णः, मध्ये संक्षिप्तः, उपरि तु तनुतरो गोपुच्छसंस्थानसं-

स्थितः सर्वकनकमयः। स चानेकैः पञ्चवर्णैः कपिशीर्षकैर्योजनायामै-रर्द्धयोजनविस्तृतैः किञ्चिदूनयोजनोच्छ्रितैर्मणिमयैरुपशोभितः। तस्य चैकैकस्यां बाहायामेकैकं द्वारसहस्रं भवति। तानि च द्वाराणि पञ्चयो-जनशतोच्छ्रितानि अर्द्धतृतीययोजनशतविस्तृतानि तावत्प्रमाणप्रवेशानि रत्नकनकमयानि। विमानमध्यभागवर्तिवक्ष्यमाणलक्षणा उपकारिकलयनो-परिप्रासादा पूर्वोत्तरस्यां दिशि योजनशतायामा पञ्चाशद्योजनविस्तृता योजनसप्तत्युच्चा सभा सुधर्माभ्या (ख्या) भवति। उपकारिकलयनमध्ये च मूलप्रासादः पञ्चयोजनशतोच्चः, अर्द्धतृतीययोजनशतविस्तृतः। एत-त्सर्वं राजप्रसेनजिदुपाङ्गे साक्षादेवोपलभ्यते। एतदर्द्धं च सर्वत्र चमर-चञ्चाबलिचञ्चयोर्वाच्यम्। प्रस्तुतसूत्रोक्तं द्वारप्रमाणं सहस्रद्वयलक्षणं मतान्तरसंभाव्यतमिति (मतान्तरं संभावितव्यमिति) ॥२०८॥ तथा—

**सोहम्मे ईसाणे, बोधव्वा ओवगारिया लेण (णा)।**
**एगं तु सयसहस्सा, विक्खंभायामओ भणियं (या) ॥२०९॥**

सौधर्मे ईशाने बोद्धव्यानि 'औपकारिकानि' मूलप्रासादोपकार-प्रयोजनानि लयनानि, किम्? इत्याह—'एकं तु' एकमेव शतसहस्रं 'विष्कम्भायामतः' विष्कम्भेनायामेन च प्रभणितानि तीर्थकरगणधरा-दिभिः। उच्छ्रयश्चैतेषां योजनप्रमाणः शास्त्रान्तरोक्तो द्रष्टव्यः। एतानि च किलोपकारिकलयनानि देवकुलपीठबन्धवन्मूलप्रासादपीठरूपाणि बो-द्धव्यानि। तदुपरि मूलप्रासादाः पञ्चयोजनशतोच्छ्रयाः, तदनु च चतुर्दिशि तत्परिवारभूताश्चत्वारः, तेषामपि पूर्वक्रमेणैव चत्वारश्चत्वार इति षोडश, एषामपि प्रत्येकं प्रत्येकं चत्वार इति चतुःषष्टिः।

---

१ राजप्रश्नीयोपाङ्गे इत्यर्थः।

परं मूलप्रासादापेक्षया अर्द्धार्द्धप्रमाणा आयामविष्कम्भोच्चत्वे द्रष्टव्याः ॥ ३०९ ॥ अथ कल्पेष्वेव वक्तव्यान्तरसूचिकां द्वारगाथामाह—

कप्पाण पइट्ठाणं, संठाणविमाणबाहउच्चत्तं ।
संखेज्जवित्थडा वि य, वण्णे माणे य गंधे य ॥३१०॥

'कल्पानां' सौधर्मादिलक्षणानां प्रतिष्ठन्ति—प्रतिष्ठां लभन्ते विमानान्यस्मिन्निति 'प्रतिष्ठानं' घनोदध्यादि तत्स्वरूपतो वाच्यम् । तथा 'संस्थानविमानाबाधोच्चत्वं' तत्र संस्थानं वृत्तादि, विमानानि विष्कम्भतः परिक्षेपतश्च, बाधा—क्षयस्तद्विपर्ययादबाधा—शाश्वतभाव इत्यर्थः, उच्चत्वं विमानानां तत्पीठानां चोच्चभावो वक्तव्यः । तथा संख्यातविस्तरा अपिचेतिशब्दादसंख्यातविस्तराश्च । तथा 'वर्णः' शुक्लादिः 'मानं' प्रतिष्ठानबाहल्यविमानोच्चत्वसंयोजने 'चः' समुच्चये 'गन्धः' घ्राणेन्द्रियग्राह्यो गुणः, चशब्दात्स्पर्शादिश्च वक्तव्य इति ॥ ३१० ॥ सांप्रतमेतान्येव द्वाराणि व्याचिख्यासुर्गाथादशकमाह—

घणउदहिपइट्ठाणा, दोसादिल्लेसु तिसु य घणवाओ ।
तीसू य तदुभयम्मी, आगासपइट्ठिया सेसा ॥ ३११ ॥

घनः—निबिडः स चासावुदधिश्च—उदकराशिर्घनोदधिः प्रतिष्ठानं—उक्तलक्षणं येषां ते घनोदधिप्रतिष्ठाना विमाना द्वयोरादिमयोः कल्पयोः। तथा 'त्रिषु च' सनत्कुमारमाहेन्द्रब्रह्मलोकलक्षणेषु पुनः 'घनवातः' घनवातप्रतिष्ठिता विमाना इत्यर्थः । 'तीसू य' त्ति त्रिषु लान्तकशुक्रसहस्रारेषु पुनः 'तदुभये' घनोदधिघनवातलक्षणे विमाना वर्तन्ते। 'आकाशप्रतिष्ठिताः' शुद्धाकाशलब्धप्रतिष्ठानाः 'शेषाः' आरणादिदेवलोकविमानाः सन्तीति । उक्तञ्च—"घणउदहिपइट्ठाणा, सुरभवणा

होंति दोसु कप्पेसु। तिसु वायपइट्ठाणा, तदुभयसु पइट्ठिया तीसु ॥ १ ॥ तेण परं उवरिमया, आगासंतरपइट्ठिया सव्वे। एस पइट्ठाण-विही, उड्ढंलोए विमाणाणं ॥ २ ॥" इति ॥ ३११ ॥

ननु तिष्ठत्ता(तिष्ठतु ता)वत्सांप्रतं प्रस्तावप्राप्तमपि संस्थानद्वारम्, एतद्वयं ज्ञातुमिच्छामः—किमेतान्यावलिकाप्रविष्टानि विमानानि पुष्पा-वकीर्णानि च सर्वदेवावासेषु भवन्ति ? उतास्ति कश्चिद्विशेष इति ?, अत्रोच्यते—

**आवलियपविट्ठा बाहिरा य जा उवरिमा उ गेवेज्जा।**
**आवलियपविट्ठा चेवऽणुत्तरा जे विमाणवरा ॥ ३१२ ॥**

'आवलिकाप्रविष्टा बाह्याश्च' प्रतीतरूपा एव विमानाः, किम् ? इत्याह—यावदुपरिमाणि 'तुः' पूरणार्थः ग्रैवेयकाणि, सौधर्मेशाना-भ्यामारभ्य यावदुपरिमाणि ग्रैवेयकाणि तावत्सर्वदेवलोकेष्वावलिकाप्र-विष्टानि तदितराणि च विमानानि सन्तीति भावः। एतच्च प्रायो व्यवहारापेक्षमेव, यतोऽधस्तनग्रैवेयकत्रिके आवलिकाप्रविष्टान्येव विमा-नानि सन्तीति। आवलिकाप्रविष्टाश्चैव 'अणुत्तराः' न विद्यन्ते उत्तराणि—[ प्रधानानि ] वर्णगन्धरसस्पर्शादिभिर्गुणैर्विमानानि येभ्यस्ते तथा 'ये' इति समयप्रसिद्धाः, अत एवाह—'विमानवराः' प्रधानविमानाः सर्वार्थसिद्धप्रस्तटविमाना इति भावः ॥ ३१२ ॥ उक्त-मपि प्राक् सर्वविमानसंस्थानं द्वारगाथोपन्यस्तसंस्थानद्वारानुरोधेनाह—

**तत्थावलियपविट्ठा, वट्टा तंसा तहेव चउरंसा।**
**पुप्फावकिण्णगा पुण, अणेगविहरूवसंठाणा ॥ ३१३ ॥**

व्याख्यातार्थैवेयं गाथा। एतद्द्वारोपन्यासः किमर्थमिह ? इति चेत्,

उच्यते—विस्मृतिशीलशिष्यसंस्मरणार्थमिति ॥ ३१३ ॥ अथ विमानाबाधाद्वारे युगपदेवाह—

विक्खंभपरिक्खेवे, उवमा देवेहिं होइ कायव्वा ।
जीवा य पुग्गला वक्कमंति ते सासयविमाणा ॥ ३१४ ॥

विष्कम्भेण युक्तः परिक्षेपो विष्कम्भपरिक्षेपः—विष्कम्भोपलक्षितः सबाह्याभ्यन्तरः परिधिरित्यर्थः, तत्र वाच्ये 'उपमा' उपमानं 'देवैः' तथाविधचण्डादिगतिचतुष्टयप्रवृत्तैर्भवति कर्त्तव्या । सा च संग्रहणिगाथानुसारेण विज्ञेया—"सीयालीससहस्सा, दो य सया जोयणाण तेसट्ठा । इगवीस सट्ठिभागा, कक्ख(क्क)डमाइम्मि पेच्छ नरा ॥ १ ॥ [अङ्कतोपि ४७२६३ २१/६० ] एयं दुगुणं काउं, गुणिज्जए तिपणसत्तनवएहिं । आगयफलं तु जं तं, कमपरिमाणं वियाणाहि ॥ २ ॥ दो लक्खजोयणाणं, तेसीई सहस्स पंच सय असिया । छ च्चेव सट्ठिभागा, तिहि गुणिए होंति नायव्वा ॥ ३ ॥" अङ्कतोऽपि २८३५८० ६/६०, अयं चण्डायाः क्रमः । "पंचगुणे चउलक्खा, सहस्स बावत्तरी य छ च्च सया । तेत्तीस जोयणाइं, अण्णा तीसं कलाओ य ॥ १ ॥" ४७२६३३ ३०/६०, अयं चपलायाः क्रमः । "छ लक्खिगसट्ठिसहस्सा, छ च्च सया जोयणाण छासीया। चउपण्णं च कलाओ, सत्तहि गुणिए वियाणाहि ॥१॥" ६६१६८६ ५४/६०, अयं जवनायाः क्रमः। "लक्खट्ठ सहस्सा वि य, पण्णासं गुणिएँ नवहिं जाणेज्जा। सत्त सया चत्ताला, अट्ठारस तह कलाओ य ॥ १ ॥" ८५०७४० १८/६०, अयं वेगायाः क्रमः । "एयं कमपरिमाणं, अहाइ छम्मासियं तु कालस्स । आयामपरिहिवित्थर, देवगईहिं मिणेज्जाहि ॥१॥" 'क्रम-

परिमाणं ' ति " क्रमू पादविक्षेपे " इति वचनात् क्रमः–पादविक्षेपलक्षणस्तस्य परिमाणं भवति, इदं क्षेत्रतः क्रमपरिमाणम् । कालतस्तु– ' अहाइ छम्मासियं तु कालस्स ' त्ति दिवसमादिं कृत्वा षण्मासं यावदनेन क्रमेण गमनं तत् षाण्मासिकं क्रमपरिमाणं कालतो भवति । 'आयामपरिहिवित्थर' त्ति आयामः–दैर्घ्यं परिधिः–परिक्षेपः विस्तारः–विष्कम्भस्तान् यथासंभवं ' देवगतिभिः ' चण्डादिकाभिः पूर्वोक्तक्रमपरिमाणयुक्ताभिर्मिमीत इति संवन्धः । " चंडाए विक्कंभो, चवलाए तह य होइ आयामो । अब्भितर जयणाए, बाहिरपरिही उ वेगाए ॥ १ ॥ " मातव्या इति क्रियायोगः । " चत्तारि वि सकमेहिं, चंडाइगईहिँ जंति छम्मासं । तह वि न वि जंति पारं, केसिंचि सुरा विमाणाणं ॥ १ ॥" अत्र चाभ्यन्तरपरिधिर्विमानप्राकारमध्यभागमपेक्ष्य बाह्यपरिधिस्तु विमानपृथ्वीपर्यन्तमपेक्ष्य मन्तव्य इति ॥ तथा 'जीवाः' एकेन्द्रियाः पृथिवीकायिकरूपाः चकारस्य व्यवहितसंबन्धात् 'पुद्गलाश्च' औदारिकादिवर्गणारूपाः ' व्युत्क्रामन्ति ' निरन्तरं विमानतयोत्पद्यन्ते, उपलक्षणाच्च्यवन्ते न तु विमानाकारः । यत एवं ततस्तानि शाश्वतानि विमानानि द्रव्यरूपतया वर्त्तन्त इति ॥ ३१४ ॥ अथोच्चत्वद्वारं गाथाद्वयेनाह—

सोहम्मे ईसाणे, उच्चत्तं पंच जोयणसयाइं ।
सेसाण वि सव्वेसिं, सयपरिवुड्ढीएँ नेयव्वं ॥ ३१५ ॥

' सौधर्मे ईशाने ' सौधर्मेशानयोः कल्पयोरित्यर्थः, उच्चत्वं विमानमध्यवर्तिप्रधानप्रासादानां पञ्च योजनशतानि । शेषाणामपि कल्पानां सर्वेषां शतपरिवृद्धयोच्चत्वं नेतव्यमिति ॥ ३१५ ॥

सोहम्मीसाणेसुं, विमाणपुढवीण होइ बाहल्लं ।
सत्तावीस सयाइं, सयपरिहीणा य सेसेसुं ॥ ३१६ ॥

सौधर्मेशानयोः 'विमानपृथ्वीनां' घनोदधिलक्षणा (ण) प्रतिष्ठानोपरिभागगतानां विमानपीठबन्धरूपाणां भवति 'बाहल्यं' पिण्डः, कियत्संख्यम् ? इत्याह—सप्तविंशतिशतानि । शतपरिहीणाश्च विमानपृथिव्यः 'शेषेषु' देवलोकेषु ॥ ३१६ ॥

अयमस्य गाथाद्वयस्याभिप्रायः—प्रथमकल्पद्वये पञ्चशतोच्छ्रयाः प्रासादाः, सप्तविंशतिशतानि च बाहल्यतो विमानपृथिव्यः । सनत्कुमारमाहेन्द्रयोस्तु षट्शतान्युच्छ्रयो विमानानाम्, षड्विंशतिशतानि च पृथ्वीबाहल्यम् । एवं ब्रह्मलोकलान्तकयोः सप्तशतानि विमानोच्छ्रयः पञ्चविंशतिशतानि च पृथ्वीबाहल्यम् । एवमेकैकशतवृद्धो विमानोच्छ्रयः एकैकशतहीनं च पृथ्वीबाहल्यं तावद्वाच्यं यावत्सर्वार्थसिद्धप्रस्तटे एकादशशतानि विमानोच्छ्रयः, एकविंशति [ शतानि ] च पृथ्वीबाहल्यम् । उभयमीलने च सर्वत्र द्वात्रिंशत्संपद्यत इति ॥ अधुना संख्यातासंख्यातविस्तरद्वारम्—

सव्वे वि विमाणा खलु, संखमसंखेज्जवित्थडा होंति ।
नवरं अणुत्तरेसुं, एगे संखेज्जविच्छिन्ने ॥ ३१७ ॥

सर्वेऽपि विमानाः 'खलुः' वाक्यालङ्कारे 'संखमसंखेज्जवित्थड' त्ति केचित्संख्येयविस्तराः केचिदसंख्येयविस्तराः सर्वप्रस्तटेषु भवन्ति । नवरं 'अनुत्तरेषु' पञ्चसु विमानेषु मध्ये 'एकः' सर्वार्थसिद्धविमानः 'संख्येयविस्तीर्णः' लक्षयोजनप्रमाणविस्तारः । शेषास्तु चत्वारः सामर्थ्यादसंख्येययोजनविस्तारा इति ॥ ३१७ ॥ अथ वर्णद्वारम्—

पढमेसु पंचवरणा, एक्कगहाणी उ जा सहस्सारो ।
दो दो कप्पा तुल्ला, तेण परं पोंडरीयाइं ॥ ३१८ ॥

प्रथमयोर्द्वयोर्देवलोकयोः पञ्च—कृष्णनीलरक्तलोहित[1]शुक्ललक्षणाः वर्णाः—चक्षुरिन्द्रियग्राह्या गुणविशेषा येषां ते पञ्चवर्णा विमाना वर्तन्ते । तदुपरि का वार्त्ता? इत्याह—'एकैकहानिस्तु' एकैकवर्णहानिः पुनर्वक्तव्या, कियद्दूरं यावद्? इत्याह—यावत् 'सहस्रारः' अष्टमः कल्पः; आह किं प्रतिकल्पमेकैकवर्णहानिः ? उत कथञ्चिदन्यथा ?, अन्यथेति ब्रूमः । कुतः ? यतः—'द्वौ द्वौ' सनत्कुमारमाहेन्द्रादिलक्षणौ 'तुल्यौ' सदृशवर्णतया समानौ कल्पौ वर्त्तेते । एतदुक्तं भवति—सनत्कुमारमाहेन्द्रयोश्चतुर्वर्णाः, ब्रह्मलोकलान्तकयोस्त्रिवर्णाः, शुक्रसहस्रारयोर्द्विवर्णा विमाना भवन्ति । तदुपरि विधिमाह—'तेन' इति ततः—सहस्रारात् 'परं' अग्रत आनतप्रभृतिसर्वार्थसिद्धपर्यन्तानि 'पुण्डरीकाणि' धवलानि शङ्खेन्दुकुन्दतुषारहारसमवर्णानीति भावः ॥ ३१८ ॥ संप्रति मानद्वारम्—

होइ पमाणं सव्वेसु चेव बत्तीस जोयणसयाइं ।
सोहम्मादीयाणं, बाहल्लुच्चत्तसहियाणं ॥ ३१९ ॥

भवति प्रमाणं सर्वेषु चैव विमानेषु द्वात्रिंशद्योजनशतानि, केषाम् ? इत्याह—'सौधर्मादीनां' [ सौधर्म ] देवलोकादीनां 'बाहल्योच्चत्वसहितानां' योजितपीठबाहल्यप्रसादोच्छ्रयाणामिति ॥ ३१९ ॥ इदानीं गन्धद्वारं चशब्दाक्षिप्त ( प्तानि ) द्वारान्तराणि चाह—

---

१ अत्र "लोहित" स्थाने "हारिद्र" इति भाव्यम् ।

अच्चंतसुरहिगंधा, फासे नवणीयमउयसुहफासा ।
निच्चुज्जोया रम्मा, सयंपभा ते विरायंति ॥ ३२० ॥

अत्यन्तं—अतिशयेन सुरभिः—मृगमदघनसारागुरुप्रभृतिसुगन्धिद्रव्य-कलापोपमानो गन्धो येषां तेऽत्यन्तसुरभिगन्धाः, 'स्पर्शे' स्पर्शविषये नवनीतवन्मृदुकः शुभः स्पर्शो येषां ते नवनीतमृदुकशुभस्पर्शाः, तथा 'नित्योद्द्योताः' शशाङ्कार्कादिबिम्बवन्निरन्तरस्फुरत्तारतेजःपुञ्जप्रकाशितदिक्चक्राः, अत एव 'रम्याः' रमणीयाः 'स्वयम्प्रभाः' स्वयं—आत्मनैवान्यनिरपेक्षा प्रभा—प्रभावो येषां ते तथा 'ते' विमानाः 'विराजन्ते' चकासतीति ॥ ३२० ॥ इत्थं विमानस्वरूपगतां द्वारगाथामुपन्यस्य व्याख्याय चेदानीं तद्गतदेववक्तव्यताप्रतिबद्धां द्वारगाथामाह—

उववायपरीमाणं, अवहारुच्चत्तमेव संघयणं ।
संठाणगंधफासे, ऊसासो चेव आहारो ॥ ३२१ ॥

उपपातेन सह परीमाणं, कुतो देवा उत्पद्यन्ते ? किञ्च तेषां परिमाणम् ? इत्येवंलक्षणम् । अपहारश्चोच्चत्वं चापहारोच्चत्वम्, 'एवः' समुच्चये । तत्रापहारो नाम वर्तमानसमयदेवलोकदेवानां समयापहारेणापहारकालः । 'उच्चत्वं' शरीरप्रमाणम् । 'संहननं' अस्थिसञ्चयविशेषः । संस्थानं च गन्धश्च स्पर्शश्च संस्थानगन्धस्पर्शाः । उच्छ्वासः 'चैव' इति भिन्न[illegible]तत आहारश्चैव वाच्य इति ॥३२१॥ एनामेव द्वारगाथां व्याचिख्यासुर्गाथाचतुर्दशकमाह—

सोहम्मीसाणेसुं, उववाओ अकम्मकम्मभूमीणं ।
पंचिंदियतिरियनरेहिं कम्मभोमेहिं सेसाणं ॥ ३२२ ॥

सौधर्मेशानयोः कल्पयोः 'उपपातः' उत्पत्तिः कुतः सकाशात्? इत्याह—कर्म—कृष्यादि मोक्षसाधकं वा सम्यग्ज्ञानदर्शनचारित्राराधनरूपं तत्प्रतिषेधादकर्म, कर्म चोक्तलक्षणमेव, ततोऽकर्मणः कर्मणश्च योग्या भूमयोऽकर्मकर्मभूमयः। तत्र त्रिंशद्देवकुर्वादिका अकर्मभूमयः, पञ्चदश भरताद्याः कर्मभूमयः, तासां संबन्धिभ्यः पञ्चेन्द्रियतिर्यग्नरेभ्यः संज्ञितिर्यग्भ्यो नरेभ्यश्चेत्यर्थः। शेषकल्पनिर्द्धारणार्थमाह—कर्मप्रधाना भूमिः—जन्मक्षेत्रं येषां ते कर्मभूमास्तेभ्यः पञ्चेन्द्रियतिर्यग्नरेभ्य एव सकाशादुत्पत्तिः 'शेषाणां' इति विभक्तिव्यत्ययात् शेषेषु—सनत्कुमारादिदेवलोकेष्विति ॥ ३२२ ॥ तथापि विशेषमाह—

**पंचेंदियतिरियाणं, उववाओ होइ जा सहस्सारो।**
**सेसाण सुरगणाणं, होइ मणुस्सेहिं उववाओ ॥ ३२३ ॥**

'पञ्चेन्द्रियतिरश्चां' संज्ञिरूपाणामुपपातो यावद्भवेत् सहस्रारः, सहस्रारं यावदित्यर्थः। 'शेषाणां' आनतप्राणतादिसंबन्धिनां सुरगणानां भवति मनुष्येभ्य उपपात इति ॥ ३२३ ॥

**संजयमीसगअस्संजयाण उववाओ अच्चुओ जाव।**
**गेवेज्ज मीसरहिया, तेण परं संजया चेव ॥ ३२४ ॥**

संयतमिश्रकाऽसंयतानामुपपातः 'अच्चुतो यावत्' अच्युतं यावदित्यर्थः। तत्र संयताः—सर्वथा षड्जीवनिकायवधव्यावृत्ताः ब्रह्मचारिणो निगृहीतेन्द्रियकषायाः सम्यक्प्रत्युपेक्षणाद्यनुष्ठानपरायणाः प्रमत्ताद्याः प्राणिविशेषाः। मिश्रकाः—संयमानुष्ठानान्मिश्रभावमापन्ना देशविरता इति यावत्। असंयताः—देशसर्वसंयमशून्या मिथ्यादृष्ट्याद-योऽविरतसम्यग्दृष्टिपर्यन्ताः, परं सम्यग्मिथ्यादृष्टिवर्जा इह गृह्यन्ते,

" न सम्ममिच्छो कुणइ कालं " इति वचनात् तेषां क्वचिदप्युपपाताभावात् । ' गेवेज्ज ' त्ति ग्रैवेयकेषु ' मिश्ररहिताः ' असंयताः संयताश्चेत्यर्थः । तत्रासंयता ये खलु ऋद्धिपूजायशस्कामा नैर्ग्रन्थं लिङ्गमापन्ना आरब्धपरिपूर्णयतियोग्यक्रियाकाण्डा अन्तरङ्गभावशून्यास्त एव गृह्यन्ते । यथोक्तम्–" जे दंसणवावन्ना, लिंगग्गहणं करेंति सामन्ने । तेसिं पि य उववाओ, उक्कोसा जाव गेवेज्जा ॥ १ ॥ " ' तेन परं ' इति ततः–ग्रैवेयकेभ्योऽग्रे संयताश्चैवोत्पद्यन्ते, नासंयता नापि संयतासंयता इति ॥ ३२४ ॥ अथ परिमाणद्वारम्—

उक्कोसेण असंखा, उववज्जंती जहन्नएगो ।
जा सहसारो कप्पो, तेण परं जाण संखेज्जा ॥ ३२५ ॥

' उत्कर्षेण ' प्रकर्षवृत्त्या असंख्याः ' उपपद्यन्ते ' जायन्ते देवतया तिर्यग्मनुष्या एकसमयेन । जघन्येन ' एकः ' तिर्यगादिः, कियद्दूरमयं व्यवहारः ? इत्याह—यावत्सहस्रारः कल्पः । ' तेन परं ' सहस्रारात्कल्पादूर्ध्वं जानीहि यथा संख्येया एवोत्पद्यन्ते, यतः संज्ञिमनुष्याणामेव तत्रोत्पत्तिस्तेषां च प्रकृत्यैव संख्यातरूपत्वादिति ॥ ३२५ ॥ संप्रत्यपहारद्वारम्—

ओसप्पिणिउस्सप्पिणि, संखाईयाहिँ जा सहस्सारो ।
तेण परं अवहारो, पलियअसंखेज्जभागेणं ॥ ३२६ ॥

अवसर्पिण्युत्सर्पिणीभिः विभक्तिलोपश्च प्राकृतत्वात्, संख्यातीताभिरपहार इत्युत्तरेण योगः, यावत्सहस्रारः, प्रतिसमयापहारेण तत्रोत्पन्नोत्पद्यमानदेवानामपह्रियमाणानामसंख्यातावसर्पिण्युत्सर्पिणीसमयैः सर्वापहारो भवतीति भावः । ' तेन परं ' आनतादिकल्पेष्वपहारः

'पल्याऽसंख्येयभागेन' अद्धापल्योपमस्यासंख्येयतमांशेन। अयमत्र भावः—असंख्यातासूत्सर्पिण्यवसर्पिणीषु यावन्तः समयास्तावन्तः सौधर्मादिषु सहस्रारान्तेषु कल्पेषु प्रत्येकं समुदायेन च प्रागुत्पन्नोत्पद्यमानका देवा लभ्यन्ते। पल्योपमासंख्येयभागसमयप्रमाणाश्चानतादिषु सर्वार्थसिद्धबहिर्वर्तिविमानपर्यन्तेष्विति ॥ ३२६ ॥ अधुनोच्चत्वद्वारम्—

सोहम्मे ईसाणे, उच्चत्तं होइ सत्त रयणीओ।
एक्केकहाणि सेसे, दुदुगे य दुगे चउक्के य ॥ ३२७ ॥
गेवेज्जेसुं दोरयणी, एक्का रयणी अणुत्तरेसुं तु।
भवधारणिज्ज एसा, उक्कोसा होंति णायव्वा ॥ ३२८ ॥

सौधर्मे ईशाने 'उच्चत्वं' शरीरोच्छ्रयो भवतीति देवानाम्, कियान्? इत्याह—सप्त 'रत्नयः' हस्ताः, उत्सेधाङ्गुलापेक्षमेतत्, "उस्सेहपमाणओ मिणसु देहं" इति वचनात्। शेषदेवस्थानदेहोच्छ्रयसिद्ध्यर्थमाह—'एकैकहानिः' एकैकस्य हस्तस्य परिहाणिः कर्त्तव्या, क्व? इत्याह—'सेसे' त्ति वचनव्यत्ययात् 'शेषेषु' सनत्कुमारादिषु। कथम्? इत्याह—द्विके द्विके चकारस्य भिन्नक्रमत्वाद्द्विके च चतुष्के च। अयमत्र भावः—सौधर्मेशानयोः सप्त हस्ताः, सनत्कुमारमाहेन्द्रयोः षट्, ब्रह्मलोकलान्तकयोः पञ्च, शुक्रसहस्रारयोश्चत्वारः, आनतप्राणतारणाच्युतेषु त्रय इति ॥ ३२७ ॥ ग्रैवेयकेषु सर्वेष्वपि द्वौ। एको रत्निरनुत्तरेषु, लिङ्गव्यत्ययः प्राकृतत्वात्। 'तुः' पुनरर्थः। 'भवधारणीया' भवं यावद्धार्यते या सा भवधारणीया—स्वाभाविकी 'एषा' सप्तहस्तादिका देहावगाहना उत्कृष्टा भवति ज्ञातव्येति ॥ ३२८ ॥ अथैतेषामेव जघन्यामवगाहनामाह—

अंगुलभागमसंखो, सुराण ओगाहणा जहएणा उ।
सव्वेसु सयसहस्सं, उत्तरवेउव्वि उक्कोसा ॥ ३२९ ॥

अङ्गुलभागः 'असंख्यः' असंख्येयः 'सुराणां' देवानामवगाहना 'जघन्या' सर्वतुच्छा, 'तुः' पूर्ववत्, इयं चोत्पत्तिकाले भवति। कृतोत्तरवैक्रियाणां पुनरियमेवान्यथेत्याह—'सर्वेषु' देवस्थानेषु 'शतसहस्रं' योजनलक्षं यावदुत्तरवैक्रियोत्कृष्टावगाहना भवति। उत्तरवैक्रियजघन्या त्वङ्गुलसंख्येयभागप्रमाणैव, पर्याप्तत्वेन तस्य तथाविधजीवप्रदेशसंकोचाभावादिति ॥ ३२९ ॥ [ अथ संहनन ] द्वारम्—

संघयणेण सुरगणा, असंघयणी महाबला सूरा।
सोमा महाणुभावा, अणिंदियगुणा विरायंति ॥ ३३० ॥

'संहननेन' तथाविधास्थिसंचयरूपेण चिन्त्यमानाः 'सुरगणाः' देवसङ्घाताः, किम्? इत्याह—'असंहनिनः' वज्रर्षभनाराचादिसंहननविकलाः, वैक्रियशरीरत्वेन तस्य तथाविधास्थिसंचयस्य तेष्वभावात्। यत उक्तम्—"नेवऽट्ठी नेव सिरा, देवाण सरीरसंघाए।" 'महाबलाः' प्रकृत्यैव संहननसाध्यबलातिरेकवन्तः 'शूराः' संग्रामपटुसुभटवद्भयवर्जिताः 'सौम्याः' स्तिमितप्रकृतयः 'महानुभावाः' अचिन्त्यशक्तितयाऽशिवाद्युपद्रवव्रातव्यावृत्तिकराः 'अनिन्दितगुणाः' अगर्हणीयलावण्यादिगुणग्रामवन्तः सन्तः 'विराजन्ते' बभवति (प्रभवन्ति)। महर्द्धिकदेवापेक्षमेतत्, अन्येषु महाबलत्वादिविशेषणानां सम्यगनुपपद्यमानत्वादिति ॥ ३३० ॥ अथ संस्थानद्वारम्—

सव्वेसिं संठाणं, समचउरंसं महग्घमाहप्पं।
उत्तरविउव्वियं पुण, नाणाविहरूवसंठाणं ॥ ३३१ ॥

'सर्वेषां' जघन्यमध्यमोत्कृष्टभेदभाजां भवनपत्यादिभेदभाजां वा 'संस्थानं' शरीराकारः समाः—शरीरलक्षणानुवर्तनेनाविषमाश्चतस्रोऽस्रयः—देहपार्श्वलक्षणा यत्र तत्समचतुरस्रम्, महान् अर्घः—विशिष्टार्थसाधकत्वसंभावनालक्षणो यस्य तत्तथा तादृग्माहात्म्यं यस्य तन्महार्घमाहात्म्यम्। भवधारणीयशरीरापेक्षमेतत्। उत्तरवैक्रियं पुनः शरीरं नानाविधरूपाणि—समचतुरस्रन्यग्रोधपरिमण्डलादीनि संस्थानानि यत्र तत्, नानाविधरूपसंस्थानत्वादस्येति ॥३३१॥ संप्रति गन्धद्वारम्—

गंधेण सुरहिगंधा, सुहफासा विम्हयं जणंतहियं।
सिबलिरूयब्भहिया, अणोवमा अरयलंबिच्छा ॥ ३३२ ॥

'गन्धेन' घ्राणेन्द्रियग्राह्यगुणलक्षणेन यदा पर्यालोच्यन्ते तदा किम्? इत्याह—'सुरभिगन्धाः' मृगमदकर्पूरागुरुप्रभृ[त्य]तिशायिदेहसौगन्ध्यभाजः। अथ स्पर्शद्वारम्—सुखहेतुत्वात्सुखः शुभो वा स्पर्शः शरीरप्रभवो येषां ते सुखस्पर्शाः, 'विस्मयं' अहो! किमेतदिति चित्तचमत्कारलक्षणं 'जनयन्ति' वितन्वते 'अधिकं' शेषशुभभावजनितविस्मयापेक्षातिरिक्तं दृष्टाः सन्तः, पुनः स्पर्शमेव व्यनक्ति—'शाल्मलीरूताभ्यधिकाः' शाल्मलेर्वृक्षस्य यद् रूतं अर्कतूलादिभ्योऽपि सुकुमालप्रकृति ततोऽभ्यधिकसौकुमार्यायाः, 'अनुपमाः' रूपलावण्यादिगुणविषयेणाऽप्युपमातुमशक्याः। वर्णकप्रस्तावादपरमप्याह—'अरयलंबिच्छ' त्ति अरजसः—शरीरवस्त्रादिषु मललक्षणरजोरहिताः, अलम्बेच्छाः—संपन्नसर्वेन्द्रियार्थतया प्रकृतिपुरुषतया चाविद्यमानतथाविधाकाङ्क्षाः। एतदपि महर्द्धिकदेवापेक्षं प्रायेणेति ॥ ३३२ ॥ इदानीमुच्छ्वासाहारद्वारे युगपदेवाह—

जइ जस्सयराइँ ठिदी, तदि मासद्धेहि तस्स उस्सासो।
तदि वाससहस्सेहि य, आहारो उवरिमसुराणं॥ ३३३॥

'जइ' त्ति यावन्ति यस्य 'अतराणि' सागरोपमा[णि] स्थितिः 'तइ' त्ति तावद्भिः 'मासार्द्धैः' पञ्चदशदिनरूपैः 'तस्य' देवस्य 'उच्छ्वासः' इति उच्छ्वासनिःश्वासौ प्रवर्त्तेते। तथा 'तइ' त्ति तावद्भिः स्वस्थितिसागरोपमप्रमाणैर्वर्षसहस्रैः 'च:' पुनरर्थः 'आहारः' मानसाभ्यवहारलक्षणः संपद्यते। केषाम्? इत्याह—'उवरिमसुराणं' ति उपरितनसुराणां सौधर्मादिवास्तव्यदेवानाम्। प्रायःपक्षापेक्षमेतत्, अन्यथा चमरबल्योरप्येकसागरोपमसाधिकसागरोपमस्थिततया पक्षेणोच्छ्वासो वर्षसहस्रेण चाहारः प्रवर्तते। सागरोपमाधःस्थितीनां तु देवानामाभ्यां गाथाभ्यामाहारोच्छ्वासविधिर्विज्ञेयः—"दसवाससहस्साइं, जहण्णमाउं धरन्ति जे देवा। तेसिं चउत्थाहारो, सत्तहिँ थोवेहिँ उस्सासो॥ १॥ दसवाससहस्साई, समयाई जाव सागरं ऊणं। दिवसमुहुत्तपुहुत्ता, आहारूसास सेसाणं॥ २॥" इति॥ ३३३॥

अथ वक्तव्यान्तरविवक्षया द्वारगाथामाह—

लेस्सा दिट्ठी नाणे, उवओगे चेव होइ जोगे य।
तत्तो य समुग्घाओ, विउव्वणा साय इड्ढी य॥ ३३४॥

'लेश्या' तेजोलेश्यादिका 'दृष्टिः' मिथ्यादृष्ट्यादिका 'ज्ञानं' मत्यादिकं 'उपयोगश्चैव' साकारानाकारभेदो भवति वक्तव्यः। 'योगश्च' मनोवाक्काययोगादिः 'ततश्च' तदनन्तरं 'समुद्घातः' वैक्रियसमुद्घातः 'विकुर्वणा' वैक्रियकरणशक्तिप्रमाणं 'सातं' सुखं 'ऋद्धिश्च' परिवारादिकेति॥३३४॥ अथैनामेव द्वारगाथां गाथादशकेन व्याचष्टे—

दोसुं तु तेउलेसा, तीसु य कप्पेसु पम्हलेसागा ।
तेण पर सुक्कलेसा, देवा सव्वे वि विण्णेया ॥ ३३५ ॥

'द्वयोः' कल्पयोः सौधर्मेशानयोः 'तुः' पूर्ववत् तेजोलेश्या देवानाम् । 'त्रिषु च कल्पेषु' सनत्कुमारमाहेन्द्रब्रह्मलोकलक्षणेषु 'पद्मलेश्याकाः' पद्मकेसरवल्लेश्या येषां ते तथा । 'तेण पर' त्ति ततः परं शुक्ललेश्या देवाः 'सर्वेऽपि' इन्द्रसामानिकत्रायस्त्रिंशलोकपालादयो विज्ञेया इति । लेश्या नाम लिश्यते–श्लिष्यते आभिर्जीवः कर्म्मणेति लेश्याः, ताश्च द्रव्यभावभेदाद्विभेदाः । तत्र द्रव्यलेश्या–यानि किल द्रव्याण्याश्रित्य जीवस्य स्फटिकमणेरिव कृष्णादिभावलेश्यापरिणामः प्रवर्त्तते तानि द्रव्यतो भिद्यमानानि द्रव्यलेश्या इति । तत्र भ्रमराङ्गारकाककोकिलादिसमानवर्णा कृष्णलेश्या । शेषास्तु नीली–कपोती–तैजसी–पद्मा–शुक्लाभिधाना लेश्या यथाक्रमं कदलीदल–कपोतच्छद–जपाकुसुम–कमलकेशर–हंससदृशप्रकाशा विज्ञेया इति । यथोक्तम्—"किण्हा भमरसवण्णा, नीला पुण गवलगुलियसंकासा । काऊ कवोयवण्णा, तेऊ तवणिज्जवण्णाभा ॥ १ ॥ पम्हा पउमसवण्णा, सुक्का पुण कुसुमकाससंकासा ।" इति । भावलेश्या पुनर्मिथ्यात्वासंयमकषायानुरक्तयोगः प्रवृत्तिरूपः कर्मपुद्गलादानहेतुर्द्रव्यलेश्याजनितो जीवपरिणामः । एताश्च द्रव्यलेश्या इहाधिक्रियन्ते न पुनर्भावलेश्याः । यथोक्तम्—"देवाण नारयाण य, दव्वल्लेस्सा हवंति एयाओ । भावपरावत्तीए, सुरनेरइया उ छल्लेसा ॥ १ ॥" इति ॥ ३३५ ॥ अथ दृष्टिद्वारम्—

मिच्छा सम्मामिच्छा, सम्मद्दिट्ठी य तिण्णि दिट्ठीओ ।
देवेसु मुणेयव्वा, नाणं तु अओ परं वोच्छं ॥ ३३६ ॥

'मिथ्या' मिथ्यात्वलक्षणा 'सम्यग्मिथ्या' मिश्ररूपा 'सम्यग्दृष्टिश्च' सम्यग्लु(क्त्वल)क्षणा इत्येतास्तिस्रो दृष्टयः 'देवेषु' सौधर्मादिदेवलोकगतेषु मुणितव्याः। ज्ञानद्वारमुपक्षेप्तुमाह—ज्ञानं 'तुः' विशेषणार्थः अतः परं वक्ष्य इति ॥ ३३६ ॥

**नाणी अन्नाणी वि य, सव्वे वि सुरा उ जाव गेवेज्जा।**
**उवओगो पुण दुविहो, सागारो चेवऽनागारो ॥ ३३७ ॥**

'ज्ञानिनः' मतिश्रुतावधिरूपबोधत्रयभाजः 'अज्ञानिनोऽपि च' मत्यज्ञानश्रुताज्ञानविभङ्गलक्षणाज्ञानवन्तश्च सर्वेऽपि सुराः 'तुः' पूरणार्थे यावद् ग्रैवेयकाणि। उपयोगः पुनर्द्विविधः सर्वदेवेषु 'साकारः' [सामान्यविशेषस्वभावे वस्तुनि] विशेषग्रहणरूपः, 'चैव' इति भिन्नक्रमे, ततः 'अनाकारश्चैव' सामान्यविशेषस्वभावे वस्तुनि सामान्यांशग्रहणरूप इति ॥ ३३७ ॥ इदानीं योगद्वारम्—

**तिविहो य होइ जोगो, मणवइकाएण जो (सो) मुणेयव्वो।**
**तिण्णेव य नाणाइं, अणुत्तरविमाणवासीणं ॥ ३३८ ॥**

त्रिविधश्च भवति, कः? इत्याह—'योगः' जीवपरिस्पन्दात्मको व्यापारः। त्रैविध्यमेव भावयति—'मनोवाक्कायेन' इति मनसा वैक्रियशरीरप्रयत्नाहृतमनोवर्गणान्तर्गतमनोद्रव्यसमूहलक्षणेन, एवं वचसा, नवरं भाषावर्गणान्तर्गतवाग्द्रव्यसमूहमयेन, कायेन वैक्रियवर्गणारब्धदेहलक्षणेन। एष योगो यथाक्रमं चिन्ताभाषागमनागमनादिक्रियाफलो देवान् (देवानाम्) [मुणितव्यः]। उक्तं च—"मणसा वयसा काएण वा वि जुत्तस्स विरियपरिणामो। जीवस्स अप्पणिज्जो, स जोगसन्नो जिणक्खाओ ॥ १ ॥" अथ प्रागुक्तज्ञानद्वारमेवाधिकृत्य किञ्चिदाह—

त्रीण्येव च ज्ञानानि न पुनरज्ञानान्यपि अनुत्तरविमानवासिनाम्, पवित्रसम्यग्दर्शनज्ञानचारित्रपात्राणामेव जन्तूनां तत्रोत्पादादिति ॥ ३३८ ॥

अथात्रैव जघन्यमुत्कृष्टं चावधिं देवेषु प्रतिपादयन् गाथाचतुष्टयमाह—

**सव्वेसु जहन्नोही, अंगुलभागो भवे असंखेज्जो ।**
**उड्ढं सगा विमाणा, तिरियं दीवोदधिमसंखा ॥ ३३६ ॥**

'सर्वेषु' सौधर्मादिषु देवस्थानेषु जघन्योऽवधिः, कियान्? इत्याह—अङ्गुलभागो भवेदसंख्येयः, विषय[विषयि]णोरभेदोपचारादेतदुक्तम्, अन्यथाऽङ्गुलाऽसंख्येयभागमात्रक्षेत्रव्यवस्थितमूर्त्तद्रव्यराशिस्तस्य विषयो वर्तत इति वक्तुमुचितम्। क्षेत्रप्रस्तावात्प्रमाणाङ्गुलमेतदित्येके व्याचक्षते। अन्ये त्ववधेः शरीरावस्थितत्वात् शरीरस्य चोत्सेधाङ्गुलेनैव प्रतीयमानत्वात् तदपेक्षयैवावधिविषयक्षेत्रप्रमाणमद इति ब्रुवते । एतच्चोत्पत्तिकाल एवापर्याप्तावस्थायां मन्तव्यम् । उत्कृष्टतस्तूर्ध्वं 'स्वकाद्विमानात्' स्वकविमानाग्रभागं यावदित्यर्थः । 'तिर्यग्' इति तिर्यक्क्षेत्रं द्वीपोदधयोऽसंख्येयाः अवधेर्विषयः, परमुपर्युपरिवर्त्तिनो देवास्तानेव बहुबहुतरान् पश्यन्तीति ॥ ३३९ ॥ अधश्च—

**सक्कीसाणा पढमं, दोच्चं च सणंकुमारमाहिंदा ।**
**तच्चं च बंभलंतग, सुक्कसहस्सारग चउत्थीं ॥ ३४० ॥**

'शक्रेशानौ' इन्द्रौ उपलक्षणत्वादिन्द्रसामानिका अपि 'प्रथमां' रत्नप्रभां यावत्पश्यन्तीत्युत्तरेण योगः । 'द्वितीयां च' शर्कराप्रभां पुनर्यावत्सनत्कुमारमाहेन्द्राविन्द्रौ। तृतीयां च [पृथ्वीं] ब्रह्मलान्तकौ । शुक्रसहस्रारौ चतुर्थीं पृथ्वीं यावदिति ॥ ३४० ॥

**आणयपाणयकप्पे, देवा पासंति पंचमिं पुढविं ।**
**तं चेव आरणच्चुय, ओहीनाणेण पासंति ॥ ३४१ ॥**

आनतप्राणतकल्पयोः वचनव्यत्ययश्च प्राकृतत्वात् ये 'देवाः' इन्द्रतत्सामानिकरूपास्ते पश्यन्ति पञ्चमीं पृथ्वीम्। 'तां चैव' पञ्चमी-मारणाच्युतयोर्देवा अवधिज्ञानेन पश्यन्ति परं विशुद्धतरामिति॥३४१॥

छट्ठिं हेट्ठिममज्झिमगेवेज्जा सत्तमिं च उवरिल्ला।
संभिन्नलोगनालिं, पासंति अणुत्तरा देवा॥ ३४२॥

षष्ठीं पृथ्वीं यावदधस्तनमध्यमग्रैवेयकाः, 'तत्स्था( तात्स्थ्या )त्त-द्व्यपदेशः' इतिन्यायात् तद्गता देवाः। सप्तमीं च पृथ्वीं 'उपरि-तनाः' उपरितनग्रैवेयकत्रयगताः। संभिन्नां–किञ्चिदूनां लोकनालीं–त्रस-नाडीरूपामूर्ध्वमधस्तिर्यक् च पश्यन्त्यनुत्तरा देवा इति॥३४२॥ अथ समुद्घातवैक्रियद्वारे सममेवाह—

वेउव्विसमुग्घाओ, जाव उ कप्पोवगा भवे देवा।
एक्केक्का य असंखे, विउव्वए पुरिसथीरूवे॥ ३४३॥

वैक्रियशरीराय सम्–एकीभावेन उत्–प्राबल्येन घातः–जीवप्रदे-शानां बहिः क्षेपो वैक्रियसमुद्घातः, कियद्दूरम्? इत्याह–यावत्तु 'कल्पोपगाः' भवनपत्यादयोऽच्युतावसाना भवेयुर्देवास्तावदेव। 'एकै-कश्च' इन्द्रतत्सामानिकादिर्देवोऽसंख्येयानि विकुरुते स्त्रीपुरुषरूपाणि यौगपद्येनैव, शक्तिरेवैषा एतेषां न पुनः क्रियापि। यथोक्तं भगवत्यां (शतक३ उद्दे० १) एवमर्थतः–"शक्रो भदन्त! देवेन्द्रो देवराजः कियन्ति रूपाणि प्रभुर्विकर्तुम्" इति गौतमेन पृष्टे भगवानुवाच—"यथा कश्चिद्युवा युवतिः ( तिं ) निबिडकरशालाग्रहणवता हस्तेन हस्ते गृह्णीयात्, चक्रस्य वा नाभिरायोजितारकसंचया सती निबिडं रूप-माविभर्ति यथा, एवमेव प्रथमप्रवृत्तावपि जम्बूद्वीपद्वयप्रमाणं क्षेत्रं बहु-

भिर्देवरूपैर्देवीरूपैश्चात्यन्तं पूरितं कर्तुं समर्थः। अथोत्तरं च गौतम! असंख्येयानपि द्वीपसमुद्रांस्तैरेवाकीर्णान् कर्तुं समर्थः। एवं तत्सामानिका अपि प्रागभिहितशक्तियुक्ताः। यथा सौधर्मे तथा शेषेष्वपि यावदच्युतकल्पस्तावद्वैक्रियशक्तिव्यापारमुपर्युपर्यधिकाधिकतराधिकतमा वेति। एतच्च गौतम! शक्तिविषयमात्रमुक्तम्, न पुनः कश्चिद्देवो देवी वा विकृतवान् विकुरुते विकरिष्यते च" इति। ये च ग्रैवेयकप्रश्चानुत्तरदेवा न ते वैक्रियसमुद्घातमारभन्ते, तेषां स्वस्थप्रकृतितया वैक्रियशरीरसाध्यप्रयोजनाभावादिति ॥ ३४३ ॥ अथ सातद्वारमाह—

सायं सुहं महंतं, इड्ढीएँ महिड्ढिया भवे तिविहा।
थोवा मज्झुक्कोसा, कप्पाईया य (उ) अहमिंदा ॥ ३४४ ॥

सत्—सुन्दरं तदेव स्वार्थिकाणप्रत्ययोपादानात्सातम्, किम्? इत्याह—'सुखं' शर्म 'महत्' मनुष्यसुखापेक्षयाऽतीवप्रकर्षवत्, जरारोगशीतवाताद्युपद्रवव्रातविकलत्वात्तेषाम्। इदानीं ऋद्धिद्वारम्—ऋद्ध्या महर्द्धिका देवा भवेयुस्त्रिविधाः। त्रैविध्यमेव दर्शयति—'स्तोकाः' जघन्यर्द्धयः केचित्किल्बिषादयः, 'मध्यमाः' मध्यमर्द्धयः प्रकीर्णकानीकाधिपत्यादयः। 'उत्कृष्टाः' इन्द्रतत्सामानिकादयः, एवं तावत्कल्पेषु ऋद्धित्रैविध्यमुक्तम्। तदुपरि का वार्ता? इत्याह—'कल्पातीतास्तु' ग्रैवेयकाऽनुत्तरवासिनः पुनर्देवाः 'अहमिन्द्राः' अहमिन्द्र इत्यभिधानं येषां तेऽहमिन्द्राः; आत्माधिकस्य कस्यचित्तैरदर्शनादिति ॥ ३४४ ॥ अथ द्वारगाथान्तरमाह—

देवाणं देवीणं, च विभूसा कामभोगमाउं च।
चयणं च सव्वजीवा, कप्पे कप्पे य उववाओ ॥ ३४५ ॥

देवानां देवीनां च विभूषा वक्तव्या। तेषामेव 'कामभोगं' ति कामभोगाः, आयुश्च्यवनं च, 'सव्वजीव' त्ति सर्वजीवानां कल्पे कल्पे चोपपातो वाच्य इति ॥ ३४५ ॥ अथैनामेव गाथाषट्केन व्याचष्टे—

सोहम्मे ईसाणे, नियमा देवाण अच्छराणं च।
होइ विभूसा तणुई, सेसेसुवरिं परायत्ता ॥ ३४६ ॥

सौधर्मे ईशाने 'नियमात्' निश्चयेन देवानामप्सरसां च भवति, कासौ? इत्याह—'विभूषा' अत्यन्तसुन्दरवस्त्रविलेपनपुष्पादीनां शृङ्गाराङ्गानामुपादानेन प्रौढरागितया देहशयनासनयानविमानादिमण्डनरूपा। 'तन्वी' तुच्छरूपा 'शेषेषु' सनत्कुमारादिषु देवलोकेषु, कुतः? इत्याह—'उपरि' सौधर्मादिकल्पापेक्षयोपरिवर्तिनां देवानां 'अल्परागत्वात्' मनाग्देहशयनासनविमानादिषु प्रकृत्यैव मन्दाभिष्वङ्गभावात्, विभूषायाश्च दृढरागमनःप्रकृतिप्रभवत्वादिति ॥ ३४६ ॥ उक्तं विभूषाद्वारम्। प्रवीचारद्वारमाह—

दो कायप्पवियारा, कप्पा फरिसेण दोन्नि दो रूवे।
सद्दे दो चउर मणे, उवरिं पवियारणा नत्थि ॥ ३४७ ॥

'द्वौ' द्विसंख्यौ कायेन—शरीरेणात्रत्यस्त्रीपुरुषाणामिव प्रवीचारः—कामक्रीडा ययोस्तौ कायप्रवीचारौ 'कल्पौ' सौधर्मेशानलक्षणौ, "तात्स्थ्यात्तद्व्यपदेशः" इति सौधर्मेशानकल्पस्था देवाः कायप्रवीचाराः। 'स्पर्शेन' स्तनजघनादिशरीरावयवगतेन 'द्वौ' सनत्कुमारमाहेन्द्रकल्पौ प्रवीचारवन्तौ भवत इति सर्वत्र संबध्यते। 'द्वौ' ब्रह्मलोकलान्तकाख्यौ 'रूपे' तथाविधकामुकजनयोग्यावस्थाभाजि मुखनयनोदरादिगते परस्परं दर्शनविषयभावापन्ने सति। 'शब्दे' गीतभणित-

मन्मनभाषिताभरणादिसंबन्धिनि ध्वनौ मदनमुर्मुरोद्दीपनप्रबलपवनसमाने श्रवणविवरसंचारिणि सति 'द्वौ' शुक्रसहस्रारौ। 'चत्वारः' आनतप्राणतारणाच्युतकल्पाः 'मनसि' प्रदीपितपरस्परानुरागगर्भमदनवह्नौ चित्ते प्रवृत्ते सति। इदमुक्तं भवति—यथा कयोश्चिद्दम्पत्योः स्वभावत एव परस्परारूढदृढानुरागयोर्यौवनारम्भसमय एव प्राप्तपरिणयनव्यवहारयोरप्राप्तसंभोगसुखयोरेव तत्तत्प्रयोजनवशेन प्राप्तषोडशवर्षप्रमाणविप्रयोगयोस्तदन्ते संपन्नसकलाकाङ्क्षाविषयशेषेन्द्रियार्थयोरपाररागजलधिमध्यसर्वाङ्गनिमग्नयोर्निर्दयरतसंमर्दावसाने यादृक्संवेदोदयोपशमजं सर्वाङ्गस्वास्थ्यमुत्पद्यते ततोऽनन्तगुणमेव सौधर्मेशानादिदेवानां कायादिप्रवीचारानुसारेणोक्तरूपेण संभोगसुखं जायत इति। इत्थं कल्पवक्तव्यतामभिधाय कल्पातीतदेवलोकवक्तव्यतामाह—'उपरि' ग्रैवेयकानुत्तरेषु विमानेषु देवानां 'प्रवीचारणा' वेदोदयोपशमार्थव्यापाररूपा 'नास्ति' न विद्यते, अत्यन्तमन्दपुरुषवेदोदयत्वे तत्कृतोपतापाभावात् ॥ २४७ ॥

अथायुर्द्वारम्—

दो साहि सत्त साही, दस चोद्दस सत्तरेव अयराइं।
सोहम्मा जा सुक्को, तदुवरि एक्केक्कमारोवे ॥ २४८ ॥

द्वे तथा द्वे साधिके एव तथा सप्त 'साहि' त्ति साधिकानि सप्तैव दश चतुर्दश सप्तदशैव 'अतराणि' सागरोपमाणि देवानामुपरि स्थितिः। किमादिः? किंपर्यवसानश्चायं व्यवहारः? इत्याह—सौधर्माद्यावच्छुक्रस्तावत् क्रमेणेति। तदूर्ध्वं का गतिः? इत्याह—'तदुपरि' सहस्रारानतप्राणतारणाच्युतेषु नवसु ग्रैवेयकेषु क्रमेण 'एकैकं' सागरोपमं पूर्वपूर्वस्थितेरुपरि समारोपय यावन्नवमग्रैवेयके एकत्रिंशत्सागरो-

पमाणि। विजयादिषु चतुर्षु पुनर्यद्यप्यनेन क्रमेण द्वात्रिंशदेव सागरोपमाण्युत्कृष्टा स्थितिः प्राप्नोति तथापि तत्र त्रयस्त्रिंशदेव, जघन्येन त्वेकत्रिंशत्। "तेत्तीस सागराइं, उक्कोसेणं ठिई भवे चउसु। विजयाइसु विन्नेया, जहण्णयं एगतीसं तु॥१॥" इति ॥३४८॥

अथ जघन्यामाह—

पलियं अहियं दो सार साहिया सत्त दस य चोद्दस य।
सत्तरस सहस्सारे, तदुवरि एक्केक्कमारोवे॥३४९॥

'पलियं' ति पल्योपमं सौधर्मे। 'अधिकं' साधिकं पल्योपमं ईशाने। 'दो सार' त्ति द्वे सागरोपमे सनत्कुमारे। साधिके द्वे सागरोपमे माहेन्द्रे। सप्त ब्रह्मलोके। दश लान्तके। [ चतुर्दश शुक्रे ] सागरोपमानि। सप्तदश सहस्रारे कल्पे। 'तदुपरि' लान्तकादिषु (आनतादिषु) देवस्थानेष्वेकैकमारोपयेत्तावद्यावद्विजयादिष्वेकत्रिंशदिति ॥३४९॥ सांप्रतं च्यवनद्वारम्—

एक्को व दो व तिण्णि व, संखमसंखा व एगसमएणं।
देवा चयंति नियमा, उववाओ अओ परं वोच्छं॥३५०॥

एको वा द्वौ वा त्रयो वा 'संखमसंखा व' त्ति संख्याता असंख्याता वा 'एगसमएणं' ति एकसमयेनेत्यर्थः 'देवाः' सामान्यतो भवनपत्यादयः प्रक्रमानुगताः सौधर्मादिदेवलोकवासिनो वा 'च्यवन्ते' ध्वसन्ति 'नियमात्" अवश्यन्तयेति। 'उपपातं' उत्पादं जीवा अत्रोत्पद्यन्त इत्येवंरूपमतः परं वक्ष्य इति ॥३५०॥

मिच्छा सासणदिट्ठी, सम्मदिट्ठी य तिविह जीवा तु।
अज्झवसायविसेसा, संघयणविसेसतो य गदी॥३५१॥

मिथ्यादृष्टयः सासादनदृष्टयः सम्यग्दृष्टयश्चेति त्रिविधा जीवाः संसारिणः पञ्चेन्द्रियतिर्यञ्चो मनुष्याश्च ये वर्तन्ते, ' तुः ' पूरणे, तेषां किम् ? इत्याह—' अध्यवसायविशेषात् ' मिथ्यात्वादिलक्षणपरिणामहेतुत्वात् 'संहननविशेषतश्च' वज्रर्षभनाराचादिसंहननविशेषात् 'चः' समुच्चये 'गतिः' सौधर्मादिदेवलोकोत्पत्तिलक्षणा वाच्या । तत्र मिथ्यादृष्टयः सौधर्मादारभ्य नवमग्रैवेयकाणि यावत्सामग्रीवशादुत्पद्यन्ते । सासादनदृष्टीनां तु विशेषः सूत्रादवसेयः । सम्यग्दृष्टयस्तु सौधर्मादारभ्य यावदनुत्तरविमानानि तावत्सर्वत्र तथाविधाध्यवसायवशेनोत्पत्तिभाजो भवन्तीति । संस्थान(संहनन)विशेषात्पुनरित्थं गतिरवसेया । यथा—"छेवट्ठेण उ गम्मइ, चत्तारि उ जाव आइमा कप्पा । वड्ढेज्ज कप्पजुयलं, संघयणे कीलियाईए ॥ १ ॥" ॥ ३९१ ॥

अथोर्ध्वगतिप्रस्तावादेव रत्नप्रभादीनां पृथ्वीनां लोकान्तं यावत्क्रमेण बुद्ध्योच्छ्रितानां कस्याः पृथिव्याः कस्मिन्नन्तरे पातलक्षणा गतिर्भवतीति निरूपयन् गाथाचतुष्टयमाह—

**सत्त वि सट्ठाणेहिं, पुढवीओ ऊसिया कहिं पडंति ।**
**हेट्ठा दोण्हं दोण्हं, कप्पाणं पंच पुढवीओ ॥ ३९२ ॥**

सप्तापि न केवलमेकैकेत्यपिशब्दार्थः, ' स्वस्थानेभ्यः ' स्वकीयेभ्योऽवकाशेभ्यः 'पृथिव्यः' रत्नप्रभाद्याः 'उच्छ्रिताः' उत्पादिताः सत्यः कस्मिन्नन्तरे ' पतन्ति ' अवकाशं लभन्ते ? इति शिष्येण पृष्टे सूरिराह—' अधस्तात् ' तलभागे [ द्वयोः ] द्वयोः कल्पयोः [ पञ्च ] पृथिव्यः पतन्तीति । अत्र च वक्ष्यमाणान्तरान्यथानुपपत्तिवशेन क्वचित्साक्षादेव कल्पः क्वचित्कल्पावयवः कल्पशब्देनाभिधीयत इति ॥ ३९२ ॥

हेट्ठा गेविज्जाणं, पुढवी खलु सक्करप्पभा होइ ।
हेट्ठा अणुत्तराणं, पुढवी रयणप्पभा होइ ॥ ३५३ ॥

अधस्तात् 'ग्रैवेयकाणां' अष्टानां ग्रैवेयकप्रस्तटानां पृथ्वी खलु शर्कराप्रभा भवति। तथा अधस्ताद् 'अनुत्तराणां' पञ्चानां विमानानां पृथ्वी रत्नप्रभा भवति ॥३५३॥ एवं च सति किं सिद्धम्? इत्याह—

उवरिं लोगंताओ, सत्त वि खलु लंबियाओ पुढवीओ ।
उडुचंदविमाणाणं, एयम्मि उ अंतरे खुट्टं ॥ ३५४ ॥

'उपरि' ऊर्ध्वलोके 'लोकान्तात्' सिद्धिक्षेत्रपर्यन्तभागलक्षणात् सप्तापि 'खलुः' वाक्यालङ्कारे 'लम्बिताः' मुक्ताः 'पृथिव्यः' रत्नप्रभादिकाः पृथ्वीपिण्डमपेक्ष्य, किम्? इत्याह—'उडुचन्द्रविमानानां' काञ्चनरुचिरापरनामनवमदशमप्रस्तटगतविमानानां संबन्धिन्येतस्मिन्नन्तरे 'खुट्टं' ति निष्ठां प्राप्ताः पिण्डपातमपेक्ष्य। इह च प्रस्तुतयोरेवोडुचन्द्रनाम्नोः प्रथमद्वितीयप्रस्तटयोरन्तरेऽभ्युपगम्यमाने वक्ष्यमाणस्य नवमप्रस्तटान्तरे सप्तमपृथ्वीपिण्डस्य पातानुपपत्तेः ॥ ३५४ ॥ इत्थमेताः पृथिव्यो लम्बिताः कल्पानामधोभागे पतन्ति। अथ केषु नाम प्रस्तटान्तरेषु पतन्ति? इत्याह—

एएहिं अंतरेहिं, इमेहि भागेहि सत्तगच्छेओ ।
सट्ठाणमूसियाओ, सव्वत्थ पडंति पुढवीओ ॥ ३५५ ॥

'एतेषु' वक्ष्यमाणे (णेषु) नवाष्टादशादिषु 'अन्तरेषु' प्रस्तटविवरलक्षणेषु, तत्रापि 'एतेषु' वक्ष्यमाणेष्वेव 'भागेषु' पञ्चकादिषु परं तेषां भागानां सप्तकश्छेदः कार्यः, नवमाद्यन्तरस्य सप्तभागीकृतस्य

पञ्चमादिभागेष्वित्यर्थः, किम्? इत्याह—स्वस्थानादुच्छ्रिताः सत्यः 'सर्वत्र' सर्वेषु वक्ष्यमाणेषु भागेषु क्रमेण पतन्ति पृथिव्य इति ॥ ३५५ ॥ नवादिभागानेवाह—

नव अट्ठारस एगूणतीस पणतीस तह य चोयाला।
तेवण्णे एगट्ठी, य अंतरा होंति पुढवीओ ॥ ३५६ ॥

'नव' त्ति प्राकृतत्वात् नवमं अष्टादशं एकोनत्रिंशं पञ्चत्रिंशं तथा च 'चोयाल' त्ति चतुश्चत्वारिंशं 'तेवण्णे' त्ति त्रिपञ्चाशं 'एगट्ठी य' त्ति एकषष्टं च, एतान्यन्तराणि प्रतीत्य विभक्तिलोपश्च सर्वत्र प्राकृतत्वाद्, भवन्ति पृथिव्य इति ॥ ३५६ ॥ एतेष्वेवान्तरेषु भागान्निर्दिदिक्षुराह—

पंच तिग एग छक्कग, चउक्क तिग सत्तमेसु भागेसु।
सट्ठाणमूसियाओ, सव्वत्थ पडंति पुढवीओ ॥ ३५७ ॥

आर्षत्वात् पञ्चमतृतीयएक (प्रथम) षष्ठचतुर्थतृतीयसप्तमेषु भागेषु यथाक्रमं शेषं प्राग्वत्। अयमत्र भावः—इह किल द्वाषष्टिरूर्ध्वलोकप्रस्तटाः, एकषष्टिश्च तदन्तराणि। तत्र सौधर्मेशानसंबन्धिनोर्नवमदशमयोः प्रस्तटान्तरे तस्यापि पञ्चमे सप्तभागे महातमःप्रभापृथ्वीपिण्डो निष्ठां याति। सनत्कुमारमाहेन्द्रसंबन्धिपञ्चमषष्ठप्रस्तटान्तरेषु उडुप्रस्तटान्तरापेक्षयाऽष्टादशे तस्यापि तृतीयसप्तांशे तमःप्रभायाः। ब्रह्मलोकचतुर्थपञ्चमप्रस्तटान्तरे मूलमपेक्ष्यैकोनत्रिंशे तस्यापि प्रथमे सप्तांशे धूमप्रभायाः। लान्तकचतुर्थपञ्चमप्रस्तटान्तरे सर्वान्तरापेक्षया पञ्चत्रिंशत्तमे तस्यापि षष्ठे सप्तांशे पङ्कप्रभायाः। सहस्रारस्यानतप्राणतयोश्च कल्पयोरन्तरे मूलान्तरापेक्षया चतुश्चत्वारिंशे तस्यापि चतुर्थे सप्तांशे वालुकाप्रभायाः।

प्रथमद्वितीयग्रैवेयकयोरन्तरे मूलान्तरापेक्षया त्रिपञ्चाशत्तमे तस्यापि तृतीये सप्तभागे शर्कराप्रभायाः । नवमग्रैवेयकसर्वार्थसिद्धप्रस्तटान्तरे सर्वापेक्षयैकषष्टितमे तस्यापि सप्तमे सप्तांशे रत्नप्रभायाः पिण्डो निष्ठां याति । अत्र च नवमादीनां प्रस्तटान्तराणां ये पञ्चमादयो भागास्ते तलभागादूर्ध्वं ज्ञातव्या इति ॥ ३९७ ॥ अथात्रैव कञ्चन विशेषं वक्तुकाम आह—

रयणप्पहाएँ ठाणे, सत्त वि खलु ऊसियाओ पुढवीओ ।
हेट्ठा अणुत्तराणं, सोवाणगईअ बोधव्वा ॥ ३५८ ॥

'रत्नप्रभायाः' प्रथमपृथिव्याः 'स्थाने' इति विभक्तिव्यत्ययात् 'स्थानात्' अवकाशात्, किं च रत्नप्रभायाः स्थानम् ? इति चेदुच्यते—समभूमितलादधोभाग इति, ततः सकाशात्सप्तापि किं पुनरेकैकेत्यपिशब्दार्थः 'खलुः' वाक्यालङ्कारे 'उच्छ्रिताः' ऊर्ध्वमुत्पाटिताः पृथिव्यः रत्नप्रभायाः, ततः किम् ? इत्याह—अधस्तात् 'अणुत्तराणं' ति अनुत्तरेभ्यः सोपानगत्या बोद्धव्याः, यथा हि सोपानान्यधोऽधो विस्तृतानि भवन्ति, एवमेता अपि रत्नप्रभाद्याः स्वस्थानोत्पाटिताः क्रमेणैव बुद्ध्या लोकान्तमारोपिता इति ॥ ३९८ ॥ संप्रति यदैता एव महातमःप्रभापृथ्वीमादौ कृत्वा उपरि पिण्डोऽधस्ताच्च तदवकाशक्षेत्रमित्यनेन क्रमेण लोकान्तादवलम्ब्यन्ते तदा कस्याः पृथिव्याः कस्मिन् स्थाने पिण्डः पततीति मनसि समाधाय गाथाद्वयमाह—

रयणादीया हेट्ठा, बितिया तइया उ बंभलोगम्मि ।
पंका लंतयठाणे, धूमा सहसार उवरिं तु ॥ ३५९ ॥

'रत्नाद्याः' रत्नप्रभाप्रभृतिकाः पश्चानुपूर्व्या 'अधस्तात्' अधो-

मुखं लोकान्तादवतारिताः सत्य एतेषु स्थानेषु पतन्ति । तद्यथा— सौधर्मेशाननवमप्रस्तटान्तरे रत्नप्रभा । ( ग्रंथाग्रं २९०० ) 'बीय' त्ति 'द्वितीया' शर्करप्रभा सनत्कुमारमाहेन्द्रपञ्चमषष्ठप्रस्तटान्तरे । 'तृतीया तु' वालि(लु)काप्रभा ब्रह्मलोके चतुर्थपञ्चमप्रस्तटान्तरे । 'पङ्का' चतुर्थपृथ्वी लान्तकस्थाने तच्चतुर्थपञ्चमप्रस्तटान्तरे । 'धूमा' पञ्चमी पृथ्वी सहस्रारोपरि । 'तुः' विशेषण इति ॥ ३५९ ॥

**गेवेज्जाणं हेट्ठा, छट्ठी अह ऽणुत्तराण सत्तमिया ।**
**सट्ठाणमूसियाओ, सव्वत्थ पडंति पुढवीओ ॥ ३६० ॥**

'ग्रैवेयकाणां' अष्टानामधस्तात् 'षष्टी' तमःप्रभा । 'अथ' अनन्तरं 'अनुत्तराणां' पञ्चानां सर्वार्थसिद्धादीनां 'सप्तमिका' महातमःप्रभा । एवं 'स्वस्थानोच्छ्रिताः' विपरीतगत्योत्पाटिताः सत्यः 'सर्वत्र' सर्वेषु प्राग्निरूपितेषु पञ्चमादिषु सप्तांशेषु 'पतन्ति' अवतरन्ति पृथिव्य इति । अत्र च गाथाष्टकेऽन्यदपि क्वचित्किञ्चित्पाठान्तर- पलभ्यते तच्च न सम्यगवबुध्यते इति ॥ ३६० ॥ अथ सौधर्मादिषु तेप्रस्तटमुत्कृष्टां जघन्यां च स्थितिं प्रतिपादयितुमिच्छुः सामान्यतस्ता- वत्तामेव गाथाद्वयेनाह—

**दो सत्त दस य चोद्दस, सत्तरसऽट्ठार जाव इगतीसा ।**
**सक्कादीणुक्कोसा, ठिती उ जा उवरि गेवेज्जा ॥ ३६१ ॥**

द्वे सप्त दश चतुर्दश च सप्तदशाष्टादश तत्प्रभृति यावदेकत्रिंशत्सा- गरोपमाणि 'शक्रादीनां' सौधर्मेशानादिदेवलोकगतेन्द्राणां [ उत्कृष्टा ] स्थितिः प्रतिनियतायुर्लक्षणा ज्ञातव्या । एवं सागरोपमद्वयाति ( दि )- क्रमेण यावदुपरितनग्रैवेयकाणीति ॥ ३६१ ॥

पलिओवमं च एगं, सागर दो सत्त दस य चोद्दस य।
सत्तरस जाव तीसा, एएसि जहराणया उ ठिई ॥ ३६२ ॥

'पल्योपमं' प्रतीतस्वरूपमेव 'च:' पूरणे एकं सौधर्मेशानयोः। 'सागर' त्ति सागरोपमे [ द्वे ] सनत्कुमारमाहेन्द्रयोः, सप्त ब्रह्मलोके, दश च लान्तके, चतुर्दश शुक्रे, [ सप्तदश सहस्रारे ], इतः प्रभृत्येकैकसागरोपमवृद्ध्या तावन्नेयं यावद् [ नवम ] ग्रैवेयके त्रिंशत्सागरोपमाणि, किम्? इत्याह—'एतेषां' शक्रादीनां जघन्या तु स्थितिः। परं विजयादिषु चतुर्षु एकत्रिंशत् स्थितिरायुष्काल इति ॥ ३६२ ॥ एनामेव प्रतिप्रतरमाह—

पलिओवमं जहराणा, दो तेरसभाग उदधिनामस्स।
उक्कोस ट्ठिती भणिया, सोहम्मे पत्थडे पढमे ॥ ३६३ ॥

पल्योपमं जघन्या, द्वौ च त्रयोदशभागौ 'उदधिनाम्नः' सागरोपमस्येत्यर्थ उत्कृष्टा स्थितिर्भणिता, क्व? इत्याह—सौधर्मे प्रस्तटे प्रथमे ॥ ३६३ ॥ शेषप्रस्तटातिदेशमाह—

एवं दुगवड्ढीए, नेयव्वं जाव सत्तमं पयरं।
भागेहिं तत्रो करणं, जा तेरसमे दुवे अयरा ॥ ३६४ ॥

'एवं' अनेन क्रमेण 'द्विकवृद्ध्या' सागरोपमत्रयोदशभागद्वयोपचयलक्षणया प्रतिप्रस्तटं नेतव्यं यावत्सप्तमं [ प्रतरम् ], प्रतिप्रतरमपूर्वापूर्वभागद्वयवृद्ध्या एकं सागरोपमं त्रयोदशस्तद्भाग इति परा स्थितिः। तदुपरि तु का गतिः? इत्याह—'भागाभ्यां' द्वयलक्षणाभ्यां 'ततः' सप्तमप्रतरलब्धस्थितिकालात्करणं प्रवर्तते यावत् त्रयोदशप्रतरे द्वे अतरे इति, षड्विंशतिसागरोपमत्रयोदशभागेषु सागरो-

पमद्वयभावादिति। जघन्या त्वधस्तनानन्तरप्रस्तटगतोत्कृष्टा स्थितिः सर्वत्र वाच्येति। अयमत्र परमार्थः—यदा कश्चित्सौधर्मेशानपञ्चमप्रस्तटे उत्कृष्टां स्थितिं जिज्ञासति तदा द्वयोः सागरोपमयोस्त्रयोदशभिर्भागे हृते लब्धौ द्वौ सागरोपमत्रयोदशभागौ, स्थापना चेयम्—२/१३, तयोश्च पञ्चभिर्गुणने जाता दश त्रयोदशभागाः, इयमेव तत्रोत्कृष्टा स्थितिरित्येवं प्रतिपाद्यते। एवं सर्वत्र प्रस्तटेषु भावना कार्येति ॥ ३६४ ॥
अथोपरितनकल्पेषु प्रतिप्रतरं स्थितिप्रमाणानयनाय करणमाह—

सुरकप्पठिइविसेसो, सगपयरविभाग इच्छसंगुणिओ।
हेट्ठिल्लट्ठितिसहिओ, इच्छियपयराउ उक्कोसा ॥ ३६५ ॥

'सुरकल्पस्थितिविशे(श्ले)षः' सागरोपमपञ्चकादिलक्षणस्तस्य च 'स्वकप्रतरविभागः' स्वकैर्द्वादशादिभिः प्रतरैस्तस्य विभागः क्रियत इत्यर्थः, ततो यत्तत्र लब्धं तद् 'इच्छासंगुणितं' इष्टप्रतरसंख्यालक्षणयेच्छया ताडितं अधस्तनस्थितिसहितम्, किम् ? इत्याह—'इप्सितप्रतरात्' इष्टप्रतरमाश्रित्य 'उत्कृष्टा' उत्कर्षवती स्थितिर्भवति। इदमुक्तं भवति—यदा सनत्कुमारमाहेन्द्रयोस्तृतीयप्रस्तटे उत्कृष्टा स्थितिर्बोद्धुमिष्यते तदा द्वयोः पञ्चानां(सप्तानां)च सागरोपमाणां विशे(श्ले)षो ग्राह्यः, स पञ्चलक्षणः, तस्य च स्वकप्रतरैर्द्वादशलक्षणैर्भागे लब्धाः सागरोपमद्वयलक्षणायां मीलितायां जातानि त्रीणि सागरोपमाणि त्रयं च द्वादशभागानामिति। एवं सर्वत्र भावना कार्येति॥३६५॥ अथ करणलब्धां प्रतिप्रतरस्थितिं शास्त्रकृत्कण्ठत एव गाथाद्वादशकेनाह—

दो अयरा उ जहण्णा, पढमे पयरे सणंकुमारस्स।
दो अयरा उक्कोसा, बारस भागा उ पंचऽन्ने ॥ ३६६ ॥

[ द्वे 'अतरे तु' द्वे सागरोपमे पुनर्जघन्या स्थितिः] प्रथमे प्रतरे सनत्कुमारस्य। उपलक्षणत्वान्माहेन्द्रस्य च, परं किञ्चित्साधिकत्वं वाच्यम्। द्वे अतरे उत्कृष्टा द्वादशभागाश्च पञ्चान्ये सागरोपमस्येति ॥ ३६६ ॥ अथोत्तरम्—

पंचुत्तरिया वड्ढी, नवरि विभासेत्थ पत्थडे तइए।
भागेहिँ तओ करणं, तं चेव य जाव सत्तयरा ॥ ३६७ ॥

पञ्चोत्तरिका वृद्धिः। 'नवरि' त्ति नवरं 'विभाषा' विशेषभणनलक्षणा 'अत्र' पञ्चोत्तरवृद्धौ, क? इत्याह—प्रस्तटे तृतीये, यतस्तत्रैकं सागरोपमं त्रयश्च द्वादशभागा वृद्धिफलं लभ्यत इति। 'भागैः' पञ्चप्रमाणलक्षणैः 'ततः' तृतीयप्रस्तटादुपरि करणं 'तच्चैव तु' तदेव पुनः प्रतरवृद्धिलक्षणं यावद्द्वादशे प्रतरे सप्तातराणि, द्वादशभागानां षष्टिप्रमाणानां द्वयोश्चाधस्तनकल्पसागरोपमयोर्मीलनेन सागरोपमसप्तकसंभवादिति ॥ ३६७ ॥

सत्तयराइं जहण्णा, पढमे पयरम्मि बंभलोगस्स।
उक्कोसा सत्ततरा, तिण्णि य छब्भाग णिद्दिट्ठा ॥ ३६८ ॥

सप्तातराणि जघन्या प्रथमे प्रतरे ब्रह्मलोकस्य। उत्कृष्टा सप्तातराणि त्रयश्च षड्भागा निर्दिष्टा इति ॥ ३६८ ॥ शेषप्रस्तटातिदेशमाह—

एवं तिगवड्ढीए, बिइयाओ आरभेत्तु भागेहिं।
करणं ता नेयव्वं, दस अयरा जाव छट्ठम्मि ॥ ३६९ ॥

'एवं' प्रथमप्रस्तटन्यायेन त्रिकवृद्धौ सत्यां द्वितीयात्प्रस्तटादारभ्य भागैः करणं तावन्नेतव्यं दशातराणि यावत् षष्ठे प्रतरे, अष्टादशप्रमा-

णानां षड्भागानां पूर्वस्थितेः सप्तसागरोपमलक्षणया ( णायाश्च ) मीलने एतत्संख्यासंभवादिति ॥ ३६९ ॥

दस अयराइँ जहण्णा, पढमे पयरम्मि लंतगस्स ठिती ।
उक्कोसा दस अयरा, चत्तारि य पंचभागा उ ॥ ३७० ॥

दशातराणि जघन्या प्रथमे प्रतरे लान्तकस्य स्थितिः । उत्कृष्टा दशातराणि चत्वारि च पञ्चभागाः 'तुः' पूर्ववत् ॥ ३७० ॥

चउरुत्तरिया वुड्ढी, बितियाओ आरभेत्तु भागेहिं ।
करणं ता णेयव्वं, चोद्दस अयराइँ पंचमए ॥ ३७१ ॥

'चतुरुत्तरिका' प्रतिप्रतरं पञ्चभागचतुष्टयोपलक्षणा वृद्धिर्द्वितीयात्प्रस्तटादारभ्य भागैस्ततः करणं तावन्नेतव्यं यावच्चतुर्दशातराणि पञ्चमके प्रतर इति, विंशतिप्रमाणानां पञ्चभागानां दशानां च प्राक्कल्पस्थितिसागरोपमाणां मीलने एतत्संख्यासंभवादिति ॥ ३७१ ॥

चोद्दस अयर जहण्णा, पढमे पयरम्मि ठिइ महासुक्के ।
ते चेव उ उक्कोसा, तिण्णि चउरभाग अण्णे उ ॥३७२॥

चतुर्दशातराणि जघन्या प्रथमे प्रतरे [स्थितिः] महाशुक्रे । तान्येव च चतुर्दशसागरोपमाण्युत्कृष्टा स्थितिस्त्रयश्चतुर्भागा अन्ये त्विति ॥३७२॥

एवं तिगवुड्ढीए, बितियाओ आरभेत्तु भागेहिं ।
करणं ता नेयव्वं, सत्तरसयरा चउत्थम्मि ॥ ३७३ ॥

एवं त्रिकवृद्ध्या द्वितीया[त्प्रस्तटा]दारभ्य भागैः करणं तावन्नेतव्यं यावत्सप्तदशातराणि चतुर्थे महाशुक्रप्रस्तट इति ॥ ३७३ ॥

सत्तरस जहण्णा उ, पढमे पयरम्मि ठिइ सहस्सारे ।
ताइं चिय उक्कोसा, चउत्थभागो मुणेयव्वो ॥ ३७४ ॥

सप्तदश जघन्या 'तुः' पूरणे प्रथमे प्रतरे स्थितिः सहस्रारे। तान्येव च सप्तदश सागरोपमाणि उत्कृष्टा स्थितिश्चतुर्थभागः सागरोपमस्यैकस्य मुणितव्य इति ॥ ३७४ ॥

**एगुत्तरवुड्ढीए, नेयव्वं जा चउत्थयं पयरं।**
**अट्ठारस अयराइं, ठिइ उक्कोसा चउत्थम्मि ॥ ३७५ ॥**

'एकोत्तरवृद्ध्या' एकैकस्य चतुर्भागस्योपचयेन नेतव्यं यावच्चतुर्थकं प्रतरं तत्राष्टादशातराणि स्थितिरुत्कृष्टा चतुर्थे इति ॥ ३७९ ॥

**चउपयरा णायव्वा, कप्पा चत्तारि आणयाईया।**
**अट्ठार जहराणाई भागुत्तरवुड्ढि फलमाह ॥ ३७६ ॥**

चतुष्प्रतरा ज्ञातव्याः कल्पाश्चत्वारः 'आनतादिकाः' आनतप्राणताऽऽरणाऽच्युताः। तत्रानतप्रतरचतुष्टयविमानेष्वित्यर्थः, अष्टादश जघन्या 'आइ' त्ति आदिप्रतरे। अथ 'भागुत्तर' त्ति प्रतिप्रतरमपरा [पर] सागरोपम[चतु]र्भागाभ्यधिकां 'वृद्धिं' जघन्यस्थितेरेवोपचयलक्षणाम्, विभक्तिलोपश्च प्राग्वत्, किम्? इत्याह—फलं 'आह' उक्तवानुत्कृष्टस्थितिरूपतयां गणधरादिरिति। तच्च चतुर्थप्रतरे एकोनविंशतिसागरोपमलक्षणम्, चतुर्णां चतुर्भागानामष्टादशसागरोपमाणां च मीलने एतत्संख्यासंभवात्। एवं प्राणताऽऽरणाऽच्युतेष्वपि स्वजघन्यस्थितिमपेक्ष्य प्रतिप्रतरं सागरोपमचतुर्भागवृद्ध्योत्कृष्टस्थितिभावना कार्येति ॥ ३७६ ॥ अथैतेष्वेव जघन्यस्थितिमाह—

**गुणवीसा संपुरणा, इगवीस ठियाहिया जहाकमसो।**
**नवपयरा भागुत्तरवुड्ढी जा उवरिगेवेज्जा ॥ ३७७ ॥**

एकोनविंशतिः 'संपुण्ण' त्ति संपूर्णा विंशतिरेव एकविंशतिर्जघन्या

स्थितिर्व्याख्याता 'यथाक्रमशः' यथासंख्यं प्राणताऽऽरणाऽच्युतेष्विति। अथ ग्रैवेयकाण्यधिकृत्याऽऽह—' नवप्रतराणि ' नव प्रतरा येषु तानि तथा सर्वग्रैवेयकाणि भागोत्तरवृद्धया एकैकसागरोपमचयलक्षणा (क्षणया) यावत् 'उवरिगेवेज्ज' त्ति उपरितनग्रैवेयकाणि यावन्नेतव्यानि, प्रथमग्रैवेयकादारभ्यैकैकसागरोपमवृद्धया पर्यन्तग्रैवेयके एकत्रिंशत्सागरोपमाणीत्यर्थः ॥ ३७७ ॥ सांप्रतं ग्रन्थमुपसंहरन्नुपदेशमाह—

देविंदयाण लेसो, गुरूहिं मयरागरोसरहिएहिं।
कहिओ घेत्तव्वो पुण, हासाईविकहरहिएहिं ॥ ३७८ ॥

[ ' देवेन्द्रकाणां ' ] विमानेन्द्रकापरनाम्नां ' लेशः ' वक्तव्यतांशरूपः, किम् ? इत्याह—' गुरु[भिः] ' सूत्रार्थप्रणयनपरैस्तीर्थकरगणधरादिभिः 'मदरागद्वेषरहितैः' अहङ्काराभिष्वङ्गमत्सरपरित्यक्तैः 'कथितः' निरूपितः, ' ग्रहीतव्यः पुनः मया सांप्रतं कथ्यमानः 'हास्यादिविकथारहितैः ' उपहासविप्लवविरुद्धकथापरिहारिभिर्विनेयैरिति ॥३७८॥

॥ समाप्ता चेयं श्रीमुनिचन्द्रसूरिविरचिता देवेन्द्र नरकेन्द्रवृत्तिरिति ॥

## अथ प्रशस्तिः ।

श्रीमच्चन्द्रकुलावतंसकसमः श्रीमान् बृहत्संज्ञिते
　गच्छेऽभूदिह सर्वदेवमुनिपश्चारित्रपात्रं परम् ।
विद्वल्लोकमनश्चमत्कृतिकृतः पाण्डित्यतो विश्रुत-
　स्तस्मादप्यजनि प्रभुर्व्रतवतां श्रीनेमिचन्द्राभिधः ॥१॥
श्रीविनयचन्द्रनामाऽध्यापकशिष्यास्तदन्वये जाताः ।
श्रीमुनिचन्द्रमुनीन्द्रास्तैरेषा विरचिता वृत्तिः ॥ २ ॥
श्रीमच्चक्रेश्वरसूरिपुङ्गवैरपरकोविदसहायैः ।
अणहिलपाटकनगरे विशोध्य नीता प्रमाणमियम् ॥ ३ ॥
प्रत्यक्षरं निरूप्यास्य ग्रन्थमानं विनिश्चितम् ।
अनुष्टुपां (भां) सहस्रे द्वे षट्शती च नवाधिके ॥ ४ ॥
निष्पत्तिमागतेयं वेर्स्वङ्गहरोख्यवत्सरे षष्ठ्याम् ।
कृष्णायां तु सहस्ये सोहिकसोढकसत्कवसतौ ॥ ५ ॥

---

॥ श्रीमन्मुनिचन्द्रसूरिकृतवृत्तियुतं
देवेन्द्रनरकेन्द्रकप्रकरणं
समाप्तम् ॥